Digitized by Arya Samaj Foundation Chennai and eGangotri

GYANDA
1977 G.K.U.

Digitized by Arya Samaj Foundation Chennai and eGangotri

077921

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077921

STOCK VERIFICATION
Central
Library
2024-25 G.K.D.U., H.S.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानदा

श्रीभगवानदास-संस्कृत-महाविद्यालयः
हरिद्वारम्
विद्ययाऽमृतमश्नुते

RT-0288

हरिद्वारस्थप्राचीनावधूतमण्डलाश्रमीयस्य

श्रीभगवानदाससंस्कृतमहाविद्यालयस्य

मुखपत्रिका

अप्रैल १९७७] [वैशाखः २०३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवस्थामण्डलम्

संरक्षकाः यतिवर्यः श्रद्धेयः श्रीमत्स्वामिगुरुचरणदासमहोदयः
श्रद्धेयः स्वामी श्रीगोविन्दप्रकाशमहाराजः
श्रीमान् हरेन्द्रकत्यालमहोदयः
श्रीमान् साँईदासो वर्मा

*

परामर्शदातारः श्रीमनसारामशर्मा
श्रीस्वामिहरप्रकाशः
श्रीराजाराम उनियालः

*

प्रबन्धसम्पादकः श्रीशुकदेवदासः शास्त्री

*

सम्पादकौ स्वामी श्रीहनुमान् शास्त्री
श्रीरामरत्नः शास्त्री

*

छात्रसम्पादकौ श्रीपद्मप्रसादः सुवेदी
श्रीसुरेशचन्द्रो जोशी

प्रकाशकः
स्वामी गोविन्दप्रकाशो वेदान्ताचार्यः
परमाध्यक्षः
स्वामिरामतीर्थाश्रमस्य
राजपुरस्थस्य देहरादूनान्तर्गतस्य

मुद्रकः
सुरेशचन्द्रो वैष्णवः
अध्यक्षः
गुरुकुल-कांगड़ी-मुद्रणालयस्य
हरिद्वारस्थस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ऊर्ध्वं कृण्वन्तु अध्वरस्य केतुम्"

गुरुकुल कांगड़ी वि
हरिद्वार

श्री भगवानदास संस्कृत महाविद्यालयः
हरिद्वारम्
विद्ययाऽमृतमश्नुते

ज्ञानदा

| वर्षम् १ | वैशाखः २०३४ विक्रमीयः, अप्रैल १९७७ ईशवीयः | अङ्कः १ |

मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम् ।
प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे ।।
(अथर्ववेदः ६।१०८।२)

आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषु मा संशयो भूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता नैते वाचं विप्लुतार्थां वदन्ति ।।
(उत्तररामचरितम्)

* सरस्वती-स्तवनम् *

तव नौमि सरस्वति ! पादयुगम् ।

भवसागरमज्जनभीतिनुतं, प्रतिपादितसन्ततिकारमिदम् ।
विमलादिकशुद्धविशुद्धपदं, तव नौमि सरस्वति ! पादयुगम् ।।
मतिहीनजनाश्रयपादमिदं, सकलागमभाषितभिन्नपदम् ।
परिपूरितविश्वमनेकभवं, तव नौमि सरस्वति ! पादयुगम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यालयस्य पदाधिकारिणः सदस्याश्च

१-	**संस्थापकः**	— स्वर्गीय लालाभगवानदासकत्यालः दिल्लीवास्तव्यः
२-	**अध्यक्षः**	— स्वामी श्रीगुरुचरणदासमहाराजः (अध्यक्षः—भारत-साधु-समाजस्य)
३-	**व्यवस्थापकः**	— स्वामी श्रीगोविन्दप्रकाशमहाराजः
४-	**कार्यवाहक-व्यवस्थापकः**	— श्रीसाँईदासो वर्मा
५-	**मन्त्री**	— स्वामी श्रीहंसप्रकाशः
६-	**उपमन्त्री**	— श्रीवीरेन्द्रकत्यालः
७-	**कोषाध्यक्षः**	— श्रीहरेन्द्रकत्यालः
८-	**सदस्या**	— श्रीमती फूलस्यालः
९-	**सदस्यः**	— श्रीदुर्गादासः सचदेवः
१०-	**परामर्शदाता**	— श्रीअमीरचन्द्रः शास्त्री

महाविद्यालयस्य अध्यापकवृन्दम्

१-	**प्रधानाचार्यः**	— श्रीमनसारामशर्मा
२-	**वेदान्तविभागाध्यक्षः**	— स्वामी श्रीहरप्रकाशः
३-	**साहित्यविभागाध्यक्षः**	— श्रीराजाराम उनियालः
४-	**व्याकरणविभागाध्यक्षः**	— स्वामी श्रीहनुमान् शास्त्री
५-	**सहायक-साहित्यविभागाध्यक्षः**	— श्रीखीमानन्दः सती
६-	**सहायक-वेदान्तविभागाध्यक्षः**	— ब्रह्मचारी श्रीविट्ठलः
७-	**सहायकव्याकरणविभागाध्यक्षः**	— श्रीपरमानन्दडुगराकोटी
८-	**सहायकाधुनिकविभागाध्यक्षः**	— श्रीविष्णुदत्तगोस्वामी
९-	**सहायकाधुनिकविभागाध्यक्षः**	— श्रीरामरत्नः शास्त्री
१०-	**आधुनिकविषयशिक्षकः**	— श्रीदेवेन्द्रकुमारः (१-३-७७तः सेवामुक्तः)
११-	**सम्मानिताध्यापकः**	— श्रीकौस्तुभानन्दपन्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077921

महाविद्यालय के संस्थापक

स्वर्गीय लाला भगवानदास जी कत्याल

२१, बेंगलो रोड, कमलानगर, दिल्ली

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अखिलवैचित्र्यचित्रिते निखिलकलाकौशले ज्ञानविज्ञानादिसमन्वितदेशबहुलेऽपि भूमण्डलेऽस्मिन् भारतं नाम राष्ट्रं कामपि स्वकीयां विशेषस्थितिमावहत् सर्वोत्कृष्टतया राजतेतराम्। अयमेव देशः प्राथमिकसभ्यतोदयेन, निखिलमानवतोपकाराय दिव्यसन्देशप्रदानेन, अनेकासां लोकोत्तरविभूतीनामवतारेण, ज्ञानविज्ञानविविधक्षेत्रेषु उत्कर्षलाभेन, निर्हिंसकक्रान्तिलब्धस्वातन्त्र्येण च समस्तान् अपि देशान् अतिशेते, इति नाविदितमितिहासानुशीलनतत्पराणां विपश्चिदपश्चिमानाम्। तस्यैव खलु महतो राष्ट्रस्य वयं नागरिका इति गर्वमखर्वं सानन्दं वहामः।

निसर्गप्रदत्तसौन्दर्यभाण्डागारस्य भारतस्यास्योत्तरस्यां दिशि कविकुलगुरुणा कालिदासेन पृथिव्या मानदण्ड इव समुपवर्णितोऽयं हिमालयोऽमृतधाराभिर्लोकं परिपोषयन् संराजते। तस्यैव द्वारभूतं भागीरथीसलिलधाराभिषिक्तं प्राचीनकालतः साधनानिरतयोगिजनतपःपूतं सम्प्रत्यपि अध्यात्मविद्यादिविभूषितमस्ति हरिद्वारं नाम लोकविश्रुतं नगरम्। तत्रैव चाधुनिकविद्यादाननिरते प्राक्तनसंस्कृतभाषादिसंरक्षणतत्परे बहुविद्यामन्दिरमण्डले भगवानदास-संस्कृत-महाविद्यालय प्राचीनावधूतमण्डलाश्रमसंस्थितः सुधीजनसंपूजितोऽन्यतमत्वं बिभर्ति। अचिरादेव संस्थापितोऽयं संस्कृतविद्यालयः संस्थापकलालाभगवानदासकत्यालमहोदयस्य पुण्यप्रतापेन देशविदेशप्रख्यातयशसः ऐहिकामुष्मिकद्विविधसाधनानिरतस्य यतिवर्यस्य स्वामिगुरुचरणदास-महोदयस्य सम्यक्सेचनेन, विरक्तस्यापि लब्धव्यवहारचातुर्यस्य स्वामिनो गोविन्दप्रकाश-महाभागस्य परिवर्धनेन, अन्येषां च विदुषां महात्मनां राष्ट्रसेविनां संरक्षणेन सहयोगेन च कतिपयैरेव दिवसैः संस्कृतपाठशालासु अनायासम् उच्चस्थितिं लेभे। पठनपाठनादिसुव्यवस्थया पर्याप्तछात्रसंख्यया सुयोग्याध्यापकवृन्देन चेयं संस्था उत्तरप्रदेशस्थितानां संस्कृतपाठशालानां मध्ये कामपि विशिष्टां स्थितिं भजतेतरामिति नात्र गर्वोक्तिः।

महन्तस्वामिश्रीमद्रामप्रकाशसंसेवितप्राचीनावधूतमण्डलाश्रमसंरक्षणसंपोषितस्यास्य महाविद्यालयस्य नवनवसौविध्यप्रदानतत्पराणां सञ्चालकानां मनसि पत्रिकादिप्रकाशनव्यापारः छात्रप्रतिभाविकासमूलकत्वेन कतिपयेभ्यो वर्षेभ्यः पूर्वमेव संकल्पित आसीत्। प्रतिवर्षमेतदर्थमनुष्ठितेऽपि प्रयासे ऐषमो वत्सर एतत्पुण्यकार्यसंपादनस्य सुयोगं लब्धवानिति हर्षास्पदम्। एतत्फलस्वरूपमेव तत्रभवतां भवतां विमलशेमुषीकाणां तत्त्वानुशीलनतत्पराणां सहृदयपाठकानां सेवायां 'ज्ञानदा'नाम्नी पत्रिका सादरं समर्प्यते।

साम्प्रतिके समये, विमलमतीनां बालकानां बालिकानां च सर्वतोभाविनीं प्रतिभाभिवृद्धिं समाकलयद्भिः शिक्षालयसंचालकैः आविष्कृतेषु बहुविधतादृशसाधनेषु अभिव्यक्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अखिलवैचित्र्यचित्रिते निखिलकलाकौशले ज्ञानविज्ञानादिसमन्वितदेशबहुलेऽपि भूमण्डलेऽस्मिन् भारतं नाम राष्ट्रं काममपि स्वकीयां विशेषस्थितिमावहत् सर्वोत्कृष्टतया राजतेतराम्। अयमेव देशः प्राथमिकसभ्यतोदयेन, निखिलमानवतोपकाराय दिव्यसन्देशप्रदानेन, अनेकासां लोकोत्तरविभूतीनामवतारेण, ज्ञानविज्ञानविविधक्षेत्रेषु उत्कर्षलाभेन, निर्हिंसकक्रान्तिलब्धस्वातन्त्र्येण च समस्तान् अपि देशान् अतिशेते, इति नाविदितमितिहासानुशीलनतत्पराणां विपश्चिदपश्चिमानाम् । तस्यैव खलु महतो राष्ट्रस्य वयं नागरिका इति गर्वमखर्वं सानन्दं वहामः ।

निसर्गप्रदत्तसौन्दर्यभाण्डागारस्य भारतस्यास्योत्तरस्यां दिशि कविकुलगुरुणा कालिदासेन पृथिव्या मानदण्ड इव समुपवर्णितोऽयं हिमालयोऽमृतधाराभिर्लोकं परिपोषयन् संराजते । तस्यैव द्वारभूतं भागीरथीसलिलधाराभिषिक्तं प्राचीनकालतः साधनानिरतयोगिजनतपःपूतं सम्प्रत्यपि अध्यात्मविद्यादिविभूषितमस्ति हरिद्वारं नाम लोकविश्रुतं नगरम् । तत्रैव चाधुनिकविद्यादाननिरते प्राक्तनसंस्कृतभाषादिसंरक्षणतत्परे बहुविद्यामन्दिरमण्डले भगवानदास-संस्कृत-महाविद्यालय प्राचीनावधूतमण्डलाश्रमसंस्थितः सुधीजनसंपूजितोऽन्यतमत्वं बिभर्ति । अचिरादेव संस्थापितोऽयं संस्कृतविद्यालयः संस्थापकलालाभगवानदासकत्यालमहोदयस्य पुण्यप्रतापेन देशविदेशप्रख्यातयशसः ऐहिकामुष्मिकद्विविधसाधनानिरतस्य यतिवर्यस्य स्वामिगुरुचरणदास-महोदयस्य सम्यक्सेचनेन, विरक्तस्यापि लब्धव्यवहारचातुर्यस्य स्वामिनो गोविन्दप्रकाश-महाभागस्य परिवर्धनेन, अन्येषां च विदुषां महात्मनां राष्ट्रसेविनां संरक्षणेन सहयोगेन च कतिपयैरेव दिवसैः संस्कृतपाठशालासु अनायासम् उच्चस्थितिं लेभे । पठनपाठनादिसुव्यवस्थया पर्याप्तछात्रसंख्यया सुयोग्याध्यापकवृन्देन चेयं संस्था उत्तरप्रदेशस्थितानां संस्कृतपाठशालानां मध्ये काममपि विशिष्टां स्थितिं भजतेतरामिति नात्र गर्वोक्तिः ।

महन्तस्वामिश्रीमद्रामप्रकाशसंसेवितप्राचीनावधूतमण्डलाश्रमसंरक्षणसंपोषितस्यास्य महाविद्यालयस्य नवनवसौविध्यप्रदानतत्पराणां सञ्चालकानां मनसि पत्रिकादिप्रकाशनव्यापारः छात्रप्रतिभाविकासमूलकत्वेन कतिपयेभ्यो वर्षेभ्यः पूर्वमेव संकल्पित आसीत् । प्रतिवर्षमेतदर्थमनुष्ठितेऽपि प्रयासे ऐषमो वत्सर एतत्पुण्यकार्यसंपादनस्य सुयोगं लब्धवानिति हर्षास्पदम् । एतत्फलस्वरूपमेव तत्रभवतां भवतां विमलशेमुषीकाणां तत्त्वानुशीलनतत्पराणां सहृदयपाठकानां सेवायां 'ज्ञानदा'नाम्नी पत्रिका सादरं समर्प्यते ।

साम्प्रतिके समये, विमलमतीनां बालकानां बालिकानां च सर्वतोभाविनीं प्रतिभाभिवृद्धिं समाकलयद्भिः शिक्षालयसंचालकैः आविष्कृतेषु बहुविधतादृशसाधनेषु अभिव्यक्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशनसाधनमपरिहार्यस्थानं दधातीति तत्र तत्र विद्यालयेषु भाषणादिप्रतियोगिता लेखादि-प्रतियोगिताः पत्रिकादिप्रकाशनञ्च समायोज्यन्ते । तत्र च बहुविधप्रतिभाप्रकाशनयोगदानेन, प्रायशः समेषां छात्राणामध्यापकानां च सहयोगलाभेन पत्रादिप्रकाशनं नान्यूनं महत्त्व-मादधातीति सुज्ञातमेव शिक्षाक्षेत्रे विचरतां विदुषामन्तेवासिनाञ्च ।

अपूर्वमिदं भाण्डागारजातं मानवहृदयं विविधानां गुणानां शक्तीनां प्रवृत्तीनां च । रचनाप्रधाना सेयं मानवप्रकृतिः स्वसार्थक्यं भजन्ती अन्तःस्थितानां भावानां मनोविकाराणां च अभिव्यञ्जनं सायासमाचरति । अत एव निखिलमानवतासामरस्यमाहृत् देशकालशैलीप्रभेदस-मन्वितमपि कमपि अन्तरभेदं विदधत् अभिव्यक्तिसौन्दर्यं संदधच्च यद्वाग्रूपम् अन्तस्तत्त्वं बहिर्वि-वर्तते, तत्काव्यमिति साहित्यमिति वा निगद्यते । अत एव च साहित्यं व्यावहारिकजीवनाद्भिन्न-मिति मन्वानाः केचन यथार्थज्ञानशून्याः इति विविधशास्त्रालोडनसमर्पितजीवनानां निर्हेतुकसाहित्य-सेवातत्पराणां विदुषां राद्धान्तः । जीवनस्य प्राथमिके काले असंस्पृष्टजगद्द्वन्द्वविकाराणां सहजावाप्तविविधकल्याणगुणानाम् अनेकविधशैलीसमन्विताभिव्यञ्जनसामर्थ्यानां बालकानां बालिकानां च यदि प्रारम्भ एव अन्तर्मन्थनस्य सम्यक्चिन्तनस्य विविधशारीरिकमानसिक-सामर्थ्यप्रकाशनस्य च सुयोगः प्राप्येत, तर्हि कल्याणप्रदायकस्य लोकसरंजकस्य शिवेतरनाशकस्य, नैराश्यकुण्ठादिनिवारणपुरःसरं मनःपरिष्कारकस्य, जीवनसंघर्षे साफल्याय शक्तिप्रदायकस्य च साहित्यस्य निर्माणेन निखिलाऽपि मानवता मङ्गलकारिणी स्यादिति नात्र संदेहलेशः ।

एभिरेव भावनानिचयसंप्रेरितैः अजस्रविद्यादाननिरतैः एतद्विद्यालयनायकैराचरितस्य संकल्पस्य प्रयासस्य च परिणतिरियं पत्रिका । भारतीयसंस्कृतिसंरक्षणमूलकसंस्कृतविद्यादानं कुर्वतो महाविद्यालयस्येयं पत्रिका संस्कृतप्रधानाऽपि राष्ट्रभाषासंवरणमहनीयतामानहृति । अत्र च साहित्यविविधाङ्गसंस्पर्शनस्य, सर्वाङ्गीणताप्रदानस्य, अधुनातनप्रकाशनादिकौशलस्य विहितेऽपि चेष्टिते ज्ञानदेयं विविधविद्यानिपुणानां काव्यरसिकानां नवनवचिन्तनतत्पराणां सुहृत्पाठकानां समीक्षकाणां च हृदये किं स्थानं लप्स्यत इति तत्र त एव प्रमाणम् ।

ज्ञानदाया अस्याः संभृतौ, यथापूर्वमुक्तं श्रीमद्भ्यः स्वामिगोविन्दप्रकाशमहाभागेभ्यः सर्वतः श्रेयोऽस्त्येव, आश्रमस्य विद्यालयस्य चान्येषां नेतॄणां, व्यवस्थापकानां, प्रधानाचार्याणां, समेषां प्राध्यापकानां, कर्मचारिणां, समेषां छात्राणां चान्यूनः श्लाघ्यो योगो विद्यतेतराम् ।

'सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः' इति न्यायेन दत्तेऽपि सम्यगवधानेऽत्र ज्ञाता अज्ञाताश्च त्रुटयः सन्त्येवेति निवेदयन्तो वयं, नीरक्षीरन्यायेन तत्त्वावगाहनतत्पराणां सदय-हृदयाणां साहित्यरसपायिनां ज्ञानदां प्रति सानुग्रहां दृष्टिमभिलषाम इति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

क्रमांकः	विषयः	लेखकः	पृष्ठम्
	सम्मतयः		६ तः १० यावत्
	सर्जन एवं संवर्द्धन (इतिवृत्त)		११ तः १५ यावत्
	संस्कृत-विभागः		
	संस्कृतं तदङ्गानि च		
१	संस्कृतस्य विश्वजनीनत्वम्	आचार्यः पूर्णचन्द्रोपाध्यायः	१७
२	संस्कृतस्य महत्त्वम्	ब्र० आत्मस्वरूपः	१६
३	ज्ञानदां प्रति (कविता)	पद्मप्रसादः सुवेदी	२०
४	व्याकरणस्य महत्त्वम्	लक्ष्मणप्रसादो ज्ञवाली	२१
५	व्याकरणस्य सर्वशास्त्रोपकारकत्वम्	शान्तिदेवी	२२
६	गद्यं कवीनां निकषं वदन्ति	राजेन्द्रप्रसादः किमोठी	२३
७	उपनिषद्विद्या	स्वामी दयानन्दः	२५
	कविता		
८	स्वागतगानम्	शुकदेवदासः शास्त्री	२७
	साम्प्रयिक्यः काश्चन समस्याः		
९	भारतस्य साम्प्रतिकसमस्याः	पशुपतिः भट्टराई	२८
१०	अनुशासनम्	जयभगवान् शर्मा	३०
११	परिवारनियोजनम्	जमुनादत्तो द्विवेदी	३१
१२	बुभुक्षितः किन्न करोति पापम्	भुवनचन्द्रो जोशी 'कः'	३२
१३	नारीस्वातन्त्र्यम्	स्वामी परमप्रकाशः	३३
१४	धर्मनिरपेक्षतायाः तात्पर्यम्	स्वामी चेतनस्वरूपः	३५
१५	सम्प्रति संस्कृतशिक्षाया उपादेयत्वम्	राजाराम उनियालः	३६
	कविता		
१६	ज्ञानदा	भुवनचन्द्रो जोशी 'कः'	३८
	आदर्शभूतानि कानिचिच्चरितानि		
१७	श्रीसन्ततुकारामो महाराजः	ब्र० प्रह्लादः	३९
१८	रघुनाथः शिरोमणिः	चम्पालालः शर्मा	४०
१९	जयति श्रीसुभाषचन्द्रः [कविता]	स्वामी लोकनाथः पुरी	४२
२०	डा० राजेन्द्रप्रसादः	भुवनचन्द्रो जोशी 'खः'	४३
२१	श्रीमती इन्दिरागांधी	श्रीधरः शर्मा	४४
२२	हन्त! राष्ट्रपतिरहमदो दिवंगतः	केदारदत्तो द्विवेदी	४५
	द्वे सांस्कृतिककेन्द्रे		
२३	काशी	ब्र० नारायणः	४६
२४	हरिद्वारम्	टंकराजः पाण्डेयः	४८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षात्मकं किञ्चित्

२५ भारतस्य गौरवम्	ब्र० परमेश्वरः	४६
२६ सहसा विदधीत न क्रियाम्	ब्र० नामदेवः	५०
२७ यद् दृष्टं तन्नष्टम्	जमुनादत्तो बहुगुणा	५२
२८ भारतीया संस्कृतिः	सन्तरामदासः	५३
कथा		
२९ दृष्टिदानम्	शुकदेवदासः शास्त्री	५४
केचन शास्त्रीयाः प्रबन्धाः		
३० शब्दानां ज्ञाने धर्मः आहोस्वित् प्रयोगे	परमानन्दो डुगराकोटी	५७
३१ मायाविचारः	ब्र० विट्ठलः	५६
३२ पुष्पं प्रति (गीतम्)	शुकदेवदासः शास्त्री	६१
३३ रसविमर्शः	खीमानन्दः सती	६२
३४ स्फोटवादविमर्शः	स्वामी हनुमान् शास्त्री	६५
३५ शाङ्करवेदान्ते कर्मणामुपयोगः	स्वामी हरप्रकाशः	६८
३६ काव्यप्रयोजनानि	राजाराम उनियालः	६९
३७ ब्रह्मणः स्वप्रकाशत्वम्	मनसारामः शर्मा	७२
३८ शून्यपदार्थमीमांसा	रामवृक्षः पाण्डेय	७४
सद्योजातम्		
३९ स्वागतं नवशासनस्य	रामरत्नः शास्त्री	७८

हिन्दी-विभाग

तत्त्वचिन्तना

१ दर्शनशास्त्र का स्वरूप	डा० अभेदानन्द	८१
२ अन्तर्द्वन्द्व [कविता]	कृष्णानन्द जोशी	८४
३ धर्म और विज्ञान	देवेन्द्रकुमार	८५
कहानी		
४ एक था ढब्बूमल	ऋषिरामभट्ट	८८
५ लम्बे पैर······ (कविता)	रमेशचन्द्र जोशी	९०
नैतकी		
६ मानव का कर्त्तव्य	राधेश्याम जोशी	९१
७ बुद्ध-अवतरण [कविता]	कौस्तुभानन्द पन्त	९२
८ ज्ञान-किरण	जमुनादत्त बहुगुणा	९३
९ आत्मसंयम	कैलाशचन्द्र जोशी	९४
१० मक्खी और मधुकर	केदारदत्त द्विवेदी	९५
११ मन की एकाग्रता	रामावतारदास	९६
१२ पहेलियाँ	जमुनादत्त द्विवेदी	९७
१३ विद्यार्थी-जीवन	ब्र० कृष्णचैतन्य	९८
१४ सत्यं शिवं सुन्दरम्	स्वामी सत्यप्रकाश	९९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५ मेरी गरीबी (कविता)	नन्दावल्लभ पाण्डेय	१००
१६ मानव-शरीर की महिमा	ब्र० आनन्दचैतन्य	१०१
१७ कर्म का आदर्श	भुवनचन्द्र जोशी 'ख'	१०२
१८ स्वानुभूति (कविता)	मिथिलेशकुमार काण्डपाल	१०३
साहित्यिकी		
१९ रामायण की महत्ता	ब्र० सन्तोष	१०४
२० आज के लोग (कविता)	रमेशचन्द्र जोशी	१०५
२१ कामायनी में जीवन-प्रेरणा	रामरत्न शास्त्री	१०६
एकांकी		
२२ बुद्ध का गृहत्याग	ब्र० आत्मस्वरूप	१०८
कविता		
२३ किसान	सुरेशचन्द्र जोशी	११०
२४ आशा	छविदत्त जोशी	११०
व्यक्ति और कृति		
२५ गुरु दत्तात्रेय	स्वामी बालभारती	१११
२६ महर्षि वेदव्यास	स्वामी हरप्रकाश	११३
२७ ज्ञान ज्ञान (कविता)	ब्र० आत्मस्वरूप	११६
२८ महात्मा कबीर	सन्त दुःखहरणदास	११७
२९ तुलसी का लोकनायकत्व	रामेश्वर सिंह (प्रज्ञाचक्षु)	११९
३० श्री श्री माँ आनन्दमयी	पद्मप्रसाद सुवेदी	१२१
३१ रोटी का टुकड़ा (कविता)	गिरीशचन्द्र पन्त	१२३
कहानी		
३२ नट और खट	केदारदत्त पाण्डेय	१२४
कविता		
३३ विदाई	विष्णुदत्त गोस्वामी	१२५
विविधा		
३४ माँ का प्यार	राकेशमोहन शर्मा	१२६
३५ दहेज-प्रथा	केदारदत्त पाण्डेय	१२७
३६ धर्म (कविता)	सांई दास वर्मा	१२८
३७ आवाज की खोज	ललितमोहन जोशी	१२९
३८ विद्या धन से श्रेष्ठ है	स्वामी सन्तोषदास	१३०
३९ गंगा की गोद में	नागेन्द्रकुमार पाण्डेय	१३१
४० शैवसिद्धान्त में तत्त्व का स्वरूप: पति	डा० ओंकारानन्द	१३३
कविता		
४१ हमारे गुरुजन	कैलाशचन्द्र जोशी	१३५
विद्यालय के विविध विवरण		**१३७ से १४४**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ज्ञानदा' विषये सन्देशः, आशीर्वचांसि सम्मतयश्च

श्रीमतां श्यामनारायणमेहरोत्रामहोदयानाम्
उत्तरप्रदेशशिक्षानिदेशकपदमलङ्कुर्वतां

सन्देशः

मुझे यह जानकर प्रसन्नता हुई कि आपकी शिक्षा-संस्था ने इस वर्ष अपनी पत्रिका प्रकाशित करने का निश्चय किया है।

विश्वास है कि हमारे तरुण छात्र पत्रिका में संकलित सामग्री के माध्यम से विद्यालय की झाँकी प्रस्तुत करेंगे, जो अन्य शिक्षा-संस्थाओं के छात्रों के लिए आदर्शरूप होगी।

आशा है, पत्रिका में प्रकाशित सामग्री छात्रोपयोगी एवं सुरुचिपूर्ण होगी।

मैं प्रयास की सफलता-हेतु अपनी शुभकामना व्यक्त करता हूँ।

श्यामनारायण मेहरोत्रा
शिक्षा निदेशक, उत्तरप्रदेश

गुरुकुल-कांगड़ी-विश्वविद्यालयस्योपकुलपतीनां
श्रीमतां रघुवीरसिंहशास्त्रिमहाभागानां

शुभकामना

श्रीमन्तः !

महान् प्रसन्नताया अयं विषयो यत् श्रीमन्तः 'ज्ञानदा' पत्रिकां प्रकाशयन्ति। एतत्साफल्याय अस्माकं शुभाशीर्वचांसि स्वीकुर्वन्तु तत्रभवन्तो भवन्तः।

'ज्ञानदा' पत्रिका नाम्नैव प्रतीयते यदियं छात्राणां विदुषां च कृते लाभप्रदा कल्याणप्रदा च भविष्यति।

शुभाकांक्षी
रघुवीरसिंहः शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरप्रदेशीयसंस्कृतपाठशालानां निरीक्षकपदमलंकुर्वतां
श्रीमताम् उमाशङ्करमिश्रमहाभागानां

सन्देशः

इदन्तावन्नाविदितचरं तत्त्वजिज्ञासूनां विमलशेमुषीप्रथितयशसां निखिलविद्याजुषां विदुषां यद्विशेषसारभूततत्त्वप्रतिपिपादयिषया प्रवृत्तानि सकलान्यपि सकलानि साहित्यिक-कार्यजातानि अमन्दानन्दवृष्टिसृष्टिं जनयन्ति, विशेषतश्च सामयिकसुव्यवस्थितपत्रिकादि-प्रकाशनव्यवसायः ।

प्रान्तीयसंस्कृतमहाविद्यालयेषु लब्धप्रतिष्ठो भवतां महाविद्यालयो विपुलसाहित्यिक-सामग्रीविभूषितां विविधविबुधजनसुगीतां गीतामिव ज्ञानदां ज्ञानदां पत्रिकां प्रकाशयतीति मोमुदीति चेतः, अहममुष्याः सर्वतोभाविनीं प्रगतिं प्रसृतिञ्चाभिलषन्, प्रकाशकप्रबन्धक महोदयेभ्यो निजां शुभकामनां प्रेषयामि, पत्रिकाया गुणास्तदीयपरिशीलनेनाविर्भविष्यन्तीति कृतं तत्र भूरिभाषितेनेति शुभाशंसन् विरमामि ।

शुभैषी
उमाशंकरमिश्रः

श्रीमतां बलूनीत्युपाह्वनारायणप्रसादमहोदयानां
सहारनपुरजनपदीयविद्यालयानां सहनिरीक्षकाणां

शुभकामना

विद्वद्वरेण्याः !

विद्यालयस्य द्वादशवर्षपूर्तिमुपलक्ष्य भवन्तः "ज्ञानदां"नाम पत्रिकां प्रकाशयितुमुपक्रमन्त इत्यवगम्य मोमोत्ति मे मानसम् । पत्रिकायामस्यां कामपि स्वकीयरचनां प्रकाशयितुं समुत्सुकोऽपि समयाभावात् तथा कर्त्तुमक्षमः क्षन्तव्यः। भवतां 'ज्ञानदा' संस्कृतानु-रागिभ्यो ज्ञानं ददती भूयादन्वर्थनामेति कामये ।

बलूनीत्युपाह्वो नारायणप्रसादः
सहारनपुरवास्तव्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेरठक्षेत्रीय-संस्कृतपाठशालानां सहायकनिरीक्षकमपदमलंकुर्वतां
श्रीमतां मुरलीधरकोठियालमहाभागानां

शुभकामना

श्रीहरिद्वारस्थप्राचीनावधूतमण्डलाश्रमासीनः श्रीभगवान्दाससंस्कृतमहाविद्यालयः स्वीयासाधारणपठनपाठनानुशासनादिसुव्यवस्थाभिः प्रान्तीयसंस्कृतमहाविद्यालयेषु विशिष्टां भूमिकां निर्वहन् कामप्यञ्चितां सर्वश्रेष्ठतां व्यनक्ति ।

स च स्वद्वादशवार्षिकपूर्त्यवसरे ऐषमो वत्सरे छात्रसार्थोपकारिणीमन्वर्थनाम्नीं ज्ञानदां संस्कृतपत्रिकां प्रकाशयतीति विचिन्त्य जरिहृषीति चेतः । वस्तुत ईदृशैरेवोपायैर्गीर्वाग्वाण्याः प्रचारः प्रसारश्च कर्तुं शक्यः ।

प्रयासोऽयं भवतां सफलो भवेदिति जगन्नियन्तारं नितरां प्रार्थये । पत्रिकाप्रकाशकेभ्यः प्रबन्धकेभ्यश्चैतदर्थं शतशो धन्यवादान् वितरामि ।

शुभाशंसकः
मुरलीधरः कोठियालः

गुरुकुल-कांगड़ी-विश्वविद्यालयस्य कुलसचिवानां श्रीमतां बलजीतसिंहमहोदयानां

सम्मतिः

श्रीमन्तः !

छात्राणां सर्वाङ्गीणो विकासः शिक्षाया मुख्यं लक्ष्यं भवति । पन्थानममुमनुसरन्तो भवन्तः छात्राणामभिव्यक्तिसामर्थ्यवर्द्धनाय "ज्ञानदा" नामिकां पत्रिकां प्रकाशयन्तीति ज्ञात्वा महान् खलु हर्षः समजायत मे मनसि । पत्रिकायाः साफल्याय शुभकामनामहं प्रेषयामि ।

आशासे, पत्रिकेयं छात्राणां विदुषाञ्च हृदयहारिणी भवेदिति ।

भावत्कः
बलजीतसिंह आर्यः

डॉ० विष्णुदत्त जी राकेश, उपाध्याय–हिन्दी विभाग, गुरुकुल कांगड़ी विश्वविद्यालय की

अनुशंसा

श्री भगवानदास संस्कृत महाविद्यालय, हरिद्वार की वार्षिक पत्रिका "ज्ञानदा" के प्रकाशन का समाचार मेरे लिए सुखद है। संस्कृत-भाषा के माध्यम से प्राचीन भारतीय साहित्य, दर्शन एवं संस्कृति के विविध पक्षों पर आधुनिक परिप्रेक्ष्य में यदि मौलिक चिन्तन इस पत्रिका के द्वारा उपलब्ध हो सका, तो पत्रिका सार्थक होगी।

महाविद्यालय के व्यवस्थापक और पत्रिका के सम्पादक हार्दिक बधाई के पात्र हैं। इस व्यावसायिक लाभ के युग में पत्रिका-प्रकाशन जैसा घाटे का दायित्व संभालना मिशनरी स्प्रिट का परिचायक है।

पत्रिका की प्रगति के लिए मेरी अनेक मङ्गलकामनाएं।

विष्णुदत्त 'राकेश'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महन्त स्वामी श्री रामप्रकाश जी महाराज

व्यवस्थापक — प्राचीन अवधूत-मण्डल-आश्रम हरिद्वार

स्वामी श्री गुरुचरणदास जी महाराज

अध्यक्ष — भारत साधु समाज

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यालयस्यास्याध्यक्षचरणानां भारतसाधुसमाजस्याध्यक्षपदमलङ्कुर्वताञ्च देशविदेशविश्रुतानां यतिवर्याणां श्रीमत्स्वामिगुरुचरणदासमहाभागानाम्

आशीर्वचनम्

भगवानदाससंस्कृतमहाविद्यालयः 'ज्ञानदा'नाम्नीं पत्रिकां प्रकाशयितुं तत्पर इति मदर्थमप्रवृद्धानन्दस्य विषयः । अस्माकं विद्यालयस्य छात्राः सुयोग्याः भाषणादिपटवः चरित्र-निष्ठाः अनुशासनप्रियाश्च भवन्तु, इति मदीया काऽपि हार्दिकी भावना । एतदर्थमहं प्रत्यहं चिन्तयामि प्रयते च । पत्रिकामाध्यमेन छात्राणामध्यापकानामन्येषां च विदुषां योग्यताया विद्वत्तायाश्च प्रदर्शनं भविष्यतीति मन्ये ।

प्रयत्नोऽयं नूनं सफलो भूयादिति कामये—

स्वामी गुरुचरणदासः

विद्यालयस्यास्य कर्णधाराणां श्रीमतां स्वामिगोविन्दप्रकाशमहाभागानाम्

शुभकामना

"ज्ञानदा" पत्रिका के प्रकाशन करने का शुभ संकल्प लिया गया है, यह बहुत उत्तम विचार है। भारतीय संस्कृति आदिकाल से ही ज्ञान को प्रधानता देती आई है–**"ज्ञानेन हीनाः पशुभिः समानाः"** । ज्ञान ही एक ऐसा तत्त्व मनुष्य में है, जो उसको परमात्मा की सारी सृष्टि में सर्वोत्कृष्ट घोषित करता है । ज्ञान से बढ़कर मनुष्य को पवित्र करनेवाला कोई वस्तु नहीं है । पृथ्वी, जल आदि तत्त्व मनुष्य को अस्थायी रूप से पवित्र करते हैं, किन्तु ज्ञान सदा-सदा के लिए पवित्र कर डालता है–**"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते"** ।

ऐसे महत्त्वशाली ज्ञान को देने वाली 'ज्ञानदा' पत्रिका का प्रकाशन कर आप और आपका विद्यालय वस्तुतः धन्यवाद के पात्र हैं ।

मेरी और स्वामी हंसप्रकाश जी की यही शुभ कामना है कि इस ज्ञान का प्रचार-प्रसार शनैः-शनैः सारे भारतवर्ष में फैल जाये, जिससे मनुष्य अपने वास्तविक स्वरूप को पहचान सके ।

स्वामी गोविन्दाप्रकाश

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानदा

(१)

विश्वेषां वै भवति हि निजा श्रेयसी मानवानाम्,
प्राणेभ्यश्चाधिकहिततमा संस्कृतिर्बद्धमूला ।
तस्याः शस्या भवतु विततिर्वीक्ष्य विद्यालयेन,
मन्ये ध्यातोऽधिकतरहितः पत्रिकायाः प्रकाशः ॥

(२)

सेत्थं लीलाजनितजगतः श्रीविशालस्य भूम्नः,
दृष्टेर्लक्ष्या सुजनपुरतः काममाविर्भवन्ती ।
प्रज्ञाभारैः परममहितैर्ज्ञानदा मानवानाम्,
उक्तीनां वं विलसतुतरां वैजयन्ती सतीनाम् ॥

(३)

आनन्दानाममितकवितोद्भासितानां सवित्री,
छात्राणां वै कुमुदमनसां बोधने चन्द्रमूर्तिः ।
विख्यातानां सुकचिवसां स्वागतायोल्लसन्ती,
निर्धूताधिप्रकरनिकरा ज्ञानदा(ऽ)ज्ञानदा स्यात् ।

(४)

सेयं मान्या शुकपिकनुता भाषणे भासमाना,
श्रीगोविन्दप्रकथिततया गीतया तुल्यमाना ।
रामस्येयं हनुमदुदिता कीर्तिमाला विशाला,
सर्वेषां नो गुरुचरणदा ज्ञानदा(ऽ)ज्ञानदा स्यात् ॥

—**मनसारामशर्मा**
प्रधानाचार्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारत-सरकार के शिक्षा-मन्त्रालय द्वारा निर्धारित आदर्श-संस्कृत-पाठशाला-योजना के अन्तर्गत महाविद्यालय को लेने के सम्बन्ध में नियुक्त

निरीक्षक-मण्डल के सदस्यों की सम्मति

श्री सी० आर० स्वामीनाथन्
सहायक शिक्षा-सलाहकार (संस्कृत)
शिक्षा एवं समाज-कल्याण मन्त्रालय, भारत-सरकार।

'निरीक्षतोऽयं विद्यालयः, यत्र अध्यापकाः छात्राश्च विद्याव्यसनिनः वर्तन्ते। अस्य विद्यालयस्य उत्तरोत्तरामभिवृद्धिं कामये इति।'

ह० सी. आर. स्वामीनाथन्
१४. ३. ७७

डा० रसिकविहारी जोशी
संस्कृत-विभागाध्यक्ष—दिल्ली विश्वविद्यालय, दिल्ली।

'अद्य खलु भगवानदाससंस्कृतमहाविद्यालयमवलोक्य, अत्रत्यैः प्राध्यापकैः संस्कृतमधीयानैश्च छात्रैः सह वार्तालापं विधाय नूनं सञ्जायते ममान्तःकरणे कोऽप्यमदानन्दसन्दोहः। मन्ये विद्यार्थिभिः संस्कृतभाषणे शास्त्रेषु चाधिकाधिको यत्नो विधीयताम्। विद्यालयस्योत्तरोत्तरसमुन्नतये अखिलब्रह्माण्डनायकं नन्दनन्दनं भगवन्तं श्रीकृष्णचन्द्रं साञ्जलिबन्धं प्रार्थये।'

ह० रसिकविहारी जोशी
१४. ३. ७७

श्री जे० एल० विश्वनाथन्
वित्तविभाग–शिक्षा एव समाज-कल्याण मन्त्रालय, भारत सरकार।

This institution deserves the support of the Govt. of India.

Sd/J. L. Vishwanathan.
14. 3. 77

श्री अमीरचन्द शास्त्री
उप-प्राचार्य—श्री लालबहादुर संस्कृत विद्यापीठ, दिल्ली।

''भगवानदाससंस्कृतविद्यालयमेतमालोक्य।
कमपि प्रमोदभरमहमन्तरविन्दं विदत्सु विद्वत्सु।।

ह० अमीरचन्दः शास्त्री
१४. ३. ७७

CC-0. In Public Domain. Gurukul Kangri Collection; Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्जन एवं संवर्द्धन

— ० —

प्राच्य एवं प्रतीच्य, दोनों प्रकार के शिक्षा-शास्त्रियों ने एकमत हो यह स्वीकार किया है कि शिक्षा का सर्वप्रमुख उद्देश्य—"संस्कृति का संरक्षण, संक्रमण एवं संवर्धन है।" प्रत्येक राष्ट्र उपरिलिखित प्रक्रिया को अपनाकर अपनी राष्ट्रीय अथवा देशीय संस्कृति का समुत्थान करता चलता है। स्वातन्त्र्योपलब्धि के पश्चात् अपनी भारतीय संस्कृति को उत्तरोत्तर संरक्षित, संक्रमित एवं संवर्धित करते चलना हम भारतवासियों का पहला कर्तव्य है। इस कर्तव्य के परिपालन का एकमात्र माध्यम संस्कृत-शिक्षा ही है। क्योंकि यह सर्वमान्य तथ्य है कि प्रत्येक देश अथवा राष्ट्र की अपनी मूल सभ्यता एवं संस्कृति उसकी मूल-भाषा तथा उसके आदिसाहित्य में ही सन्निहित होती है। उदाहरणार्थ, यदि हम पाश्चात्य राष्ट्रों की संस्कृति को समझना चाहें, तो हमें क्रमशः ग्रीक, लैटिन तथा फ्रेंच भाषाएं सीखकर उनमें लिखित साहित्य का अध्ययन करना होगा। ठीक इसी प्रकार भारतीय संस्कृति के प्रचार-प्रसार के लिये वेद, उपनिषद्, पुराण, दर्शनशास्त्र, धर्मशास्त्र, गीता, रामायण, महाभारत एवं अन्यान्यविषयक अनेकानेक संस्कृत-ग्रन्थों का अध्ययन-अध्यापन नितान्त आवश्यक है।

प्रसिद्ध शिक्षाशास्त्री हरबर्ट ने चरित्र-निर्माण को शिक्षा का प्रमुख उद्देश्य माना है। मनुस्मृति में चरित्र-शिक्षा पर पहले ही प्रकाश डाला जा चुका है :—

'एतद्देशप्रसूतस्य, सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥'

भारत में पाश्चात्य शिक्षा पद्धति के अन्धानुकरण से छात्रों में चरित्रहीनता एवं अवैध दुराचार की जो महामारी फैलती जा रही है और जो वर्तमान-शिक्षा अधिकारियों के लिये सरदर्द का विषय बन गयी है, उसके निदान का एकमात्र साधन संस्कृत-शिक्षा ही है।

राष्ट्रपिता महात्मा गांधी ने स्वस्थ शरीर में स्वस्थ मन के विकास को ही शिक्षा माना है। (Educatian is the development of sound mind in sound body).

संस्कृत-शिक्षा से एक ही साथ इन दोनों की समुपलब्धि हो जाती है। यदि हमारी सरकार और हम भारतवासी एक साथ मिल कर संस्कृत-शिक्षा के पुनरुद्धार में तन-मन-धन से सहयोग दें, तो निस्सन्देह भारतीय इतिहास के रिक्त पृष्ठों पर स्वर्णयुग की उपाधि फिर से लिखी जा सकेगी। स्मरणीय है कि गुप्त साम्राज्य का स्वर्णयुग भी संस्कृत-शिक्षा के भव्य उत्कर्ष का युग था। आधुनिक युगीय शिक्षोद्देश्य की सबसे घातक बीमारी यह है कि उसने जीविकोपार्जन - बनाम 'सर्विस' को ही शिक्षा का एकमात्र लक्ष्य मान रखा है। जीविकोपार्जन के अतिरिक्त आत्मोत्कर्ष की दृष्टि से भी संस्कृत-शिक्षा का महत्त्व सर्वोपरि है। महाकवि कालिदास ने तो केवल जीविकोपार्जन के हेतु शिक्षा प्राप्त करने वालों की कटु भर्त्सना की है :—

"यस्यागमः केवलजीविकायै, तं ज्ञानपण्यं वणिजं वदन्ति।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् जो केवल जीविका के लिए शिक्षा प्राप्त करते हैं, वे ज्ञान बेचने वाले बनिये हैं, शिक्षित या विद्वान् नहीं। अतएव भारतीय शिक्षाशास्त्री विद्या या शिक्षा की कल्पना ज्ञान के लिए करते हैं :—

"विद्या ज्ञानाय कल्पते।"

श्रीअवधूतमंडलाश्रमः—१८वीं शताब्दी में महान् तपस्वी श्री १०८ सद्गुरु आचार्य श्री बाबा सरजूदास जी महाराज ने अपना प्रचार का क्षेत्र पूर्वी पंजाब को चुना। पटियाला के आसपास की भूमि को अपनी तपस्या से पुनीत कर डाला। एक दिन वह आया जबकि पटियाला नरेश ने आचार्य-चरणों में झुक कर सेवा का अवसर प्रदान करने की याचना की। फलस्वरूप नरेश ने महाराजश्री के श्रीचरणों में एक हजार बीघा जमीन प्रदान की। आचार्यश्री की परम्परा में अवधूत बाबा ब्रह्मदास जी तथा बाबा हीरादास जी महाराज का स्थान चन्द्र-सूर्य की तरह स्थापित हो चुका है। इन दोनों महापुरुषों ने जनता के कल्याण के लिए पश्चिम पाकिस्तान में स्थित झंग मघियाना को अपना क्षेत्र बनाया। बाबा ब्रह्मदास जी की तपःपूत भावना, आचरणशीलता और जनता के दुःख दर्द को दूर करने वाली मनोवृत्ति का यशोगान आज भी पाकिस्तान से आये हुए बाबा जी के भक्तमण्डल करते हैं।

महापुरुष दीर्घद्रष्टा हुआ करते हैं। काल के परदे को हटा कर भविष्य और अतीत का ज्ञान करना उसके लिए सुकर हो जाता है। बाबा जी की इसी तीक्ष्ण दृष्टि से यह काल की लीला ओझल न हो सकी और उन्होंने काल को चुनौती देते हुए, उसकी छाती में कील गाड़ते हुए भगवती भागीरथी के तट पर हरिद्वार से दो मील दूर एक विस्तृत आश्रम की स्थापना की। इस आश्रम का नामकरण-संस्कार हुआ "श्री अवधूत-मण्डल-आश्रम।" आज भी यह आश्रम पंचपुरी के समस्त आश्रमों में अपना अनोखा स्थान बनाये हुए है। इसकी प्राचीनता तथा विशालता और इसके संचालकों की सेवा-भावना ने इस आश्रम को चार चाँद लगा दिये हैं। बाबा ब्रह्मदास जी महाराज के सुयोग्य उत्तराधिकारी बाबा शिवरामदास जी महाराज वस्तुतः नामोचित गुण वाले थे। जहाँ वे राम के अनन्य भक्त थे, वहाँ वे कैलास-वासी आशुतोष भगवान् शंकर को अपनी अर्चना-वन्दना से पूजित किया करते थे। श्रीमद्-भागवत एवं रामायण के परमप्रेमी और आश्रम में अधिक से अधिक ब्राह्मण तथा साधु विद्यार्थी को संस्कृत पढ़ने-पढ़ाने के लिए प्रोत्साहित करते रहते थे। बाबा शिवरामदास जी महाराज बड़े ही कर्मठ, निर्भीक तथा यथार्थवादी थे। उनकी हार्दिक इच्छा थी कि आश्रम में प्राचीनता तथा अर्वाचीनता का सम्मिश्रण करने वाला एक विद्यालय होना चाहिए। किन्तु विधाता को यह स्वीकार नहीं था।

अल्पायु में ही उनका शरीर शान्त हो गया। लेकिन क्या महापुरुषों का संकल्प व्यर्थ जाता है?

बाबा शिवचरणदास जी महाराज ने अपने आश्रम के प्रबन्ध-काल में अनेक सुयोग्य शिष्यों का निर्माण किया। जिनमें से अवधूत मण्डल आश्रम के वर्तमान महन्त स्वामी रामप्रकाश जी महाराज भी हैं। महाराजश्री की आश्रम के प्रति हितकारिणी भावना किसी से भी छिपी नहीं है। आश्रम की सेवा करते हुए अपने स्वत्व का जितना अंश मिले, उसी में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ही सन्तुष्ट रहना, यह एक ऐसी विशेषता महन्त जी महाराज में पायी जाती है, जो और महन्तों से एक विशिष्ट स्थान दिलाती है। आश्रम की सम्पत्ति को कभी भी महाराजश्री ने अपनी सम्पत्ति नहीं समझी, बल्कि जनता की ही सम्पत्ति समझी। जनता की सम्पत्ति के संरक्षक के रूप में ही महाराजश्री ने सदैव अपने को प्रस्तुत किया। आश्रम को उन्नति के शिखर पर पहुँचाने का कार्य तथा बाबा शिवरामदास जी महाराज के विद्यालयीय संकल्प को साकार किया—आचार्य त्यागमूर्ति स्वामीश्री गुरुचरणदास जी महाराज ने। पूज्यपाद स्वामी गुरुचरणदास जी महाराज सही अर्थों में गुरु के चरणों के दास हैं। इसलिए अपने पूज्य गुरुदेव बाबा शिवरामदास जी महाराज के संकल्प को उन्होंने पूर्ण किया। प्रारम्भ से ही आचार्यश्री का जीवन शास्त्र तथा शस्त्र में ढल चुका है। उनकी शास्त्रानुकूल कल्पना के आगे नास्तिकों के पैर लड़खड़ा जाते हैं। उनकी त्यागमयी भावना तथा सदाचारितामय जीवन के सन्मुख आज सारा राष्ट्र नतमस्तक है। उन्होंने जीवन में देना ही सीखा है, लेना नहीं। ऐसे महापुरुष को प्राप्त करके अवधूत मण्डल आश्रम गौरव का अनुभव करता है। आश्रम का सदैव यही दृष्टिकोण रहा है कि भारतीय संस्कृति तथा सभ्यता के प्रचार-प्रसार करने वाले साधु-समाज को इस आश्रम में शिक्षा मिलनी चाहिए। इसी बात को लक्ष्य करके ही आचार्यश्री ने अखिल भारतीय साधु समाज का अध्यक्ष बनना स्वीकार किया था। अवधूत मण्डल आश्रम ने जहाँ स्वामी गुरुचरणदास जी महाराज जैसे मिलनसार-मधुरभाषी, सर्व सम्प्रदायों के अनुयायियों के दिल में स्थान प्राप्त करने वाले महापुरुष हमें प्रदान किये, वहाँ वेदान्ताचार्य, स्वर्णपदकत्रयविजयी, गीता के कर्मयोग को आमूल जीवन में उतारने वाले स्वामीश्रीगोविन्दप्रकाश जी महाराज, परमाध्यक्ष रामतीर्थ मिशन राजपुर–देहरादून जैसे रत्न को भी दिया है। जिनका जीवनव्रत है :—

"कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।"

परमाध्यक्ष जी ने न केवल गीता का कर्मयोग ही जीवन में उतारा है, बल्कि वे गीताकार का राजनैतिक जीवन भी जीवन में पचा चुके हैं। अपनी अलौकिक सूझबूझ के कारण वे अवधूत मण्डल आश्रम तथा ब्रह्मनिवास आश्रम, वृन्दावन और मिशन जैसी तीन तीन संस्थाओं के सफल संचालक सिद्ध हुए हैं।

विद्यालय का सूत्रपात:—इस प्रकार रत्नत्रयी के परिश्रम में दिनप्रतिदिन आश्रम की उन्नति देखकर आश्रम के प्राचीनतम अनन्य सेवक स्वर्गीय लाला भगवानदास जी कत्याल दिल्ली निवासी ने अपनी सम्पत्ति का कुछ अंश आश्रम की सेवा के रूप में प्रस्तुत करने की जिज्ञासा प्रकट की। पूज्यपाद स्वामीश्री गुरुचरणदास जी महाराज तथा परमाध्यक्ष स्वामीश्री गोविन्दप्रकाश जी महाराज ने सुझाव दिया कि आप अपनी दी हुई धनराशि का विद्यालय का निर्माण करके सदुपयोग कर सकते हैं। लाला जी ने इस प्रस्ताव को सहर्ष स्वीकार कर लिया और निवेदन किया कि विद्यालय का नाम बाबा ब्रह्मदास जी महाराज के नाम से ब्रह्मदास संस्कृत महाविद्यालय रखा जाय, किन्तु परमाध्यक्ष जी महाराज का कहना था कि विद्यालय का नाम भगवानदास संस्कृत महाविद्यालय रखा जाय। इससे लाला जी की आने वाली सन्तान को इस बात का अनुभव होगा कि मानव-जीवन का कर्तव्य क्या ? है यह शिक्षा हम अपने स्वर्गीय पिता के आचरण तथा कर्तव्य से ग्रहण कर सकते हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाला जी का समग्र जीवन सहज भक्ति, सेवापरायणता एवं मानवीय उदारता तथा करुणा के उदात्त गुणों से सराबोर रहा है। यद्यपि लाला जी की कर्मठता का श्रीगणेश सामान्य परिस्थिति के मध्य में होता है, तथापि शनैः शनैः अपनी अथक परिश्रमशीलता, सामाजिक सूझ-बूझ एवं परब्रह्म परमेश्वर की सहज अनुकम्पा से स्वर्गीय लाला जी एवं उनके परिवार की गणना आज सुयोग्य नागरिकों में होती है। किन्तु लाला जी के महान् व्यक्तित्व की सबसे बड़ी विशेषता यह रही है कि वे धनाढ्य सेठ हो जाने पर भी पहले की तरह निरभिमान, सन्तसेवी एवं उदारमना महामानव बने रहे। उन्होंने अपने जीवन-काल में अपने परिवार, समाज तथा देश के उन्नयन के लिए जो बहुविध प्रयत्न किये हैं, एक सामान्य व्यक्ति नहीं कर सकता। यह उनकी कर्मठता एवं उद्योगपूर्ण पुरुषार्थ का ही मीठा फल है। व्यवसाय के क्षेत्र में भी उन्होंने जो अप्रत्याशित समुन्नति की, वह उन्हें सहर्ष 'पुरुषसिंह' की उपाधि से विभूषित करती है :—

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।"

उदारता एवं दानशीलता की दिशा में भी वे सदैव अग्रणी रहे।

महाविद्यालय की स्थापना और विकास : — भगवानदास पब्लिक ट्रस्ट, दिल्ली के अध्यक्ष, जैसा कि ऊपर संकेत किया गया, इन्हीं लाला भगवानदास कत्याल की सदिच्छा और स्वामी श्री गुरुचरणदास जी महाराज एवं स्वामी श्री गोविन्दप्रकाश जी महाराज की प्रेरणा तथा सहयोग के फलस्वरूप ११ अक्टूबर सन् १९६४ ई० को महाविद्यालय की स्थापना का शुभ संकल्प लिया गया था, सामान्य रूपरेखा तय की गई थी और दिनांक १३ अप्रैल सन् १९८५ ई० को महाविद्यालय की हरिद्वार में स्थापना की गई, जिसकी पुष्टि दिनांक २४-४-६५ की प्रथम बैठक में दिल्ली में हुई। उसी दिन नियमावली भी तैयार की गई तथा लाला भगवानदास जी ने धनराशि की व्यवस्था की। दिनांक १७-११-१९६५ ई० से महाविद्यालय का पंजीकरण हुआ तथा संस्कृत-विश्वविद्यालय, वाराणसी ने प्रथमतः वर्ष १९६६ ई० में उत्तरमध्यमा की अस्थायी मान्यता प्रदान की। अनन्तर क्रमशः शास्त्री और आचार्य की अस्थायी मान्यता प्राप्त होते हुए अन्ततः व्याकरण, वेदान्त और साहित्य विषयों में आचार्य तक की स्थायी मान्यता प्राप्त हुई है। उत्तरप्रदेश के तात्कालिक संयुक्त शिक्षा-सचिव श्री पृथ्वीनाथ जी चतुर्वेदी के आदेश दिनांक १४ मार्च, १९६७ ई० द्वारा इस महाविद्यालय को प्राथमिक अनुदान के साथ शासकीय मान्यता प्राप्त हुई। महाविद्यालय उत्तरप्रदेश शासन की वर्गीकरण-योजना के अन्तर्गत १ जुलाई सन् १९६९ ई० से द्वितीय श्रेणी ('ख' वर्ग) में और १ जुलाई सन् १९७३ ई० से प्रथम श्रेणी ('क' वर्ग) में वर्गीकृत हुआ। सम्प्रति शासन द्वारा प्रधानाचार्य सहित १० पद अनुमोदित हैं तथा निरन्तर अनुदान मिलते आ रहे हैं और विद्यालय दिनानुदिन उन्नति की ओर अग्रसर है।

आदर्श-पाठशाला-योजना:—केन्द्रीय-शिक्षा-मन्त्रालय ने प्रत्येक प्रान्त में कुछ संस्कृत-विद्यालयों को 'आदर्श-संस्कृत-पाठशाला' का रूप देने का निर्णय किया है, जिसके अन्तर्गत आने पर अध्यापकों के वेतन आदि का उन्नयन पोस्टग्रेजुएट डिग्री कालेज के समकक्ष हो जायेगा। इस सम्बन्ध में केन्द्रीय निरीक्षक-मण्डल विद्यालय का निरीक्षण कर चुका है और शुभ दिन की उत्कण्ठापूर्ण प्रतीक्षा की जा रही है। ❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामी श्री गोविन्दप्रकाश जी महाराज
परमाध्यक्ष– स्वामी रामतीर्थ मिशन, राजपुर देहरादून



स्वामी श्री हंसप्रकाश जी वेदान्ताचार्य, एम० ए०
महामन्त्री—स्वामी रामतीर्थ मिशन राजपुर, देहरादून

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य विश्वजनीनत्वम्

– आचार्यः पूर्णचन्द्रोपाध्यायः
प्रधानाचार्यः– श्री गोरक्षनाथ-संस्कृत-विद्यापीठस्य गोरक्षपुरीयस्य

*

सर्ववाङ्मयमूर्धन्ये संस्कृतवाङ्मये निबद्धानां मानवजीवनोपयोगिनां रहस्यमयानां वस्तूनां प्रचुरतां वीक्ष्य विश्वमानवसमक्षे इदं निःशङ्कं कथयितुं शक्यते यत् संस्कृतं विश्वजनीनमस्तीति। विश्वेभ्यो जनेभ्यो हितं विश्वजनीनम्। संस्कृतं हि विश्वमानवानां हितं करोति। विशालेऽस्मिन् भूमण्डले कुत्रापि मनुष्यत्वावच्छिन्नो मनुष्यो जन्म लभतां नाम, तं सर्वमपि मनुष्यं संस्कृतवाङ्मयं मातेव रक्षति, पितेव हिते नियुङ्क्ते। अत्र संस्कृते नास्ति प्रादेशिकतारूपो दैशिकतारूपो वा दोषलेशोऽपि। अत्रैव संस्कृते विश्वबन्धुत्वस्य अमोघा गुणाश्च सन्ति, संस्कृतं सालकानां बालकानां सर्वाङ्गशरीरपोषकं स्तन्यम्, विवेकान्धानां यूनां सच्चरित्रसिद्धजीवनदो जीवातुः, प्रपञ्चपरायणानां वृद्धानां जीवन-मृत्युविनाशकं परमास्त्रम्। ऐहलौकिकं पारलौकिकं वा वस्तु किं नास्ति संस्कृते ? विवेकशून्या द्विपादोऽपि चतुष्पाद्बुद्धिका दानवा इव संस्कृतं निन्दन्ति उपहसन्ति च। हन्त ! संस्कृतकामधेनुनिन्दकाः संस्कृतकल्पवृक्षोपहासका अधःपतिष्णवो मानवास्ते निर्भाग्या एव अमूल्यं वस्तु त्यक्त्वा गुञ्जाग्राहिण एव, नात्र मन्दप्रज्ञोऽपि सन्दिग्धे।

"संस्कृतं नाम दैवी वाग्, अन्वाख्याता महर्षिभिः"। देवशब्देनात्र दैवगुणयुक्ता इन्द्रादयो देवाः, परिपक्वविचारा जगच्चिन्तकाः कारुणिका मनीषिणश्च गृह्यन्ते। एतादृशा जगद्धितचिन्तका महामानवाः सर्वत्र देशेषु कोटिसङ्ख्यासु विरला एव जायन्ते। परन्तु सदैव विश्वबन्धुत्वस्य पाठपाठके विश्वगुरौ अत्र भारते तादृशा महामानवा विश्वविभूतयो बहवो जाता जायन्ते जनिष्यन्ते च। नात्र मानवमूर्धन्यस्य प्रतिवर्षं जनयित्र्यां भारतभूमौ कदाऽपि मानवरत्नानां राहित्यं भवेदल्पत्वं वा। भारतभूः सत्पुत्राणामृषिमहर्षीणां लोकोत्तरविद्वत्तायाः साम्राज्यं सर्वत्र प्रसिद्धमेव, यस्मिन् सर्वमपि विश्वं श्रद्धानतं भवति।

हार्दिकानां मनोग्राहिभावानां बहिः प्रकाशनाय संस्कृतं यादृशं विलक्षण साधनमस्ति, न तादृगन्यभाषा। संस्कृतवाङ्मयस्थं माधुर्यं, सौन्दर्यम्, अगाधत्वञ्च अन्यासां विश्वस्य भाषाणां माधुर्यं, सौन्दर्यम्, अगाधत्वञ्च निःशङ्कमतिशेते। अमृतोपमे संस्कृतवाङ्मये स्थितं किंचिन्माधुर्यमिदं स्वदन्तां भावुका वस्तुतत्त्वैकपक्षपातिनस्ते न तु पामरा ज्ञानलवदुर्विदग्धाः **'जायस्व म्रियस्व'** इतिन्यायेन तृतीयस्थानभाग्देश्याः।

पथि पथि शुकचञ्चूचारुरामाङ्कुराणां,
दिशि दिशि पवमानो वीरुधां ह्लासकश्च।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा,
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौन्दर्यस्य अगाधतायाश्चोदाहरणमिदं कं मनुष्यं प्रति चमत्कारं नोत्पादयति ?

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयंहतैः ।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ।।

अस्माकं ज्ञान-विज्ञाननिधयो वेदाः, वेदीयवस्तुव्याख्यातार उपवेदाः, प्रवृत्ति-निवृत्ति-पथप्रदर्शकानि गभीराणि वेदाङ्गानि, तापत्रयनाशकानि रहस्यमयानि दर्शनानि, भौतिकजगद्बोधका इतिहासाः, आध्यात्मिकभौतिकतत्त्वपरिचायकानि पुराणानि, विविधव्यवहारशिक्षकाणि साहित्यानि, माधुर्यादिगुणयुक्तानि संगीतानि, दैनिकव्यवहारोपयोगीनि भौतिक-रासायनिक-कृषि-पशुपालय-वाणिज्यशास्त्राणि,मारण-मोहन-स्तम्भन-समुत्कीलन-समुच्चाटनादि-विलक्षणक्रियाप्रधानानि विविधतन्त्रशास्त्राणि, जीवनरहस्यावेदकानि भौतिकाध्यात्मिकसुख-दानोन्मुखानि जीव-पशु-पक्षि-वनस्पति-खनिज-खगोलायुर्वेदमहाविज्ञानानि, सशारीरिकपुष्टि-प्रशस्तमनोरञ्जनकराणि कामशास्त्राणि, कुटीरोद्योग-मधुमक्षिकादिपालनप्रक्रियोपदेशकानि वृत्तिशास्त्राणि, ग्राम्य-नागरिकलोकसौख्यप्रदानि कला-कौशल-शिल्पशास्त्राणि, विश्वमानवानामभ्युदयनिःश्रेयससाधनानि विश्वमानवसमाजानां सर्वाङ्गव्याख्याकर्तॄणि मनु-याज्ञवल्क्यपराशरादिविविधश्रुतिस्मारकाणि धर्मशास्त्राणि च मानवजीवनस्य जीवातुभूतानि अमूल्यानीमानि शास्त्राणि को नाम विश्वमानव उपेक्षितुं विस्मर्तुं वा शक्नोति ?

एतेषु शास्त्रेषु यावान् यावान् प्रवेशो जायते तावाँस्तावानानन्दातिशयो मिलति, नात्र लेशोऽपि सन्देहस्य। विवेकशीलाः ! पाठकाः ! भवन्तो जानन्त्येव-विशालेऽस्मिन् विश्वे संप्रति संस्कृतवाङ्मयस्थजाज्वल्यमानमानवजीवनोपकारकमर्मस्पर्शितत्त्वोन्मुखाः कियन्तो देशाः सन्ति ? किं विस्मृतं भवद्भिः पञ्चषवर्षपूर्वं राजधान्यां देहल्यां पञ्चाशद्देशानां पारस्परिक-सहयोगेन कृतं विश्वसंस्कृतसम्मेलनम् ?। किं तत्सस्कृतसम्मेलनं विश्वभाषाया जनन्याः संस्कृतभाषायाः सर्वत्र सर्वदा प्रचारप्रसारौ नोपदिशति ? अस्माकं देशस्थाभिः संस्कृतसंस्थाभिः क्रियमाणाऽनवधानता दीर्घसूत्रता च स्वनाशाय स्वसमाजनाशाय च न स्याच्चेत्कस्मै कार्याय सा स्यात् ?

राष्ट्रस्य पुनर्निर्माणकालेऽस्मिन् शुभेऽवसरे सर्वैरपि संस्कृत-संस्कृत्युपासकैरेकस्वरेण मनोवाक्कायैः संस्कृतस्य प्रचार-प्रसारकार्ये मनो देयम् ।

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं, कीर्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां, धेनुं धीराः सूनृतां वाचमाहुः ।।

(उत्तररामचरितम्)

सं श्रुतेन गमेमहि, मा श्रुतेन वि राधिषि ।

(अथर्ववेद १।१।४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य महत्त्वम्

— ब्र० आत्मस्वरूपः
उत्तरमध्यमाप्रथमवर्षीयः

*

संस्कृतं भारतवर्षस्य प्राचीनतमा भाषाऽस्ति, भारतीयसंस्कृतेरुदयस्य प्रतीकं ज्ञान-विज्ञानयोश्च उत्कृष्टो निधिरस्ति। अस्माक प्राचीना ऋषिमुनयः स्वकठोरतपसा सततसाधनया च संस्कृतं पल्लवितवन्तः अस्मै तं मूल्यवन्तं गरिमाणं दत्तवन्तः, यस्य गौरवमयप्रकाशे अस्माकं मस्तिष्क सर्वदा उन्नतं वर्तते। जना इदं "देवभाषा" इतिनाम्ना कथयन्ति। उक्तञ्च—

'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः"।

इदमस्माकं देशस्य सभ्यताया एकतायाश्च विशिष्टं महत्त्वं धारयति। भारतीयजन-जीवनं संस्कृत यथा प्रभावितमकरोत्, न तथा काचिदन्या भाषा। अद्यत्वे इदमस्माकं वाग्व्यव-हारस्य भाषा नाऽस्ति, तथाऽपि अस्माकं जन्मन आरभ्य मृत्युपर्यन्त ये संस्काराः सन्ति, तेषु सस्कृतस्य प्रयोगो भवति। आकश्मीरं कन्याकुमारीपर्यन्तं तत्र एकरूपता वर्तते। वाङ्मयस्य क्षेत्रे संस्कृतमतिविकसितमस्ति। यदि एकैकविषयस्य सूक्ष्ममध्ययनं क्रियेत, तर्हि अन्वेषणकर्तुः समक्षमनेका उपलब्धयो भविष्यन्ति। संस्कृतभाषायाः सर्वे ग्रन्थाः रहस्यपूर्णाः सन्ति। संस्कृतग्रन्थानां निर्माणं दीर्घकालस्य अनुभवेनाऽभूत्। ये ग्रन्थाः मनुष्यान् क्षुद्रव्यक्तित्वादुत्थाप्य विराड्रूपे अवस्थापयन्ति, ये च मानवानां भौतिक-राजनैतिकाध्यात्मिकसमस्यानां समाधानं कुर्वन्ति, तान् एकतायाः सूत्रे च नियोजयन्ति, तेषु समतायाः भावं जागरयन्ति, तथा च सर्वा-ङ्गीणं विकासं कुर्वन्ति, तेषां ग्रन्थानां परिशीलनेन मानवजीवनस्य दिशा मिलति, यया मनुष्यः स्वकर्तव्यपथं गच्छन् उच्चपदं प्राप्नोति।

अस्माकं देशे पं०मदनमोहनो मालवीयः, महात्मा गान्धी, स्वामी विवेकानन्दः, एवमार्य-समाजस्य प्रवर्तकः स्वामी दयानन्दः, अन्ये च बहवः महापुरुषाः संस्कृतग्रन्थेभ्य एव प्रेरणां प्राप्य महत्कार्यमकुर्वन्।

भारतस्य संस्कृतं, संस्कृतिश्च द्वे एव मूलभूते तत्त्वे स्तः, याभ्यां विश्वे तस्य सर्वोत्कृष्टं स्थानं वर्तते, प्रतिष्ठायाः पात्रञ्चास्ति। उक्तञ्च—

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"।

इदं ध्रुवं यदस्माकं संस्कृतेः भव्यभवनं संस्कृतरूपाधारशिलायां स्थितमस्ति। महाभारतं, गीता, रामायणमन्यानि च यावन्ति नीतितत्त्वानि सन्ति, तेषामाश्रयेणैव भारती-यानां धार्मिकजीवनस्य सामाजिकजीवनस्य च निर्माणं भवति। वेदेषूपनिषत्सु च प्रतिपादितं तत्त्वज्ञानमेवात्र जीवनस्य मुख्याधारोऽस्ति। यो मनुष्यो वेदे गीतायां रामायणे च वर्णितानामुपदेशानामनुसारेण स्वकीयस्य जीवनस्य निर्माणं न करोति, तेषामाज्ञां च न पालयति, तस्य भारतीयता कुतः? केनचित् सत्यमुक्तम्:—

विना वेदं, विना गीतां, विना रामायणीं कथाम्।
विना कविं कालिदासं, कीदृशी भारतीयता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं परिष्कृता भाषाऽस्ति । अस्य ज्ञानकोशेन क आकृष्टो न भवेत् ? शर्मण्याः विद्वांसः, फ्रांसीयाः विद्वांसः आङ्ग्लविद्वांसश्चास्माकम् इमां भाषां पठित्वा भारतीयविद्यानां ज्ञानमेव नाध्यगच्छन्, अपितु तस्याः मुक्तकण्ठं प्रशंसामकुर्वन् । भारते प्रयुज्यमानाः सर्वाः भाषाः संस्कृतरूपमहावृक्षस्य शाखाः सन्ति । संस्कृतभाषा भारतीयभाषाणां योरोपीयभाषाणाञ्च जननी अस्ति । अस्य देशस्य जीवने इयं भाषा तथा संसक्ता वर्तते यत् तस्मात् दूरीकर्तुं न शक्यते । अद्य अस्माकं देशस्य समक्षं राष्ट्रभाषायाः शब्दावल्याः या आवश्यकताऽस्ति, सा संस्कृतभाषायाः माध्यमेन पूर्णा भवितुं शक्नोति ।

सम्प्रति विश्वस्य मानवः मानसिकशान्तेरन्वेषणाय भारतीयसंस्कृतिं प्रति आकृष्टो भवति । भारतीयसंस्कृतेः सत्यं स्वरूपं ज्ञातुं संस्कृतभाषायाः ज्ञानमपेक्षितमस्ति । भारतवासी संस्कृतभाषायाः ज्ञानेनैव विश्वं शान्त्याः मार्गं दर्शयितुं समर्थो भविष्यति । संस्कृतस्य प्राचीनग्रन्थेषु अनेकेषामाविष्काराणां बीजरूपेण वर्णनमस्ति । अतोऽस्माकं देशस्य छात्रा विज्ञानेन सह संस्कृतस्यापि उच्चज्ञानं प्राप्य नवीनेन आविष्कारेण देशं समुन्नतं राष्ट्रं निर्मापयन्तु । संस्कृतमेव एका ईदृशी भाषा अस्ति, या मानवाय "**वसुधैव कुटुम्बकम्**" इत्यस्य शिक्षां ददाति । सम्प्रति यदा सम्पूर्णविश्वम् एकतां प्रति अग्रेसरं भवति, अस्मिन्समये संस्कृतशिक्षायाः विशिष्टं महत्त्वमस्ति । संस्कृतशिक्षा अतीव उपयोगिनी वर्तते । तस्याः सर्वैर्ज्ञानमवश्यं लब्धव्यम् । एवञ्च तस्याः ग्रन्थानामध्ययनं प्रत्येकेन भारतीयेन अवश्यं कर्त्तव्यम् । सर्वैर्भारतीयैः संस्कृतं संरक्षणीयम् ।

—**—

ज्ञानदां प्रति

पद्मप्रसादः सुवेदी, आचार्यद्वितीयवर्षीयः

*

ध्येया ध्येया सुरवरगणैर्ज्ञानदा सर्वदा वै,
चेया चेया मधुरकविता या कृता छात्रवृन्दैः ।
माला ह्येषा परिमलयुता श्लेषणीया समैश्च,
यस्याः स्थानं प्रथमगणनायां सदा भावनीयम् ॥

अस्याः कीर्तिः प्रसरतु भुवि, स्वर्गताः देवताश्च,
ताः शृण्वन्तु प्रतिदिनमहो वर्धयन्त्यो महत्ताम् ।
आयुर्दीर्घं भजतु जगति ज्ञानदा ज्ञानदात्री,
यावच्चन्द्रादितिसुतविभा स्थीयते निष्कलंका ॥

—**—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

विद्यालय के नव भवन का

शिलान्यास समारोह

२८, जन० ७४



१– श्री केदारदत्त (पुरोहित) २–श्री रघुवीरसिंह जी शास्त्री, कुलपति गु. कां. वि. वि. ३–श्रीमती फूल जी स्याल
४– श्रीमती हरेन्द्र कत्याल ५– श्री हरेन्द्र जी कत्याल ६–स्वामी श्री गुरुचरणदास जी महाराज

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय 07792 गुरुकुल कांगड़ी

व्याकरणस्य महत्त्वम्

– लक्ष्मणप्रसादो ज्ञवाली
व्याकरण-शास्त्रिप्रथमवर्षीयः

*

व्याक्रियन्ते व्युत्पाद्यन्तेऽसाधुशब्देभ्यो विविच्य साधवः शब्दा अनेनेति व्याकरणम्। विआङ्उपसर्गपूर्वकात् कृधातोः करणे ल्युट्प्रत्यये तस्य स्थानेऽनादेशे णत्वे च कृते व्याकरण-शब्दस्य निष्पत्तिर्भवति।

व्याकरणेनैव सम्पूर्णानां शब्दानां निष्पत्तिज्ञानं भवति। अवैयाकरणः कुत्राऽपि मानं नार्हति। अवैयाकरणो न जानाति अभिवादनमपि कर्तुम्। उक्तञ्च :–

अभिवादात्परंविप्रो ज्यायां समभिवादयन्।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्॥

नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽयमहं ब्रूयात् स्त्रियः सर्वास्तथैव च॥

व्याकरणज्ञो हि सम्यक् शब्दान् प्रयोक्तुं पारयति, न तावद् व्याकरणज्ञानरहितः। साधुशब्दानाञ्च सम्यग्ज्ञानार्थं व्याकरणस्य नितान्तमावश्यकताऽस्ति। यज्ञं कर्तुं कारयितुं वा आवश्यकमेव व्याकरणाध्ययनम्।

अपरञ्च यो व्याकरणं न जानाति सः शृण्वन्नपि न शृणोति, पश्यन्नपि न पश्यति, सः तु मूढः, बधिरान्धसमानोऽस्ति। उक्तमपि महाभाष्ये :– **"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्"**। व्याकरणस्य महत्त्वंतु अपारमेव संस्कृतसाहित्ये। उक्तञ्च–

नाङ्गीकृतव्याकरणौषधानाम्, अपाटवं वाचि सुगाढमास्ते।
कस्मिंश्चिदुक्ते तु पदे कथञ्चित्, स्वैरं वपुः स्विद्यति वेपते च॥

अस्मत्समये ये भाषावैज्ञानिका मन्यन्ते, तेऽपि अस्माकं व्याकरणस्य प्रभावेणैव सन्ति। प्राचीनकाले विदेशीया जना अस्माकं धर्मशास्त्राणि पठित्वा तेषां रहस्यं ज्ञात्वा अधुना अगमं गगनं चन्द्रलोकं च गच्छन्ति, विश्वे च यशस्विनो भवन्ति।

यथा मुखेन अन्ने भुज्यमाने सति सर्वेषामिन्द्रियाणां सुरक्षा भवति, तद्वत् व्याकरण-ज्ञानेन सर्वेषां शास्त्राणां ज्ञानं लभ्यते। यथा वृक्षस्य मूले शुष्के सति शाखाः स्वयमेव शुष्यन्ति, तथैव व्याकरणे नष्टे सति सर्वाणि शास्त्राणि नाशं प्राप्नुवन्ति। उक्तञ्च—

अङ्गीकृतं कोटिमितञ्च शास्त्रम्, नाङ्गीकृतं व्याकरणञ्च येन।
न शोभते तस्य मुखारविन्दम्, सिन्दूरविन्दुर्विधवाललाटे॥

व्याकरणस्य ईदृशं महत्त्वमवश्यमेव ज्ञातव्यमस्माभिः पठितव्यञ्च। तदैव भारतीय-संस्कृतेः संस्कृतसाहित्यस्य च सम्यग्ज्ञानं भवितुमर्हति। **"जयतु संस्कृतम्"**

—**—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणस्य सर्वशास्त्रोपकारकत्वम्

शान्तिदेवी
व्याकरणाचार्यद्वितीयवर्षीया

*

सुविदितचरमेव शब्दशास्त्रनिष्णातमानसैः, निखिलविद्वन्मण्डलमूर्धन्यैः व्याकरणस्य माहात्म्यं तस्योपयोगित्वञ्च आश्चर्यमहो ! यत् चिरकालादुपक्रान्तमपीदं व्याकरणं स्वस्मिन् कलेवरे अधुनाऽपि गौरवान्वितमेव प्रतिभाति ।

अस्मिन् परिवर्तिनि संसारे अनेके पदार्थाः प्रतिक्षणं जायन्ते विलीयन्ते च । **"पुनरपि जननं पुनरपि मरणम्"** इत्यादिरूपा विचित्रा संसारस्य दशा सर्वैः समवलोक्यते । अतः जरा-जन्मादिक्लेशेन क्लिश्यमानानां त्रिविधतापतातप्यमानानां वा मानवानां परिशान्तये ईश्वरेण कृपापरवशतया धर्मं मोक्षञ्चोद्दिश्य चत्वारो वेदाः प्रतिष्ठिताः । यद्यपि दर्शनशास्त्रादिरूपं यावन्मात्रं वाङ्मयं वरीवर्ति, तदपि प्रक्रियाभेदेन मनुष्यस्य कल्याणं विदधाति । परं तत्र वेद एव मानवस्य कर्तव्यं प्रकर्षत्वेन शिक्षयति । तस्य वेदस्य ज्ञानं वेदाङ्गानां बोधं विना न संभवितुमर्हति । तेषु वेदाङ्गेषु व्याकरणमेव प्राधान्येन विराजते ।

वस्तुतः व्याकरणस्य **'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति"** व्युत्पत्त्या पदसाधुत्व-पूर्वकं पदार्थज्ञानजनकत्वं वर्तते । अतः सर्वेषां लौकिकानां वैदिकानामपि शब्दानामनुशासनं सङ्गमय्य सर्वोपयोगि परमरमणीयं व्याकरणमेवाभिशोभते । एतेन सर्वेषु शास्त्रेषु व्याकरण-शास्त्रस्य प्राथम्यमुपलभ्यते ।

परं यत्तु केवलं लक्ष्यं व्याकरणं, तन्न मनोरमम् । व्याकरणं यत्रोपयोगित्वं लभते तद्सहितं व्याकरणं ग्रहीतव्यम् । तच्च शास्त्रं निखिलवाङ्मयसाहित्यरूपं विद्यते । तस्य **"हितेन सहितं साहित्यमिति"** व्युत्पत्त्या सर्वेषां प्राणिनां हितसम्पादकत्वमुचितम् । परं तस्य निर्माणं वाक्यार्थबोधालम्बनापेक्षम् । स च बोधः वाक्यानां सुप्तिङ्न्तचयरूपत्वात् व्याकरण-ज्ञानाधीनो वर्तते । वस्तुतो व्याकरणमेव प्रकृतिप्रत्ययविभागपूर्वकं पदपदार्थज्ञानं जनयति । ततः पदार्थबोधे जाते वाक्यार्थज्ञानं भवति, तर्हि वाक्यार्थज्ञानं विना साहित्ये वाक्यरचनादौ प्रवृत्तिः कथं संभवेत् । अतएव साहित्यस्य निष्पत्तिकारणं व्याकरणमेव ।

प्रकारान्तरेण वैयाकरणानां साहित्यकादीनाञ्च मतेषु साम्यं प्रतीयते । यथा–वैया-करणनये सर्वा प्रकृतिप्रत्यादिकल्पना मिथ्याभूताऽस्ति, शब्दस्फोट एव नित्यः । परं **"असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते"** इतिहरिकारिकया असत्यस्वरूपे शास्त्रप्रक्रियामात्रेऽर्थे स्थित्वा विद्यास्वरूपं शब्दब्रह्म एव प्राप्नुवन्ति अज्ञजनाः, इति निष्कर्षो जातः । तथैव दर्शनकार-व्यासादिमतेऽपि अविद्यावशान्नानात्वं स्वीकृतम्, तन्न पारमार्थिकमस्ति, परमार्थतस्तु ब्रह्म निरुपाधिकमेव । परं विवर्तरूपेण तदेव व्यवहारास्पदं भवति, सुवर्णे कुण्डलादिवत् । एतेन उभयोः सिद्धान्तयोः स्फुटमेव साम्यं प्रतीयते । एवमेव वैयाकरणानाम् आलङ्कारिकाणाञ्च मतेष्वपि साम्यं परिलक्ष्यते । यथा वैयाकरणनये स्फोटाख्यशब्दस्य ध्वनिव्यङ्ग्यता समुररीक्रियते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलङ्कारिकनयेऽपि रसस्य ध्वनिव्यङ्ग्यता अभिधीयते। यथा वैयाकरणमते ध्वनिव्यङ्ग्यः स्फोटः शब्दो ब्रह्मरूपेण वरीवर्ति, तथैव आलङ्कारिकमते "रसो वै सः" इतिश्रुत्या प्रतिपादितः सः ध्वनिव्यङ्ग्यो रसो ब्रह्मरूपेण अधितिष्ठते।

अनेन स्पष्टं सिद्धयति यत् समग्रसाहित्यमेव प्रकारान्तरेण व्याकरणपद्धतिमनुसरति। व्याकरणसाहित्ययोरुपजीव्योपजीवकभावसम्बन्धः उपतिष्ठति। अतः यथा उपजीव्यं विना उपजीवकस्य कार्यस्य स्थितिः कदापि सम्भवितुं नार्हति, तथैव व्याकरणं विना साहित्यस्य (शास्त्रस्य) सम्पाद्यत्वमसम्भवतां भजते।

—❋❋—

गद्यं कवीनां निकषं वदन्ति

— राजेन्द्रप्रसादः किमोठी
साहित्यशास्त्रिप्रथमवर्षीयः

❋

श्रवणेन्द्रियस्य चक्षुरिन्द्रियस्य वा रसदः प्रबन्धः काव्यमुच्यते। तत्काव्यं दृश्यश्रव्यभेदेन द्विविधम्। श्रव्यकाव्यस्य पुनस्त्रयो भेदाः जायन्ते, गद्यं, पद्यं चम्पूश्च, तेषु गद्यप्रबन्धः सर्वोत्कृष्टतया स्वीक्रियते रसज्ञैः विद्वद्भिश्च। यथा कनकस्य परीक्षणं घर्षणपाषाणे भवति, तथैव कवेः परीक्षणमपि गद्यनिर्माणे भवति। 'गद्य" शब्दस्य निष्पत्तिः गद्धातोः यत्प्रत्यययोगेन भवति। कथनं, वचनम् इत्यादयोऽस्य अर्था भवन्ति। गद्यं विचारात्मिका रचनाऽस्ति। कवेः बौद्धिकक्रिया चिन्तनशीलवृत्तिश्च पद्यापेक्षया गद्ये सरलतया व्यक्तीभवतः। गद्ये तर्कस्य विवेकस्य च प्राधान्यं भवति, तेन वयमिदं "मस्तिष्कस्य भाषा" इति वक्तुं शक्नुमः। गद्यकविः व्याकरणनियमानामवहेलनां न करोति। एष वाक्यरचनायां पदविन्यासकाले व्याकरणादिनिर्दिष्टनियमानां पालने तत्परो भवति। पद्यस्य प्राणस्वरूपं छन्दो वर्तते। अस्य गद्यस्य तु प्राणस्वरूपाणि विरामचिह्नान्येव भवन्ति, कस्यचित् छन्दसः अभावेऽपि गद्ये उदात्तादिस्वरवैशिष्ट्येन छन्द अवश्यमेव प्रतीयते।

मानवस्य दैनिकजीवने व्यवहारस्यभाषापि गद्यमेव भवति। संघर्षप्रधानेऽस्मिन् जीवने बुद्धेरत्यधिकमावश्यकता भवति। बुद्धेः सम्बन्धः विचारशक्त्या सह विद्यते। अन्वेषणेन, परीक्षणेन तत्त्वचिन्तनेन च प्राप्ताः निष्कर्षा गद्यरूपेणैव व्यक्तीभवितुं शक्नुवन्ति। दृश्यते च यदुपनिषदां महाभाष्यादिप्राचीनग्रन्थानां भाषा गद्यमेवाऽस्ति। यदा गद्यभाषा दर्पणवत् प्रतिबिम्बचमत्कारिणी भवति, तदा तु लालित्यपूर्णाऽप्युत्कृष्टा च भवति; यथास्माकं संस्कृतगद्येषु दृश्यते। गद्ये भावतत्त्वानि विचारतत्त्वैः सह संतुलितानि भवन्ति, इदमेव कवेः वैशिष्ट्यं, वाक्यबद्धता तु केवलं बाह्यं स्वरूपमेव।

विशाले संस्कृतसाहित्ये गद्यकाव्यानां स्थानमुन्नतमस्ति। आर्यजातीनां साहित्ये गद्यस्यावतारः सर्वप्रथममस्माकं संस्कृतभाषायामेव बभूव। वेदसंहितासु, ब्राह्मणग्रन्थेषु उपनिषत्सु च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनसाहित्यस्वरूपेष्वपि गद्यस्य मात्रा पूर्णतया प्राप्यते । वैदिकसाहित्यं लौकिकसाहित्यापेक्षया व्यापकरूपेण दृग्गोचरीभवति किन्तु तात्कालिका शैली दार्शनिकविचारात्मिका गूढा नीरसा चासीत् । सा सामाजिकजनमानसं प्रभावयितुं विशेषरूपेण समर्था नास्ति । विक्रमसम्वत्सरात् चतुःशतीवर्षपूर्वादारभ्य विंशतिशतकं यावत् ये गद्यग्रन्थाः रचिताः सन्ति, ते कालगणनानुसारम् अत्यल्पाः सन्ति, किन्तु प्रत्येकं दशायां ते लोकहिताय सन्ति । ऐतेषां प्रवेशेन संस्कृतसाहित्यं चमत्कारपूर्णं महत्त्वपूर्णं गौरवान्वितं चाभूत् ।

काव्यकौशलस्य पूर्णं परीक्षणं गद्यरचनया एव भवति । कठिनोऽयं प्रकारः, केन प्रकारेण गद्यं विरचनीयं, येन तत् हृदयावर्जकं भवेदिति स्पष्टतया वक्तुमशक्यम् । पद्ये यथा रसयोजना सुलभा, न तथा गद्ये । येन सरसं गद्य रचितं स एव वस्तुतः कविपदभाक् । पद्ये छन्दसामनुरोधेन कल्पना पूर्णतया न प्रकटीक्रियते । गद्ये तु मानसकल्पनां प्रकाशयितुं न कश्चिद् अन्तरायः । अतो गद्यनिर्माणं न सर्वैः कविभिः सुलभम् । किञ्च संस्कृतगद्ये, यदन्यभाषासु अतिदीर्घतया प्रकटीक्रियते, तदेकेनैव पदेनाभिव्यक्तं भवति । संस्कृतगद्यानां जीवनं समास एवाऽस्ति । समासैरेवात्र स्वल्पशब्दैः प्रभूततमस्यार्थस्य प्रकाशनसामर्थ्यमागच्छति । ओजोगुणेन संस्कृतगद्यस्य जीवनमुत्कर्षं प्राप्नोति । तेनैव गद्यसौन्दर्यं लालित्यपूर्णं भवति, ओजः समासाधिक्यं च गद्यस्य जीवनम् । उक्तं च दण्डिना– **"ओजःसमासभूयस्त्वम् एतद् गद्यस्य जीवितम्"** । यद्येतन्नास्ति र्तहि नहि गद्यस्य किमपि वैशिष्टचम् । स्वच्छदर्पणैरिव गद्ये प्रतिबिम्बिता कविप्रतिभा सर्वतो विभाति । पद्यकविस्तु छन्दःप्रतिबन्धकतया स्वबुद्धिं कुण्ठयति ।

एवं पद्यापेक्षया गद्यलेखने विविधशास्त्राणां विस्तृतज्ञानं, उत्कृष्टा कल्पनाशक्तिः, भाषायामधिकारः, समासयोजने निपुणता, लोकज्ञानं, कलासु निपुणता, रसालंकारादिसमावेशकौशलं, विविधभावव्यक्तीकरणक्षमता, इत्यादयो गुणा अपेक्षिता भवन्ति । पद्यकवेः व्याकरणाद्यशुद्धयः कदाचित् क्षम्याः भवन्ति, परन्तु गद्ये एवं न भवति यदि भवति र्तहि दोषो मन्यते ।

अतोऽयं निष्कर्षः यत् पद्यकवेरपेक्षया गद्यकवेः कार्यमतिकठिनमुत्कृष्टं प्रतिभासाध्यं चास्ति । अतः सम्यगुक्तं केनचित्–**गद्यं कवीनां निकषं वदन्ति" इति** ।

—***—

"साहित्यपाथोनिधिमन्थनोत्थं, काव्यामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय, काव्यार्थचौराः प्रगुणीभवन्ति ।।
(विल्हण)

इतरपापशतानि यथेच्छया, वितर तानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं, शिरसि मा लिख मा लिख ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषद्विद्या

– स्वामी दयानन्दः
व्याकरण-पूर्वमध्यमाप्रथमवर्षीयः

*

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्,
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ्मायया भोजयन्नो,
मायासंख्यातुरीयं परममृतमयं ब्रह्म यत्तन्नतोऽस्मि ।।

प्रत्यक्चैतन्याभिन्नं परं ब्रह्म परमात्मानं प्रापयित्री ज्ञापयित्री वा, निःसन्धिबन्धनात्मिकां चिज्जडग्रन्थिःवरूपाम् अविद्यां शिथिलयित्री, आपातरमणीयनामरूपक्रियात्मकं मायामयं विश्वप्रपञ्चं समुन्मूल्य जीवस्य ब्रह्मात्मत्वं बोधयित्री च ब्रह्मविद्यैव 'उपनिषद्' इति कथ्यते । सैव परा विद्या, आत्मविद्या, अध्यात्मविद्या, मोक्षविद्या इत्यादिभिः नामभिरभिधीयते । उपन्युपसृष्टात् 'षद्लृ विशरणगत्यवसादनेषु' इति धातोः क्विपि प्रत्यये सति 'उपनिषद्' इति रूपस्य निष्पत्तिः । अस्यायमर्थः–उपनिषादयति=सर्वानर्थकरं संसारं विनाशयति, संसारकारणभूतामविद्याञ्च शिथिलयति, ब्रह्म च गमयति इति उपनिषत् । भाष्यकारेण कठोपनिषद्भाष्ये उक्तञ्च–"उपनिषच्छब्देन प्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते इत्यपि उपनिषच्छब्दस्यैव अपरपर्यायः वेदान्तः" इति । वेदानामन्तस्य परमसिद्धान्तस्य बोधकत्वेन उपनिषद् वेदान्त इति कथ्यते । ताः सर्वा एव उपनिषदः अनाद्यविच्छिन्नसम्प्रदायपरम्परया आगतत्वेन अस्मर्यमाणकर्तृकत्वेन च अपौरुषेयवेदस्वरूपा एव सन्ति । तथोक्तं जैमिनिना–"तुल्यं साम्प्रदायिकमिति" । अतएव प्रमाणान्तरैः अर्थोपलम्भपूर्वकविरचितत्वेन पूर्वानुपूर्वी-निरपेक्षोच्चरितत्वरूपापौरुषेयत्वेन पुरुषाश्रितैः भ्रमप्रमादविप्रलिप्साकरणापाटवादिसर्वदोषैः सर्वथाऽस्पृष्टत्वेन अपास्तसमस्तपुंदोषशङ्काकलङ्करहितत्वेन च उपनिषदां प्रत्यक्चैतन्याभिन्नस्य परब्रह्मणः स्वप्रकाशत्वस्वतःसिद्धो परमप्रमाणत्वमस्ति । वेदरूपत्वेन ताः अपि परमेश्वरस्य निःश्वासभूताः अनादयश्च सन्ति ।

उपनिषत्सारत्वेन हि गीता अपि 'उपनिषद्' इति उच्यते । वेदे सारत्वेन उपनिषत्स्वपि कर्मोपासनाज्ञानाना वर्णनमस्ति, तत्सारत्वेन गीतायामपि तानि त्रीण्येव वर्णितानि । वेदोपनिषद्गीतानाम् अवान्तरं तात्पर्यं कर्मोपासनयोरपि, महत्तात्पर्यं केवलं स्वप्रकाशप्रत्यक्चैतन्याभिन्नपरब्रह्मण्येवास्ति । जन्मना ब्राह्मणक्षत्रियवैश्यकुलेषु समुत्पन्नः अथवा अनाद्यविच्छिन्नोपनीतपितृपितामहादिपरम्परायां समुत्पन्नो विधिवदुपनीतः एव वेदोपनिषदाम् अध्ययनादीनामधिकारी भवति । उपनिषत्सु कर्मणा दिङ्मात्र प्रदर्शनम्, विशेषतः उपासनाज्ञानयोरेव प्रतिपादनम् । अत एव नित्यानित्यवस्तुविवेकेहामुत्रविषयवितृष्णत्वेषु शान्तिदान्त्युपरतितिक्षाश्रद्धासमाधानमुमुक्षुत्वेषु च सत्सु उपनीतः द्विजातिरेव उपनिषदां विचारात्मकश्रवणस्याधिकारी भवति । अन्येषां कृते श्रीमद्भगवद्गीताश्रीमद्भागवतयोगवासिष्ठविष्णुपुराणादीनां श्रवणद्वारेणापि तत्त्वबोधप्राप्तिसंभवः यथाऽऽलोकादिसहकृतेन मनःसंयुक्तनिर्दोषचक्षुषैव रूपबोधो भवति, तथैव साधनचतुष्टयसम्पन्नाधिकारिणामेव उपक्रमोपसंहारादिषड्लिङ्गैः उपनिषच्छ्रवणेनैव ब्रह्मसाक्षात्कारो भवति । तथोक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"परीक्ष्य लोकान् कर्मचिन्तान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" ।।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।।

गीता ४।३४

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम् । निदिध्यासनमित्येतत्पूर्णं बोधस्य कारणम् ।।

शुकरहस्यम् ३।१३ ।

साधनसम्पन्नजिज्ञासुः श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुम् उपगम्य उपनिषत्तत्त्वोपदेशं श्रुत्वा तदनुकूलं युक्तिभिः मननं कुर्वन् ध्यानादिरूपैः अभ्यासैः निदिध्यासनपूर्वकं **"अहं ब्रह्मास्मि"** इत्यादिवाक्यार्थं निरन्तरं विचारयन् तन्निष्ठारूढः सन् सम्यक् तत्त्वज्ञानविज्ञानस्वरूपायां ब्रह्मसत्तायां प्रविष्टः तद्रूपो भवति, **"ब्रह्मविद्ब्रह्मैव भवति"** इति श्रुतेः ।

श्रुतीनाम् अयं चरमसिद्धान्तः **"सत्यं ज्ञानमनन्तं ब्रह्म" "सर्वं खल्विदं ब्रह्म" 'यतो वा इमानि भूतानि जायन्ते…"** इत्यादिश्रुतिषु प्रतिपादितः । अस्य प्रतिपादनेन उपनिषज्जीवम् अल्पज्ञानादनन्तज्ञानं प्रति, अल्पसत्तासामर्थ्याभ्याम् अनन्तासीमितसत्ताशक्ती च प्रति, जगद्दुःखेभ्यो निरतिशयानन्दं प्रति, तथा च जन्ममृत्युबन्धनात् अनन्तस्वातन्त्र्यमयीं शाश्वतीं शान्तिं प्रति गमयति । किञ्च, इदं निखिलभासमानं द्वैतं विश्वप्रपञ्चं ब्रह्मणोऽभिन्नमेव दर्शयति—**"एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन"** इति श्रुतेः । जीवब्रह्मैक्यं प्रतिपादयद्भिः पूर्वाचार्यैः उपनिषत्तत्त्वोपदेशनिष्कर्षे संक्षेपेण उक्तम्—**"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"** इति । जीवो ब्रह्मस्वरूप एव, जगदपि ब्रह्मस्वरूपमेव ब्रह्मण्यध्यस्तत्वात्, केवलं नामरूपात्मकत्वेन मिथ्या । यतोऽनन्तकोटिब्रह्माण्डात्मकविश्वप्रपञ्चस्य उत्पत्तिः, स्थितिः, प्रलयश्च भवति तदेव उपनिषदर्थो ब्रह्म आकाशस्य कारणम् अहं, अहङ्कारस्य कारणं महत्, महतः कारणम् अव्यक्तन्तु उपनिषदर्थे ब्रह्मण्यध्यस्तम् । तथोक्तम्—**"तदैक्षत एकोऽहमित्यादि"** । एतेषां सर्वेषां भासकम् दृश्यमानं स्वयंप्रकाशं ब्रह्मैव । समस्तपुरुषार्थानां चरमं लक्ष्यं सर्वदुःखानाम् आत्यन्तिक निवृत्तिः परमानन्दावाप्तिश्च, **'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्'** इत्यादिश्रुतेः । ब्रह्मणः सर्वबाधावधिः अत्यन्तबाध्यत्वमेव अमृतत्वं सत्यत्वञ्च । शुद्धभानस्वरूपप्रत्यग्ब्रह्मभानानन्तरमेव इदं सर्वं विश्वप्रपञ्चं भासते । तथोक्तम्—**"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"** इति । प्रत्यङ्ङात्मनोऽपरोक्षत्वं सर्वनिरपेक्षत्वं स्वतः सिद्धम्—**"यत्साक्षादपरोक्षाद्ब्रह्म"** इति श्रुतिः । सर्वकारणं सर्वाधिष्ठानस्वरूपं प्रत्यक्चैतन्याभिन्नब्रह्मणो पृथक् सर्वोऽयं प्रपञ्चः तथैव मिथ्या यथा—रज्जौ कल्पितसर्पादिः सर्वथा मिथ्यैव । जगदाकारे परिणममानमायया अधिष्ठानभूतं ब्रह्मैव दृष्टिभेदेन नानात्वेन प्रतीयते । रूपान्तरेण चित्तचाञ्चल्येनापि तस्मिन् द्वैतं प्रतिभासते । वस्तुतः कार्यकारणातीतं नित्यं निरस्तनिखिलप्रपंचविभ्रमम् अजम् अनिद्रमस्वप्नम् स्वप्रकाशमनन्तं सद्घनं चिद्घनमानन्दघनं ब्रह्मैव सर्वमिदम् । तथा चाहङ्काराद्युपाधिना आत्मनि मिथ्या कर्तृत्व भोक्तृत्वं च प्रतीयते, यथा जपाकुसुमादिसंसर्गेण स्वच्छस्फटिके लौहित्यं प्रतीयते । जीवपरमात्मनोः भेदोऽपि मिथ्यैव । उत्पत्तिविपरीतक्रमेण समस्तप्रपञ्चस्याधिष्ठानस्वरूपे प्रत्यग्ब्रह्मणि लयकरणेन ब्रह्मैवावशिष्यते । तथोक्तम्—**"यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनि" । क० उ० ३।१३ । इयमेव वस्तुस्थितिः सर्वैः उपनिषद्वाक्यैः प्रतिपाद्यते । इदमेव उपनिषद्विद्यारहस्यम् । इदमेव ज्ञात्वा साधवो भवाब्धिं तरन्ति।

यस्माद्दुत्पत्तिगुप्ती क्षतिरपि जगतां यच्च शास्त्रैकयोनिः,
सर्वज्ञं मायया यत् सहजसुखसदद्वैतसंवित्स्वरूपम् ।
तद्ब्रह्म स्वप्रकाशं श्रुतिशिखरगिरां सैव तात्पर्यभूमिः,
स्वात्मासौ यं विदित्वा जनिमृतिजलधिं निस्तरन्तीह सन्तः ।।

ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

—❀❀—

स्वागत-गानम्

शुकदेवदासः शास्त्री
व्याकरणाचार्यः, एम०ए०-दर्शनशास्त्रे

❀

अर्पिते पादपद्मे भवद्भिः शुभे, स्वागतं हार्दिकं च वयं कुर्महे ।
ह्लादिता भारतीसेवका वै समे, स्वागतं हार्दिकं च वयं कुर्महे ।।

भारते विश्वश्रेष्ठे हि गीर्वाणगीः, राजते विश्वभाषाललाटस्थिता ।
ज्ञानविज्ञानवैदग्ध्यसम्मण्डिता, तत्समर्चां च सर्वे वयं कुर्महे ।।

कालगत्या गता काञ्चिद्धीनस्थितिं, सभ्यता संस्कृतिः सा च सुरभारती ।
किन्तु राष्ट्रे स्वतन्त्रे पुनः सर्वतः, तत्समृद्ध्यै प्रयासान् वयं कुर्महे ।।

अद्य देशे महान्तो हि विद्वद्वराः, राष्ट्रसेवासु धर्मस्थितौ तत्पराः ।
तेष्वनन्यान् वरान् संस्कृतोन्नायकान्, प्राप्य नैजान् सुखाशां वयं कुर्महे ।।

प्राप्नुयाद् भारतं स्वं गुरुत्वं पुनः, दृष्टिदानेन शान्ते जगन्मण्डले ।
सन्तु धन्याः समे छिन्नक्लेशाः शिवाः, प्रार्थनां प्रत्यहं च वयं कुर्महे ।।

—❀❀—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य साम्प्रतिकसमस्याः

पशुपतिः भट्टराई
व्याकरणशास्त्रि-प्रथमवर्षीयः

*

मानवः प्रकृत्या विवेकशीलो जन्तुः । अतएव विश्वस्य सर्वैर्जन्तुभिः सह सांसारिकपदार्थेषु बाह्यदृष्ट्या साम्येऽपि अन्तःकरणस्य विषयानुभूतौ मानवः उन्नततमो दृश्यते । अस्य समुन्नतं चिह्नं विकसिता विवेचनशक्तिरेव । अतः सदसदुचितानुचितनित्यानित्यविषयेषु विचारेण मानवः अनेकावश्यकसमस्या अनन्ताभिलाषांश्च नितरामनुभवति । अभिलषांपूर्तिः समस्या-समाधानं च मानवस्य परमं कर्तव्यम् । मानवहृदयमेव सभ्यतायाः सदाचारस्य च उत्पादने प्रमुखं स्रोतः । सम्प्रति मानवचरित्रवत् देशविकासोऽपि प्राचीनसंस्कृतावेव निर्भरः । देश-विकासाय यद्यद् आवश्यकं वर्तते, तत्र किञ्चित् मया अत्र प्रस्तूयते—

संस्कृतस्य आवश्यकता– अस्माकमिदं विशालराष्ट्रं भारतवर्षं विश्वस्य महत्त्वपूर्ण-राष्ट्रेषु समुन्नतत्वेन गण्यते । अयं प्रभावः संस्कृतभाषाया गौरवादेव । किन्तु सम्प्रति इयं भाषा सर्वत्रैव विभागेषु अपमानदृष्ट्याऽवलोक्यते । सर्वत्र आङ्गलभाषा एव प्रमुखत उपयुज्यते । एतत्स्थाने सर्वभाषाजनकत्वेन इयं संस्कृतभाषा एव उपयुज्येत । पुरा मानवो बहुभाषाविदपि यदि संस्कृतज्ञो नाभवत् तदा स मूर्खेष्वेव अगण्यत । उक्तं च—

> **अङ्गीकृताः कोटिमिताश्च भाषाः, नाङ्गीकृता देवगिरा च येन ।**
> **न शोभते तस्य मुखारविन्दं, सिन्दूरविन्दुर्विधवाललाटे ।।**

अतः इयं भाषा अनिवार्यत्वेन उद्घोष्येत, तथा तस्याः प्रचारः प्रसारश्च विधिवत् क्रियेत् ।

छात्रजीवने अनुशासनम्– छात्रावस्था जीवनस्य प्रथमावस्था, तत्र जनो जीवनायाक्षय-कोषभाण्डागारं करोति । जीवने ये केऽपि सफला अभूवन्, भवन्ति, भविष्यन्ति च, ते सर्वे अस्याम् अवस्थायाम् अनुशासनादेव । इयमेव अवस्था जीवनवत् देशोत्थाने राष्ट्रनिर्माणे चापि सहायकम् । यथा उच्यते–**"अद्यतना बालका श्वस्तनदेशस्य कर्णधारा भवन्ति"** इति । परन्तु अद्यत्वे इयम् अवस्था अनुशासनहीनताया उच्छृङ्खलतायाश्च निधिरभवत् । अस्याः समाधानेनैव देशस्य हितं भविष्यति । सर्वे एव च राष्ट्रस्य सुयोग्या नागरिका भवेयुः । अतः नियमानां पालनं सर्वेषां कृते आवश्यकम् ।

नारीणां स्वातन्त्र्यसमस्या– जगति बहवो देशाः स्वतन्त्राः सन्ति । स्वातन्त्र्येऽपि अनेका जातयः, अनेके सम्प्रदायाः नार्यश्च न तथा स्वतन्त्राः यथा ते स्युः । अतएव न ते स्वतन्त्राः, न तथा शिक्षिताः । ते आजीवनं परतन्त्रा एव स्वजीवनं यापयन्ति । एषैव दशा स्त्री-वर्गस्य । तासां कृते केचित् कथयन्ति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ।।

किन्तु **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"** इत्युक्तिं ते सर्वथा विस्मरन्ति । यदि स्त्रीणां स्वातन्त्र्य स्यात्, पुरुषवत् ताः शिक्षिताः स्युः सर्वत्रैव व्यवहारेषु ताः पुरुषवत् अग्रेसराः स्युः, तदा कथं ताः पुरुषमार्गानुसारिण्यो भवेयुः ? बहुत्र बाल्ये एव ताः परिणीयन्ते । तासामपरिपक्वबुद्धीनां परिणयेन देशस्य का अवस्था स्यात् इति विज्ञानां विचारविषयः ।

परिवारनियोजनम्– सम्प्रति परिवारनियोजनं भारते एव न, अपितु सर्वेष्वेव देशेषु सहर्षं स्वीक्रियते, यतो हि सर्वेषां साधनानि सीमितानि सन्ति । यदि मानवेन परिवार-नियोजनं न स्वीक्रियेत, तदा परिवारस्य कृते शिक्षादीक्षाभोजनाच्छादनादिव्यवस्था सीमितसाधनैः न कर्तुं पार्येत । अतः परिवारनियोजनमपि सर्वेषां कृतेऽत्यावश्यकम् ।

स्वतन्त्रता समानता च– विश्वस्य सर्वेष्वेव देशेषु नानाविधशासनानि सन्ति, तेषु स्वस्वविचारधाराभिरौचित्यमनौचित्यं वा भवतु, यतो हि सर्वत्रैव गुणैः सह दोषा अपि भवन्ति । किन्तु शासनव्यवस्थासु सदोष शासन राजतन्त्रमेव । तत्र न कोऽपि व्यक्तिविशेषः स्वयोग्यतायाः कार्यकुशलतायाश्च प्रदर्शनाय अवसरं लभते । अतः सर्वोत्तमं शासनं प्रजातन्त्रमेव, यत्र प्रत्येकं मानवः स्वयोग्यतायाः पूर्णपरिचयं दातुं क्षमः । यावत् शासने जातीनां भेदभावः प्राचुर्येण उपलभ्यते; तावत् देशस्य जनताऽऽन्तरिकं स्नेहं, सहानुभूतिं, न्यायं, सामूहिकहितं च नानुभवितुं शक्नोति । अतः अस्य पूर्णतया निराकरणं भवेत् । तदैव सर्वे मानवाः **"संघे शक्तिः कलौ युगे"** इत्युक्त्यनुसारम् एकसूत्रबद्धा भूत्वा मनोवाक्कायकर्मभिः देशस्य अभ्युदये निरता भविष्यन्ति ।

भ्रष्टाचारः – सम्प्रति देशे भ्रष्टाचारो नितरां वर्धते । स्वार्थं साधयितुम् अनैतिकव्यापारेण परेभ्यो द्रव्यग्रहणमेव भ्रष्टाचारः कथ्यते । अयमेव उत्कोच इतिनाम्ना व्यवह्रियते । सम्प्रति मानवस्य इय स्वाभाविकी रुचिर्यत् स स्वमित्राणां परेषां वा समक्षं स्वकीयं दैन्यं वास्तविकीं स्थितिं वा गोपयित्वा बाह्यपरिवेषेण स्वं धनिनं सम्पन्नं वाऽभिव्यनक्ति । तत् स्वल्पवेतनेन न सिध्यति । अतः स स्वार्थसाधनायानैतिकं व्यापारं करोति । अयं व्यापारो न केवलं दीनैरेव क्रियते, अपितु वरिष्ठैः अधिकारिभिरपि क्रियते । सामान्यजनः सामान्येन उत्कोचेनैव तुष्यति, वरिष्ठश्च अधिकेनोत्कोचेनापि न तुष्यति । एतेन देशस्य या स्थितिर्भवति सा सर्वैरेव ज्ञायते । ये तावत् अतिदीनास्ते कदापि कस्यामपि अवस्थायां स्वकार्यसिद्धिं न कर्तुं पारयन्ति । ये केचन सत्यनिष्ठाः कर्मठा वा सज्जनाः सन्ति, ते विरला एव । ते भ्रष्टाचारपरायणेषु स्वकीयां स्थितिं न कर्तुं पारयन्ति; ते पुनः पुनः स्थानान्तरिता भवन्ति, कष्टानि च लभन्ते । अतः देशस्य उन्नत्यै भ्रष्टाचारनिरोधोऽत्यावश्यकः ।

अनियोजन-समस्याः–कस्मिन्नपि देशे राष्ट्रे वा कुप्रवृतीनां स्वच्छन्दतया प्रसारस्य मूलं कारणं स्वार्थपरायणता सङ्कुचिता मनोवृत्तिश्च । सम्प्रति शिक्षाया नाम्ना प्रचारस्तु अत्यधिको दृश्यते, अत्यधिकाश्च छात्राः प्रतिवर्षं स्नातका अविस्नातकाश्च भवन्ति, किन्तु ते केवलं विश्वविद्यालयद्वारा प्राप्तोपाधिका एव, तेषु दशांशतोऽपि मानवाः योग्या न सन्ति । ते सर्वेऽपि नियोजनमिच्छन्ति । श्रमिकस्तु येन केनापि प्रकारेण स्वोदरपूर्तिं कर्तुं प्रभवति, किन्तु अत्यधिकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षिता मानवाः सामान्यं कार्यं कर्तुं लज्जामनुभवन्ति, स्वपित्रोर्देशस्य च भारभूता भवन्ति।

अतः अस्य दोषस्य निराकरणाय सर्वकारेण उपायाः अवलम्बनीयाः। शिक्षापद्धतौ आमूलसुधारः, विशेषतः शिक्षायां तकनीकप्राविधिकविषयाणां समावेशः, प्रतिगृहं लघुकुटीरोद्योगाश्च स्थापनीयाः। किन्तु न केवलं सर्वकारस्येदं कर्त्तव्यम्, सर्वाभिः जनताभिः यदि भ्रष्टाचारनिरोधाय जागरूकाभिः कृतप्रयासाभिः भवितव्यम्, तदैव राष्ट्रस्य कल्याणं स्यादिति।

—**—

अनुशासनम्

– जयभगवान् शर्मा
व्याकरण-पूर्वमध्यमाप्रथमवर्षीयः

*

पूर्वनिश्चितानां प्रियतमानां ज्येष्ठानाञ्चाज्ञायाः पालनमेवानुशासनं कथ्यते। जीवनस्य देशस्य समाजस्य च प्रत्येकभागे अनुशासनस्य महत्यावश्यकता वर्तते। अस्माकं प्रत्येककार्येऽनुशासनस्य महत्त्वमनुभूयते। यदि वयं शौचस्नान-भोजन-शयन-वस्त्रधारणादिविषयेऽपि निश्चितनियमान् न पालयिष्यामः, तर्हि अस्माकं स्वास्थ्यमपि नङ्क्ष्यति। यदि वणिग् व्यापारे उच्छृंखलताया आचरणं करिष्यति, तर्हि स व्यापारे कदापि लाभं न प्राप्स्यति। यदि धूमयानस्य चालकः अनुशासनं त्यजेत्, तर्हि विभिन्नानां धूमयानानां परस्परसंघट्टनेन कतिसंख्याकानां धनजनादीनां हानिः भवेदिति वक्तुमशक्यम्।

अनुशासनपालनस्येयं भावना बाल्यादेव प्रवर्तते। तारुण्ये तु तदनुसरणं कठिनम्। यतो हि बाल्यकाले बालकानां स्वभावः कोमलो भवति, स सारल्येन परिवर्तितुं शक्यते। अस्मादेव कारणात् विद्वद्भिः बाल्ये एवानुशासनस्य महत्त्वमुपदिश्यते।

अनुशासनभावनां विना विद्यार्थिनः स्वगुरूणामाज्ञापालनं न करिष्यन्ति, ते अध्यापनं प्रति सावधानाः न भविष्यन्ति, स्वपाठमपि न स्मरिष्यन्ति। ते शिक्षणकाले किमपि न ज्ञास्यन्ति। अतः विशेषतः छात्रैरनुशासनस्य पालनमवश्यं विधेयम्।

—**—

निष्ठा स्थैर्यवती विवेकजनिता श्रेयस्करी भावना,
विघ्नव्यूहप्रताडिताऽपि नितरां धैर्यं वहन्ती मतिः।
स्थाने दृष्टिदशेमुषी ह्यभिनवा कर्त्तृत्वनिःसङ्गता,
स्यादेवं गुणसम्पदा यदि सखे! लक्ष्यं तदा प्राप्यते॥

–शुकदेवदासः शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवारनियोजनम्

–जमुनादत्तो द्विवेदी
साहित्य-शास्त्रिद्वितीयवर्षीयः

*

वर्तमानसमये मनुष्यस्य पार्श्वे स्वपूर्वजानां यदि कश्चित् निधिः, तर्हि परिवार एव। परिवारः मानवस्य सा संस्था यस्याः स्थापना तेन सृष्टि-प्रारम्भिक-क्षणेषु सभ्यताया उदयेन सह कृता। मनुष्यः स्वपरिवारवृद्धिं दृष्ट्वा सुखमनुभवति।

परिवारे निवसन् मनुष्यः आनन्दपूर्वकं दिनानि यापयति। सहभोजनेन कियान् आनन्दो भवति इति पारिवारिका एव जानन्ति। किन्तु महर्घताकाले इयं व्यवस्था शिथिला भवति तदर्थं सुव्यवस्थितरूपेण परिसंचालनाय साम्प्रतं सर्वकारेण परिवारनियोजनस्य निश्चयः कृतः, अस्य स्वीकरणेन केवलं परिवार एव न, अपितु देशः अपि लाभान्वितो भविष्यति।

एधमानां जनसंख्यां दृष्ट्वा अनुमीयते यत् अद्यप्रभृति किंचिद्वर्षानन्तरं स्थितिस्तावत् दूरे आस्ताम्, पृथिव्यां पादस्थितिरपि दुष्करा भविष्यति। अस्मिन् क्षणभंगुरे जीवने सर्वे जनाः आत्मानं सुखिनं समृद्धं च इच्छन्ति। वर्तमानसमये अनेकसन्तानोत्पादनेन तस्य विपरीतं दृश्यते, येनमनो व्याकुलं भवति। यस्य मनुष्यस्य यावन्तः सन्ताना भविष्यन्ति, तस्य तावत्येव अधिका चिन्ता भविष्यति। यतो हि एतेषां सर्वेषां कृते शिक्षादीक्षादिकं मातृपित्रोः परमं कर्तव्यं स्यात्। मानसिकशान्त्यर्थमपि परिवारनियोजनस्य न्यूनं महत्त्वं नास्ति। अनेन केवलं एकव्यक्तेरेव न अपितु सम्पूर्णराष्ट्रस्य लाभो वर्तते। अतः भारतीयार्थव्यवस्थां सुदृढां सुव्यवस्थितां च कर्त्तुं परिवारनियोजनमत्यन्तमावश्यकमस्ति।

परिवारनियोजननेन मानवानाम् अनेके लाभाः भविष्यन्ति। मानवः स्वजीवनं सुखेन शान्त्या च व्यतीतं करिष्यति। परिवारे न्यूनसदस्ये सति पारस्परिककलहादीनि नैव भविष्यन्ति। भारतीयार्थव्यवस्थायाः निर्धनतायाः च कलंकं सर्वदाऽपनेतुं यत्र भारतदेशः अनेकयोजनाभ्यो जन्म अदात्, तत्र परिवारनियोजनस्य कृते स्वस्थसुलभविश्वसनीयसाधनानां प्रयोगाय वैज्ञानिका नूतनाविष्कारं कुर्वन्ति। परिवारनियोजनं सफलीकर्तुं कोटिशो रूप्यकाणां धनराशिः व्ययः क्रियते। स्थाने-स्थाने परिवारनियोजनकेन्द्राणि च उद्घाटितानि।

परिवारनियोजनान्दोलनं तदैव सफलं सम्भवेत्, यदा सर्वे भारतवासिनः सुशिक्षिताः स्युः। यावत् अज्ञानान्धकारो भविष्यति, तावत् सर्वकारः सन्तोषं नैव प्राप्नुयात्। अतः स्वजीवनं सुखीकर्तुं परिवारनियोजनस्वीकरणं प्रत्येकनागरिकस्य परमं कर्तव्यं भवति।

—**—

समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति॥

–ऋग्वेदः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुभुक्षितः किं न करोति पापम् ?

भुवनचन्द्रो जोशी 'कः'
साहित्य-शास्त्रि-द्वितीयवर्षीयः

*

बुभुक्षितः किं पापं न करोति? धनेन हीनः दयया क्षीणः भवति । सा एव दशा सम्प्रति अस्माकं देशस्य वर्तते । सर्वत्र स्तेयलुण्ठनताहिंसाचौरकर्मादिप्रवृत्तीनामेव समाचाराः प्रत्यहं श्रूयन्ते । एवं सम्प्रति जनानां जीवने आनन्दोल्लासादिकं न जाने क्व विलीनम् ? जनाः कुटुम्ब-पालनपोषणादिकमेव प्रत्यहं चिन्तयन्ति । तत्रैव ते अवकाशं न लभन्ते । कामं सदुपायेन असदु-पायेन वा धनमुपार्जयेयुः. शिक्षिताः अशिक्षिताः वा, श्रमिकाः बौद्धिकाः वा, सर्वे एव जीवनस्य सौकर्यं चिन्तयन्ति । ते सर्वदा इदमेव विचारयन्ति यत् वयं कथं सुखिनः स्याम, कथं वा साधु जीवनं यापयेम ?

श्रमिकाः येन केनाप्युपायेन स्वोदरपूर्तिं कुर्वन्ति, परन्तु शिक्षिताः अकर्मण्याः सन्तः काठिन्येन जीवनं यापयन्ति । अद्यत्वे अत्यधिकं शिक्षिताः मानवाः धनेन क्रीयन्ते इति सुवचम्; किन्तु तेषां जीवनसमस्यासमाधानमतीव दुष्करम् । वयं स्वतन्त्रा अपि आर्थिकस्वतन्त्रताहीनाः स्मः । एकस्तावत् सुखी अपरश्च दुःखी इति अस्याः दशायाः मम मते अनेके हेतवः सन्ति :—

उचितशिक्षायाः अभावः

अयमस्ति 'लार्डमेकाले'- निर्दिष्टशिक्षाव्यवस्थादोषः यस्यां शिक्षायां जनानाम् आभ्य-न्तरं दास्यं, बाह्यं च, पाश्चात्यवत् चाकचिक्यम् । अतः अनियोजनावस्था देशे अनुदिनं वर्धमानाऽऽस्ते । वर्तमानायां शिक्षाप्रणाल्यां व्यावसायिक्याः औद्योगिक्याश्च शिक्षायाः नितान्तम् अभावो दृश्यते । कदाचित् जवाहरलालनेहरुणा स्वभाषणे कथितं यत् प्रतिवर्षं नवलक्षमिताः छात्राः नानापरीक्षाः उत्तीर्य सेवायोग्याः भवन्ति, किन्तु तेषां शतांशानि स्थानान्यपि नियोज-नाय न सन्ति सर्वकारस्य समक्षम् । वयं 'बी०ए०' 'एम०ए०' पदवीभाजो न वाञ्छामः, अपितु तकनीकप्राविधिकशिक्षायुक्तान् छात्रान् वाञ्छामः ।

लघूद्योगाभावः

पुरा प्रतिगृहं लघूद्योगाः आसन् । सम्प्रति पाश्चात्यशिक्षाप्रभाविताः यन्त्रैरेव सर्वविध-कार्याणि साधयित्वा तेभ्यो महत्त्वं न ददति । तेन आधुनिकमानवाः अकर्मण्याः सन्तः पर-मुखापेक्षा जाताः ।

जनसंख्यावृद्धिः

अनुदिनं भारते भवति सन्तानोत्पत्तिः, यया नियोजनसमस्याऽपि स्वत एव वर्धते । देशः, भूमिः, कार्यं तान्येव, किन्तु उपभोक्तॄणां बाहुल्येन वस्तूनां स्वल्पत्वं जायत एव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिथ्याभिमान:

सम्प्रति मानव: कर्तव्यपथात् प्रमाद्यन् मिथ्याभिमानी भूत्वा यत्किञ्चित् कर्म कर्तुं लज्जामनुभवति । अत एव भारते नाना कुरीतय: जायन्ते, समस्याश्च उत्पद्यन्ते ।

सात्त्विकदानाभाव:

सम्प्रति भारतीया: नानाविधम् अत्याचरन्त: स्वकीयपापकर्माणि गोप्तुं देशकालपात्राण्यविचार्य यस्मै-कस्मैचित् काषायवस्त्रधारिणे भिक्षुकाय वा दानं दत्वा स्वकर्तव्यस्य इति मन्यन्ते ।

अत: अनियोजनसमस्या: समाधातुं देशे व्यावहारिकी शिक्षा आवश्यकी, न तु केवलं 'बी० ए०' 'एम०ए०'– इत्याद्युपाधय: । छात्रा: स्वावलम्बिनो भवेयु: । नष्टप्रायाणां लघूनाम् उद्योगानाम् विकास: आवश्यक: । जनसंख्यावृद्धिश्च अनिवार्यत: परिहार्या । सार्वकारिकव्ययविशेषेषु निरोध: आवश्यक: । तथा च जनेषु श्रम:, श्रमिकान् प्रति च आदरभाव: वर्धनीय:, मिथ्याभिमानस्त्याज्य:, मिताहार-व्यवहारपरं जीवनं स्वीकर्तव्य चेति विस्तरभयादत्रैव विरम्यते ।

—❀❀—

नारीस्वातन्त्र्यम्

– स्वामी परमप्रकाश:

वेदान्ताचार्य-प्रथमवर्षीय:

❀

अस्मिन् युगे अयं विवादास्पदविषय: यत् नारीणां स्वातन्त्र्यम् स्यान्न वेति । ये नारीस्वातन्त्र्यसमर्थका: सन्ति ते एवं कथयन्ति–भारतीयसंस्कृतौ नार्य्या: उच्चतरं स्थानं विद्यते । उक्तञ्च–**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:** । दुर्भाग्यवशात् बहुकालात् आरभ्य पुरुषवर्ग: धने साधनेषु च स्वप्रभुत्वमारोप्य नारीवर्गं पराधीनताया: निगडेऽबध्नात्, किन्तु अयमत्याचार एव । नारी प्रत्येकदृष्टचा पुरुषसमानत्वमर्जितुं शक्नोति । सत्यपि कोमलगुणानां वैशिष्ट्ये नारीषु न एवं किमपि दौर्बल्यं दृश्यते येन सा पुरुषाधीनत्वं विना किञ्चित् कर्तुं न पारयेत् । इदं स्पष्टं यत् नारी विद्यायां, ज्ञाने, साहसे, धैर्ये, जीविकोपार्जने च पुरुषापेक्षया हीनां स्थितिं न भजते । इतिहासे ता: नार्य: प्रसिद्धा:, या: शासने, आत्मज्ञाने, विज्ञाने, शासनतन्त्रे, कवित्वे, अन्येषु च साहसिकेषु कार्येषु सर्वोच्चस्थितिं प्राप्नुवन् । अस्मिन्नेव युगे अस्माभि: दृश्यते यत्– 'विक्टोरिया', भण्डारनायके', 'इन्दिरा गान्धी', 'गोल्डामायर'–प्रभृतय: नार्य: देशस्य शासनाध्यक्षपदमलङ्कुर्वन्ति । किं बहुना ? अध्यापने शासनतन्त्रे सेनासु अन्येषु च क्लिष्टतमेषु कार्येषु, सर्वत्र पुरुषसमत्वमाप्य नारी कर्तव्यपरायणा दृश्यते । सा पुरुषस्य सहधर्मिणी सहचरी चा अस्ति । स्त्रीपुरुषौ परस्परं सम्बद्धौ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परन्तु उपर्युक्तं मतं न समीचीनम्, यतो हि स्वातन्त्र्यस्येदं न तात्पर्यं यज्जनाः यत्किञ्चित्कुर्वन्तु, कस्यापि जनस्य सहयोगं, कस्यचित् वस्तुनः साहाय्यं वा न गृह्णन्तु । एवं तु पुरुषोऽपि स्वतन्त्रो भवितुं नार्हति, यतो हि तस्यापि जीवने पदे पदेऽन्येषां वस्तूनां साहाय्यमपेक्षते एव । अस्मिन् प्रसङ्गे स्वतन्त्रतायाः इदमेव तात्पर्यं यत् नरो नारी वा अन्यतरनियन्त्रणं विना स्वजीवने सफलतां प्राप्तुं शक्नोति न वेति ।

इयं प्राचीनकालतः धारणा प्रचलति यत्पुरुषः नार्याः नेतृत्वं विनापि स्वजीविकामर्जयितुं शक्नोति । इदं सत्यं यत् नरो नारी च परस्परं पूरकौ विद्येते, किन्तु तत्र प्राधान्यं नरस्यैव भवति । तस्मादेव कारणात् पुरुषः स्वतन्त्रः इति कथ्यते । प्रकृतेरयमनुल्लङ्घनीयनियमो वर्तते । प्रकृत्या नारी शरीरेण मनसा चैवं निर्मिताऽस्ति यत् सा नरस्याधीनतायामेव स्वजीवनं कृतकृत्यं मन्यते इति तस्याः सहजा प्रकृतिः । उक्तञ्च जयशङ्करप्रसादेन– **"सर्वस्व समर्पण करने की ममता जगती है माया में"** । नारी स्वभावतः हृदयप्रधाना भवति । दया, करुणा, लज्जा, श्रद्धा, भक्तिः, उत्सर्गः इत्यादयो नार्य्याः स्वाभाविकाः गुणाः । न एभिर्गुणैः कोऽपि जनः आत्मनि अन्येषु वा शासन कर्तुं शक्नोति । भावनाप्रधानवस्तुनः कृते अन्यस्य सरक्षणं सर्वथा अपेक्षितं भवति । बुद्धिप्रधान एव नरः आत्मानम् अन्यं वा नियन्त्रयितुं शक्नोति । नार्य्याः स्वाभाविकीम् अन्याधीनतां प्रतिपादयता जयशङ्करप्रसादेनोक्तम्—

"नारी तुम केवल श्रद्धा हो, विश्वास रजत नग पग तल में ।
पीयूष स्रोत सी बहा करो, जीवन के सुन्दर समतल में" ।।

ये जनाः नारीं स्वतन्त्रां चिकीर्षन्ति, ते सुवर्णलतिकां पाषाणमयीं लौहमयीं वा कर्तुमिच्छन्ति । स्त्रियाः शरीरं सहजं कोमलं कमनीयं च भवति । एवंविधेन शरीरेण नारी न सर्वथा आत्मनियन्त्रणं शासनं पुरुषकर्माणि वा कर्तुं शक्नोति, अपि तु एवंविधं शरीरं यदा कदा नार्याः कृते भीतिजनकं भवति इति ज्ञायते सर्वैः । अतः नारी शरीरेण मनसा च एवविधा निर्मिताऽस्ति यत् सा पुरुषाधीनत्व विहाय स्वजीवने सर्वथा सफला भवितुं नार्हति । अनेकाः नार्यः स्वतन्त्राः आसन् सन्ति च इति कथनं न समीचीनम्, यतो हि कतिपये एवंविधाः पुरुषाः अपि भवन्ति ये स्त्रैणाः अर्थात् स्त्रीगुणयुक्ताः भवन्ति । किमनेनोदाहरणेन इदं कथयितुं शक्यते यत् पुरुषः स्वतन्त्रो भवितुं नार्हति । तस्मात् कारणात् कासांचिन्नारीणामुदाहरणेन इद कथयितुं न शक्यते यन्नारी स्वातन्त्र्यमर्हति । तस्मात्कारणात् नारी स्वातन्त्र्यं नार्हति इति निश्चितम् ।

—*—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्त्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।

[अभिज्ञानशाकुन्तलम्]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मनिरपेक्षतायाः तात्पर्यम्

– स्वामी चेतनस्वरूपः
व्याकरणाचार्यप्रथमवर्षीयः

*

स्वातन्त्र्योत्तरम् अस्माकं भारतं धर्मनिरपेक्षं राष्ट्रम् उद्घोषितम् । किन्तु बहवो जनाः धर्मनिरपेक्षतायाः तात्पर्यं न जानन्ति, अस्य शब्दस्य विपरीतार्थञ्च कुर्वन्ति । अतः अस्मिन् विषये विचारः आवश्यकः ।

धर्मनिरपेक्षतायाः स्वरूपज्ञानाय पूर्वं 'धर्म'शब्दस्य अर्थनिर्णयः अपेक्षितो भवति । संस्कृत-साहित्ये 'धर्म'शब्दस्य अनेके अर्थाः उपलभ्यन्ते । क्वचिद् अस्य अर्थः वस्तुनः सारः, क्वचित् गुणविशेषः, क्वचिच्च नियमः कर्त्तव्यं वा भवति । जनसामान्ये अयं शब्दः अध्यात्म-विद्यायाम् ईश्वरानुरागे, उपासनापद्धतौ वा रूढो विद्यते । किन्तु एषु अर्थेषु किमपि राष्ट्रं धर्मनिरपेक्षं भवितुं नार्हति, यतो हि प्रत्येकं राष्ट्रस्य कश्चित् सारः तत्त्वं वा, गुणविशेषः, नियमः कर्तव्यं वा भवत्येव अथवा एतानि राष्ट्रे अपेक्षितानि भवन्त्येव । इत्थमेव राष्ट्रे काचित् उपासनापद्धतिः अध्यात्मविद्या वा प्रचलिता भवति, तथा च ईश्वरानुरागः इष्टभक्तिर्वापि । अतः अस्मिन्नपि अर्थे धर्मनिरपेक्षता न संभाव्यते ।

अतः 'धर्म' शब्दः अस्मिन् सन्दर्भे सम्प्रदायेषु धार्मिकवर्गविशेषेषु वा रूढः अस्ति । एषां सम्प्रदायानां धार्मिकानाञ्च काश्चित् भिन्नाः उपासनापद्धतयः केचित् भिन्नाः इष्टाश्च दृश्यन्ते, येषां मूलं परम्परा इतिहासो वा भवति ।

इत्यमेव 'राष्ट्र'शब्दस्यापि अर्थविशेषो विद्यते । सामान्यतः राष्ट्रशब्दस्यार्थे कश्चित् देशः, तस्य जनताः, शासनतन्त्रं च अन्तर्भवन्ति । किन्तु जनताः, देशो वा केनापि सम्प्रदायेन धर्मेण वा सर्वथा असम्बद्धो भवितुं नार्हति । अतः अत्र राष्ट्रशब्दस्य अर्थः शासनतन्त्रं शासक-वर्गो वा वर्तते ।

एवञ्च इदं फलति यत् शासनतन्त्रं शासकवर्गो वा केनापि सम्प्रदायेन धार्मिकवर्ग-विशेषेण वा सम्बद्धो न भवेत्, अथवा एतस्य काञ्चित् उपासनापद्धतिं प्रति विश्वासं प्रति वा पक्षपातः अनुरागो वा न भवेदिति धर्मनिरपेक्षतायाः अर्थो विद्यते । किन्तु एतदपि न सम्भवति यत् शासनतन्त्रम् अस्मिन् विषये सर्वथा उदासीनं स्यात्, यतो हि शासनतन्त्रं जनहिताय भवति, जनाश्च सम्प्रदायेन उपासना-पद्धत्या वा अपरिहार्यतया संसक्ताः भवन्ति । अतः शासन-स्यापि अस्मिन् सन्दर्भे किमपि कर्तव्यं भवत्येव । इत्थञ्च, शासनं समेषां सम्प्रदायानां समानं सरक्षणं संवर्द्धनादिकञ्च कुर्यादिति धर्मनिरपेक्षतायाः फलितोऽर्थः । अन्येषु शब्देषु एतत्तात्पर्यं सर्वधर्मसमभावः सर्वसम्प्रदायसमभावो वा वर्तते ।

केचित् कथयन्ति यत् शासकाः अधार्मिकाः नास्तिकाः वा सन्ति, इत्येव धर्मनिरपेक्षता। तत्तु सर्वथा अनुचितम् अनर्थकं च । ते वस्तुतत्त्वं न जानन्ति । भारते बह्व्यः जातयः बहवः सम्प्रदायाश्च सन्ति । अस्यां दशायां न तु कस्यचित् जातिविशेषस्य सम्प्रदायविशेषस्यैव वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनाः शासकाः भवितुमर्हन्ति, न वा शासकाः कञ्चित् धर्मं प्रति पक्षपातं कर्त्तुं शक्नुवन्ति । अन्यथा राष्ट्रे शोषणेन परिपीडनेन च महान् संघर्षो भवेत्, येन राष्ट्रे कथमपि शान्तिः उन्नतिर्वा भवितुं नार्हति । अतः शासनस्य सर्वान् सम्प्रदायान् प्रति समदृष्टिः स्यादित्येव हितावहम् । एतदेव विचिन्त्य अस्माकं संविधान-निर्मातृभिः राष्ट्रं धर्मनिरपेक्षमुद्घोषितम् । अस्माभिः अस्य यथोचितं तात्पर्यं ज्ञात्वा सर्वधर्मसमभावस्य प्रचारप्रसारौ आचरणं च कार्यम् इति सर्वेषां पुनीतं कर्त्तव्यम् ।

—※—

सम्प्रति संस्कृतशिक्षाया उपादेयत्वम्

– राजाराम उनियालः
साहित्य-व्याकरणाचार्यः, एम०ए०–साहित्यविभागाध्यक्षः

※

प्रथमं तावदिदं विचारणीयं भवति यत् कस्या अपि शिक्षायाः किमुद्देश्यम्, तत्पूरयितुमन्यशिक्षापेक्षया संस्कृतशिक्षाऽधिकसमर्थाऽस्ति न वा ? यद्यधिकसमर्था तर्हि तस्या महत्त्वं स्वयमेव सिद्ध्यति, इत्यस्मिन् विषये विचार्यते किञ्चित्– अद्य केचन भ्रान्ता जनाः शिक्षाया उद्देश्यं स्वोदरभरणमात्रं मन्यन्ते, केचन सुन्दरवस्त्रधारणं सुस्वादुभोज्यभक्षणं सुस्वादुपेयपानं सुकुमारशय्याशयनमेव जानन्ति, केचन च नृपतुल्यस्रक्चन्दनवनितादिविषयभोगलाभमेव स्वीकुर्वन्ति । जानन्तु नाम ते तथैव, परन्तु शिक्षाया उद्देश्यं तु किमप्यन्यदेवास्ति । शिक्षायाः प्रधानमुद्देश्यमानन्दप्राप्तिरस्ति, सा च स्वल्पप्रयत्नसाध्या नास्ति । न च शिक्षां विना भवितुं शक्नोति ।

आनन्दस्य कारणमुन्नतिः । सापि न केवलमात्मन एव, अपि तु समाजस्यापि । उन्नतेः कारणं बुद्धिविकासः । स च यथा संस्कृतशिक्षाद्वारेण भवितुं शक्नोति, न तथान्यशिक्षया । संस्कृतशिक्षायां हि प्रथमं व्याकरणाध्ययनमावश्यकं भवति । अत्र मूलत एव यादृशी सूक्ष्मता विद्यते न तादृशीतरशिक्षासु । अत्र हि वर्णज्ञानत एव सूक्ष्मता प्रारभ्यते । "अ इ उ" इत्यादयो वर्णाः कुतो निःसरन्ति ? किं तेषां स्थानम्, कश्च प्रयत्नः ? ततः, पदं किम् ? तत्र का विभक्तिः, कश्च प्रत्ययः ? ततः, पदस्य का व्युत्पत्तिः ? का प्रकृतिस्तत्र ? कः प्रत्ययः ? क उपसर्गः, को धात्वर्थः ? कश्च प्रत्ययार्थः ? इत्येवंप्रकारकं सूक्ष्मविवेचनमेव वस्तुतो बुद्धिविकासकारणम् । तर्कमूलत्वादरुचिकर एष विषयः । तदनन्तरं काव्यानामध्ययनं भवति । तत्रापि नानार्थकवाक्यानि सन्ति । व्युत्पत्तिभेदेन विग्रहभेदेन च तेषां विभिन्ना अर्थाः प्रतीयन्ते । तेऽपि वेदादिशास्त्रसम्बद्धा लोकसम्बद्धाश्च । कुत्र कस्यार्थस्य कीदृशी सङ्गतिः ? इत्यादि सूक्ष्मतापि बुद्धिविकासस्य महत्कारणम् । एवमेव शिक्षाकल्पनिरुक्तज्योतिषसंज्ञकेषु वेदाङ्गेष्वपि सूक्ष्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवेचनपद्धतिरेवास्ति। एवं च वेदाङ्गानामध्ययनानन्तरं वेदाध्ययनं भवति, तत्रापि ज्ञान-विज्ञानयोः सूक्ष्मता वर्तते। ईदृशं सूक्ष्मविवेचनप्रधानं विशालं साहित्यमन्यशिक्षासु न विद्यते। संस्कृतशिक्षया बुद्धिविकासस्तु भवत्येव परन्त्वन्योऽपि लाभो भवति; यदत्र मग्नो जनः तावत्कालं सांसारिकरागद्वेषादिदुःखकारणानि विस्मरति, मनसोऽवकाशाभावेनानर्थमपि न चिन्तयति। वेदाध्ययनानन्तरं दर्शनानामध्ययनं भवति। इदन्त्वतीव सूक्ष्मं विद्यते। किं शरीरम्? क आत्मा? किं मनः? कानीन्द्रियाणि? किं नित्यम्? किमनित्यम्? इत्यादि। इदमेवाध्यात्मज्ञानमुच्यते। अनेनापि बुद्धिविकासस्तु भवत्येव। परन्तु तेन सह नित्यानित्यवस्तुविवेकरूपज्ञानेनानन्दलाभोऽपि भवति। एवं संस्कृतशिक्षायां वेदवेदाङ्गदर्शनानां तत्सम्बद्धधर्मशास्त्रेतिहासपुराणकाव्यनाटकादीनाञ्चाध्ययनं भवति। अनेन बुद्धिविकासः सर्वथा सुलभः। तेन चोन्नतिस्तया चानन्दलाभः।

बुद्धिविकासेनानन्दः स्यादेव, इत्यपि वक्तुं न शक्यते। यतश्चौर्यगृहननपरप्रतारणपरदारगमनादीन्यपि बुद्धिविकासस्यैव फलानि। एभिश्च कर्मभिः स्वल्पं सुखं, प्रतिक्रियाशङ्कया च महद्भयम्। तर्हि कीदृशेन बुद्धिविकासेनानन्दो भवेद्? इति जिज्ञासायामुच्यते—संस्कृतशिक्षेतरशिक्षाकृतबुद्धिविकासेन तादृशानि कर्माणि स्युरपि, परन्तु संस्कृतशिक्षाकृतबुद्धिविकासेन नास्ति तेषां सम्भावनापि। तदित्थम्—आनन्दलाभ आत्मोन्नत्या समाजोन्नत्या च भवति। केवलयाऽऽत्मोन्नत्या तु केषाञ्चिदेवारण्यवासिनां पर्वतकन्दरनिवासिनां वा स्यात्। समाजे वसतामानन्दस्त्वात्मनोन्नत्या सह समाजोन्नत्यैव भवेत्। अनयोः साधनं तु बुद्धिविकासः। तस्य च रूपद्वयम्—ज्ञानं विज्ञानञ्च। तर्हि किं ज्ञानं किं विज्ञानमित्यपेक्षायामुच्यते—स्वस्वरूपाभिज्ञानपूर्वकं सर्वत्रात्मभावदर्शनं ज्ञानम्। मानवस्य कृते सौविध्यान्वेषणं तत्प्राप्तिश्च विज्ञानम्। द्वाभ्यामप्यात्मोन्नतिसमाजोन्नती भवितुं शक्नुतः, सुखं च प्राप्तुं शक्यते। परन्तु विज्ञानजनितात्मोन्नतिसमाजोन्नतिसुखेषु हिंसाविषमताऽनित्यताऽनिश्चयादयो दोषाः सन्ति। भयञ्च सर्वदा सर्वत्र सर्वस्याग्रे नृत्यति। यथा—विज्ञानजनितविनाशसाधनभयम्, दैनिकजीवने च कदाचिदपि नानावैज्ञानिकयन्त्रसंघट्टदुर्घटनाभयम्। एतद् विपरीतं ज्ञानजनितात्मोन्नतिसमाजोन्नतिसुखेष्वहिंसासमतानित्यतानिश्चयादयो गुणाः सन्ति। सर्वत्रात्मभावदर्शनाच्च नास्त्यत्र भयस्यावकाशः। अतो वक्तुं शक्यते यद् ज्ञानप्रधानायाः संस्कृतशिक्षाया अस्ति महन्महत्त्वम्, तेन च साऽवश्यमेवानिवार्यतां गन्तुमर्हति। तदिदं फलितं यद् बुद्धिविकासेन तदैवानन्दो भवेद् यदात्मोन्नत्या सह समाजोन्नत्या अपि सततं प्रयत्नः क्रियेत। आत्मोन्नत्यां तदैव सफलता भविष्यति यद्यपरोऽपि जनः सुखी स्यात्। अपरजनदुःखमप्यात्मोन्नत्यां बाधकं तत्त्वम्। कश्चिदपि जनः सुखं शान्तिञ्च तदैव लब्धुं शक्नोति, यदा तत्समीपस्थजनेषु शान्तिः स्यात्। समीपस्थञ्च तदैव शान्तिं सुखं वा लब्धुं शक्नोति, यदा तत्प्रतिवेशिनां सुखं शान्तिर्वा स्यात्। इत्थं सुखस्य शान्तेश्च मूलं जनानां परस्परसम्बन्धोऽस्तीति फलितार्थः। स एव विश्वबन्धुत्वमूलम्। संस्कृतशिक्षा च विश्वबन्धुत्वमेवोपदिशति। संस्कृतवाङ्मयस्य सारभूतानि वचनान्युपदिशन्ति यत्—"श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत्"॥ "अष्टादशपुराणेषु व्यासस्य वचनद्वयम्। परोपकारः पुण्याय पापाय परपीडनम्"॥ "अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्"॥ "विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय। खलस्य साधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय"॥ एतेषामेतादृशानाञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनानामध्ययनेन बोधेनाचरणेन प्रचारणेन च यथा समाजः सुव्यवस्थितो भवितुं शक्नोति न तथान्येनोपायेन । जनमनःसु विद्यमानान् समाजस्य सुखशान्तिबाधकान् छलस्वार्थपरतादिदोषान् दूरीकृत्य सुखं शान्तिञ्च स्थापयितुं संस्कृतशिक्षा प्रगर्जति । अतः सिद्धमेतद् यत् संस्कृतशिक्षया जन आत्मोन्नत्या सह समाजोन्नतिं विधायात्मानं समाजञ्च सानन्दं कर्तुं प्रभवति । अतोऽस्ति संस्कृतशिक्षाया महन्महत्त्वम् ।

अधुना स्वसंस्कृत्यवहेलनेनेतरसंस्कृत्यवलम्बनेन चास्माकं समाजस्य स्थितिश्चिन्तनीया वर्तते । अद्य सदाचारस्य महत्त्वं न दृश्यते, स्वार्थपरायणतायाः प्राधान्यं दृश्यते, कर्तव्यपरायणता न दृश्यते, जना अल्पं कर्म कृत्वाधिकं फलमिच्छन्ति, बाह्यसौन्दर्यसम्पादने निरता दृश्यन्ते, मनःशुद्धिं प्रति प्रयत्नशीला न दृश्यन्ते । अनया स्थित्या जनमानसानि क्षुभितानि सन्ति । एतान् दोषान् दूरीकर्तुं संस्कृतशिक्षैव समर्था । अस्यां तादृशा उपदेशप्रधाना विषयाः सन्ति, ये कुमार्गप्रस्थितानां हृदयानि शीघ्रमेव वशीकृत्य तत्र सरलतया सद्गुणान् स्थापयितुं समर्थाः । सत्यस्याभिज्ञानेन यथा पापं निवारयितुं शक्यते न तथा दण्डेन । त्यागेन यथान्तःकरणं पवित्रं भवति न तथान्येनोपायेन । ईदृशं ज्ञानं संस्कृतशिक्षैव दातुं शक्नोति, अतोऽधुनानिवार्यतामर्हति ।

संस्कृतशिक्षायामेव सर्वमान्याऽस्माकं संस्कृतिः स्थिताऽस्ति । संस्कृतशिक्षयैव तस्याः रक्षणं भवेत् । स्वसंस्कृतेरवलम्बनेन च पूर्ववदस्माकं महत्त्वं स्थातुं शक्नोति । किञ्च वर्तमानराष्ट्रभाषा हिन्द्यनयैव सप्राणा बलवती च भवितुं शक्नोति । संस्कृतशिक्षाया इदं महन्महत्त्वं वर्तते यदत्र पदे-पदे सत्यस्य सदाचारस्य त्यागस्य तपसश्च महत्त्वं प्रतिपादितमस्ति, यदवलम्बनेन स्वार्थपरतादयो दोषा हीयन्ते, परोपकारितादयश्च गुणा वर्धन्ते । अनेन क्रमेण समाजः सुव्यवस्थितः सुखी च भवति । भारतीयदर्शनेषु दृश्यमानप्रपञ्चस्यानित्यत्वं प्रतिपाद्यात्मज्ञानस्य महत्त्वं वर्णितमस्ति । तदपि स्वार्थपरताया उन्मूलने विश्वबन्धुत्वस्य स्थापने च मूलम् । संस्कृतशिक्षाया मूलमन्त्रः सदाचारोऽस्ति । तदवलम्बनेन जनः शक्तिमान् लोकप्रियश्च भवति, ततः प्रेम्णा सर्वान् वशीकर्तुं जेतुं वा शक्नोति । एतादृशगुणान् उत्पादयितुं समर्था संस्कृतशिक्षाऽधुनाऽनिवार्यतार्हा ।

वर्तमानसमये संस्कृतशिक्षायाः स्वरूपं किञ्चित् शिथिलं दृश्यते । यदि तद् दृढं क्रियेत, तर्हि सा लक्ष्यपूर्तिमवश्यमेव करिष्यति ।

*

ज्ञानदा *

भुवनचन्द्रो जोशी 'कः'
साहित्यशास्त्रिद्वितीयवर्षीयः

जयतु जयतु नित्यं भारते सज्जनोऽस्मिन्, पिबतु पिबतु लोको ज्ञानदायाः स्वं च ।
वसतु वसतु सत्यं संस्कृतं सर्वचित्ते, भवतु भवतु भूयो भारते रामराज्यम् ।।

गुणोत्तमैर्दिव्यबलैः सदैव छात्रादयो यत्र यशो लभन्ते ।
श्री'ज्ञानदा'गीतयशःप्रशस्तिर्विद्यालये नो शुभमातनोतु ।।
शास्त्रेषु विज्ञाः कवयो यदीयां शुभ्रां प्रभूतां विकिरन्ति कीर्तिम् ।
ज्ञान-प्रभा-भासुरपाठकालिर्देशेचिरं भातु स **ज्ञानदा**ऽख्यः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसन्ततुकारामो महाराजः

— ब्र० प्रह्लादः
उत्तरमध्यमाप्रथमवर्षीयः

यथा—ग्रीष्मर्तुसन्तप्ताः पिपासाविकलाः सन्तः इतस्ततः धावमानाः मरीचिकानुसारिणः हरिणाः जलम् अन्विष्यन्ति, पिपासाकुलाय तस्मै हरिणसमूहाय च राजा वरुणः जलं वर्षति, तथैव यवनसाम्राज्य पीडितायाः अज्ञानान्धकारनिमग्नायाः हिन्दुजनतायाः उद्धाराय महाराष्ट्रे श्रीसन्तशिरोमणिः तुकाराममहाराजः अवततार । महाराजस्य अस्य जन्म पुण्यपत्तनमण्डलान्तर्गते आलंदी-समीपस्थे इन्द्रायणीतटस्थिते 'देहू'नामके ग्रामे १६०८ तमे खिस्ताब्दे बभूव । तस्य उदात्ता भावना सर्वत्र समा आसीत् । उक्तञ्च केनचित्—

अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानान्तु वसुधैव कुटुम्बकम् ।

परद्रव्यं परनारीञ्च विष्ठातुल्यं मेनेतेनै वोक्तम्—**'परद्रव्य परनारी यांचा धरी विटाल'** ॥

तस्य निखिलप्रपञ्चं परोपकारमयं सञ्जातम् । तस्य परोपकार विषये किं कथयेत् ? गृहस्थाश्रमे स्थित्वाऽपि कामक्रोधादिषड्विकारान्परिपूर्णतया स्वाधीनीचकार । महाराजस्य अस्य उत्कर्षमसहमानाः कतिपये अभ्यसूयकाः तं निकषोपरि सम्यक्तया परीक्ष्य दृष्टवन्तः । किन्तु असौ अग्निद्वारा परीक्षितसुवर्णतुल्यः शुद्धतमः आसीत् । एकदा कुटिलजनैः एका सौन्दर्यवती स्त्री तमभिप्रेषिता । सा च 'भण्डारा' नामक पर्वतैकान्तस्थाने, यत्र तु महाराजः ध्यानजपादिसाधनं विदधति स्म, स्त्रीस्वभावप्रणयचेष्टादिभिः महाराजमाकर्षितुं प्रयत्नान् अकरोत्, किन्तु वैराग्यमूर्तिः महाराजः ताम् अवोचत्— 'यदि मदीया माता त्वत्सदृशी अभविष्यत्, तर्हि अहमपि सुन्दरः अभविष्याम्' इति । महाराजस्य वाक्यं श्रुत्वा हतप्रयत्ना सा ततः निरगात् ।

महाराजः शिवराजः महाराजस्य धवलकीर्तिं श्रुत्वा प्रार्थयामास यद् मां गुरुमन्त्रमाध्यमेन अनुगृह्णान्तु इति । किन्तु निरपेक्षतामूर्तिः महाराजः तं स्पष्टमवोचत् यद् अहं राजगुरुः न भविष्यामि । किञ्चित्कालान्तरं राजा छत्रपतिः महाराजस्य सेवार्थं सुवर्णपात्रधारिणं एकं पुरुषं प्रेषयामास, किन्तु त सुवर्णपात्रसहितं शिवराजसेवकं विलोक्य विजितलोभः तु महाराजः तत् सम्पूर्णधनं निवर्तयामास । तस्य स्वभावः स्वकथनानुसारी वर्तते स्म ।

श्रीसद्गुरुकृपया १६२५ तमे खिताब्दे तस्मिन् काव्यस्फूर्तिरभूत् । तस्य काव्यं मराठीभाषात्वेन महाराष्ट्रीयजनतायाः कृतेः अत्यधिकां प्रीतिं जनयति । तस्य अभंगगाम्भीर्यार्थरसेन निखिलजनताऽऽकृष्टा बभूव । तस्य प्रवर्द्धमानां प्रतिष्ठाम् अवलोक्य तदानीतनकालस्य चतुर्वेदविज्ञः महापण्डितः रामेश्वरभट्टः श्रीमान् मुम्बाजीमहोदयश्च महाराजायाऽभ्यसूयतः स्म । किमधिकम् ? रामेश्वरभट्टः महाराजरचितां सम्पूर्णाभंगगाथां इन्द्रायणी'नामकनद्यां निमज्जितवान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु महाराजस्य दिनत्रयोदशानुष्ठानेन प्रसन्नः भगवान् पाण्डुरंगः तां अभंगगाथां उत्तारयामास। तस्य सिद्धान्ताः बाह्याडम्बररहिताः आसन्। उक्तञ्च तथैव–

शुद्ध कसोनिया पाहावे वरिल रंगा न भूलावे'।

स वाह्यवेशं न मन्यते स्म–**'लिप्यते न स पापेन पद्मपत्रमिवाम्भसा'** इति।

वेदाध्ययने नारीशूद्रादीनां निषेधः वर्तते। अतः तेषां उद्धारस्य साधनं भगवन्नाम विद्यते। अस्मिन् विषये तस्यैतद् प्रमाणमस्ति—

"सकलासी येथे आहे अधिकार, कलियुगी उद्धार हरिच्या नामें"।

प्रकारान्तरेण स भगवत्प्राप्तिविषयकं समतावादमेव शिक्षयाञ्चकार।

—✻✻—

रघुनाथः शिरोमणिः

– चम्पालालः शर्मा
व्याकरणशास्त्रिद्वितीयवर्षीयः

✻

मध्यकाले यथा काश्यां व्याकरणशास्त्रस्य प्रचारस्तथैव बङ्गदेशे न्यायशास्त्रस्याध्ययनाध्यापने ग्रन्थलेखनं चाभूवन्। यद्यपि न्यायशास्त्रं बङ्गदेशे वासुदेवसार्वभौमैर्नीतम्, किन्तु तेषां शिष्येण रघुनाथेनैव तत्र प्रचारः ग्रन्थलेखनं च विहितं, तदेव बङ्गदेशीयं न्यायशास्त्रमिति निश्चयः। तत्त्वचिन्तामणिग्रन्थस्य दीधितिर्व्याख्या सर्वत्राद्यापि पठने पाठने च समादृता लब्धप्रचारा च। मथुरानाथजगदीशगदाधरप्रभृतयस्तस्या व्याख्यां विधायात्मनः कृतकृत्यानमन्यन्त। नव्यन्यायश्च एषामेव विचारचर्चोपबृंहितः। यद्यपि मैथिलैरपि अत्र बहवो ग्रन्था विनिर्मिताः, किन्तु तेषां तथा प्रचारो नाभूदिति। अयं रघुनाथशिरोमणिः न्यायशास्त्रे बहून् नूतनान् सिद्धान्तान् स्थापयामास। अस्य विषये किंवदन्तीबाहुल्यं तस्य बुद्धितैक्ष्ण्यमेव सूचयति।

रघुनाथस्य पितरौ प्रसिद्धस्य श्रीसरस्वत्या वैरस्य स्थानमेवास्ताम्, तदानीं दारिद्र्यं विदुषां भूषणमेवासीत्, तथा च गृहे दारिद्र्यमिति न काचन बाधा कष्टकरी अभूत्। बालस्यास्य पिता वर्षत्रयमेव पुत्रसुखमनुभूय मातुरङ्के अमुं बालं परित्यज्य दिवमवाप। सती साध्वी माता यथाकथञ्चिद् बालममुं पर्यवर्धयत, निवासश्चास्य वासुदेवसार्वभौमाभिधस्य चतुष्पाठ्याः समीपे आसीत्। पञ्चवर्षीय एव रघुनाथो मात्रा अग्निमानेतुं चतुष्पाठीं प्रेषितः। तत्र छात्रान् प्राप्यानेनोक्तम् भो भ्रातरः ? वह्निर्दीयतामिति। छात्रैर्णैकेन अङ्गारकं निष्कास्य तं रिक्तपाणिं दृष्ट्वा उक्तम्–'गृहाण', इति। स बालः झटित्येव अञ्जलीं धूलिभिः प्रपूर्य ब्रवीति–देहीति, ततः सर्वे तस्य त्वरितबुद्ध्या विस्मिता अभूवन्, सार्वभौमोऽपि तत्सर्वं दृष्टवान्, तेनास्य माता निवेदिता–"स्वकीयं बालं मह्यं देहि, अहमेनं पाठयिष्यामि" इति। तदाप्रभृति वासुदेवसार्वभौम एव अक्षरारम्भं विधायामुं बालमपाठयत्। बाल्यादेवास्य तर्कशक्तिर्विलक्षणाभूत्। अक्षरारम्भकाल एव सार्वभौमं पृच्छति स्म, भो गुरो; कथम् कवर्ण एव पूर्वं, खवर्णः पूर्वं कथं न भवति ? तस्य प्रश्नैः प्रसन्नैः सार्वभौमः बालमेवामुं वर्णमालायाः सर्वं रहस्यं बोधयामास।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदा खलु पुष्पानयनार्थं गुरुणा समादिष्टो रघुनाथः हस्त एव पुष्पाणि समानयत्, तस्य पाणौ विनैव कदलीपत्रमवस्थितानि पुष्पाणि दृष्ट्वा सार्वभौमैरुक्तः –भोः देवतापूजनार्थं पुष्पाणि विनैव पत्रं समानीतवान्, इमानि हस्ते धृतानि पुष्पाणि देवयोग्यानि न सन्तीति अन्यानि आहर। नैयायिकेषु यो गुरुं मूकं विदधाति स एव श्रेष्ठ इति रघुनाथः कथं तूष्णीं तिष्ठेत् ? नम्र एव स गुरुं प्राह–न सर्वाणि पुष्पाणि मम हस्तं स्पृशन्ति, ये पत्रस्थानापन्नेषु पुष्पेषु धृतानि, तानि कथं न पूजायोग्यानीति ? सार्वभौमो मौनमाकलय्य तानि पुष्पाणि स्वीकृतवान्। एवं स्वल्पे वयसि एवानेन समस्तं न्यायशास्त्रमभ्यस्तं, बहुत्र दोषापादनमपि कृतम्।

एकदा सायंकाले जीर्णगृहेऽयमुत्तानोऽपठत्। पटलात् पतितेन तृणेनास्य एकमक्षि विकृतम्, अयं च तं स्वकीयमेव दोषममन्यत यदहमनध्यायकालेऽधीयान आसम्। तस्मिन् समये [षोडशशताब्दयाम्] मिथिला नैयायिकभूयिष्ठासीत्। अयमपि तत्राध्ययनार्थं गतवान्। तत्र श्रीजयदेवमिश्राः पक्षधरमिश्रापरनामान आसन् प्रसिद्धा नैयायिकाः, येषां समीपे न सर्वोऽपि प्रवेशमलभत। यो द्वाःस्थान् पण्डितान् वादे पराजयते स्म, स एव तत्र प्रविशति स्म। विलक्षणाश्च तेषां बुद्धिपरीक्षणोपाया आसन्। प्रवेशद्वारे पङ्किला भूमिरासीत्। तत्र प्रवेशकाले सन्धिपर्यन्तं पादौ निमज्जतः। ततः पादप्रक्षालनार्थं स्वल्पं जलं दीयते। अयं रघुनाथस्तु इतस्ततः परिक्रम्य शुष्कौ पादौ विनैव जलेन परिमार्ज्य तत् जलं तेभ्य एव परावर्तितवान्। चकितास्ते एकाक्षं विलक्षणप्रतिभावन्तं विलोक्य सपरिहासं पप्रच्छुः—

"आखण्डलः सहस्राक्षः विरूपाक्षस्त्रिलोचनः। वयं द्विलोचनाः सर्वे को भवानेकलोचनः।

तेषां मुखेषु चपेटासमं रघुनाथस्तटाक् ब्रूते स्म–

"आखण्डलः सहस्राक्षः विरूपाक्षस्त्रिलोचनः। यूयं विलोचनाः सर्वे वयं न्यायैकलोचनाः"।।

इत्थं पक्षधरमिश्र [जयदेवमिश्र] शिष्यान् वाक्पाटवेन शास्त्रार्थे विजित्य प्राप्तः श्रीपक्षधरमिश्रान्। अलौकिकसन्निकर्षे सामान्यलक्षणाप्रत्यासत्तेस्तेन खण्डनं कृतमासीत्। जयदेवस्तु तत्सर्वं शिष्यमुखात् विज्ञातवृत्तः शिष्यपराजयेन दुःखितश्च तं रघुनाथं शिष्यवद् विनीतमपि कटुशब्दैरेवाभणत्–

"वक्षोजपानकृत् काण ! संशये जाग्रति स्फुटे। सामान्यलक्षणा कस्मादकस्मादपलप्यते"।।

एवं तयोरपि शास्त्रार्थः संवृत्तः। पक्षधरमिश्रस्तस्य बालस्य पक्षं नैवाशकत् खण्डितुम्। अद्यापि बङ्गदेशे नैयायिकेषु सा रघुनाथस्य यशोगीतिर्गीयते–

"किशोरवयसि पक्षधरेर पक्षच्छेदन करि"

अनन्तरं तस्य प्रतिभाचमत्कारेण चमत्कृतः श्रीजयदेवमिश्रः सादरममुं बालं समस्तमपि न्यायशास्त्रं पाठयामास। स एव रघुनाथाय "तार्किकशिरोमणि" रित्युपाधिं प्रायच्छत्। विद्यामधीत्य शिरोमणीति उपाधिना विभूषितो रघुनाथो बङ्गदेशमागत्य, स्वल्पैः साधनैः स्वकीयां चतुष्पाठीं निर्माय तत्रैवापाठयत्। चिन्तामणिग्रन्थस्य दीधिति-व्याख्यया सुविख्यातोऽयं स्वल्पेनैव कालेन देशान्तरेष्वपि राजभिः सम्मानितो रघुनाथो राजतेऽद्यापि न्यायशास्त्राध्येतॄणां हृदयेषु। गर्वोक्तिरियमस्यासाधारणव्यक्तित्वमेव दर्शयति–

"विदुषां निवहैरिहैकमत्या, उदटङ्कीह सदुष्टमप्यदुष्टम्।
मयि जल्पति कल्पनाधिनाथे, रघुनाथे मनुतां तदन्यथैव।।"

–*–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयति श्रीसुभाषचन्द्रः

संकलयिता–स्वामी लोकनाथः पुरी
बी. कॉम.) पूर्वमध्यमाप्रथमवर्षीयः

*

श्रीकीर्तिध्वज इव राष्ट्रसंस्कृतेर्यो, विद्वान् भारतगगनाङ्गणे विरेजे।
श्रद्धेयो मतिमहतां वरेण्यो, धन्योऽसौ जयतितमां सुभाषचन्द्रः।१।

यस्यान्तर्हृदि सततं स्वदेशभक्तेर्भावैः संचरति स्म राष्ट्रधर्मधारा।
धीमान् सद्धृतिगुणशालिनां धुरीणो, भास्वद्भारतकुलनन्दनः सुभाषः।२।

यो देशोद्धृतिपुरुषार्थसिद्धिसाध्ये, स्वाधीनां व्यवहरति स्म राजनीतिम्।
क्रान्तिं तामिह जनयञ्जनेष्वदम्यां, दुर्धर्षो जगति ययोज्ज्वलं दिदीपे।३।

यस्योग्रैर्भुवि रणताण्डवप्रकाण्डैरुत्कर्षैरिह च रराज शूरवीरः।
शत्रूणां शमदमखर्वगर्वभेत्ता, नेता जित्वरबलसक्षमः सुभाषः।४।

भीष्मे वा हनुमति रामकृष्णयोर्या, द्रोणे भार्गवमुनिपुङ्गवे च पार्थे।
विस्फूर्जद्बलनयनैपुणी जयश्रीः, सा वीरात्मनि ददृशे सुभाषचन्द्रे।५।

सर्वस्वार्पणकृतधीस्तृणाय मेने, यः प्राणानपि च हुतात्मनां शरण्यः।
प्रेष्ठो भारतजननीकुलप्रदीपो, निष्ठावाञ्जयति महामनाः सुभाषः।६।

यो वैज्ञानिकबलजास्त्रशस्त्रयन्त्रैर्विध्वंसं व्रजति समस्तराष्ट्रसंगे।
धीरो भारतविजयस्य वैजयन्तीं स्फारं प्रास्फुरयदसौ सुभाषचन्द्रः।७।

यः सत्यानृतमयकूटनीतिविद्यां, जानन्दुर्जनदमनीं कुशाग्रबुद्धिः।
अन्ताराष्ट्रियकितवाधिनामकानां, मायाकौशलमभिनत् सुभाषचन्द्रः।८।

दस्यूनां परिषदि यो हि मातृभूमेः, संमाने बत विमनायितेऽग्रदर्शी।
तेजस्वी व्यरचदेव वामपक्षं, प्रायाद्दिग्विजयपथे सुभाषचन्द्रः।९।

नष्टायामहह हितात्मचेतनायां, निर्भीको भुवि विचचार जागरूकः।
पर्यन्ते प्रबलतरां चमूश्चकल्पे, योद्धा संघटनपटुः सुभाषः।१०।

जीवन् वा सुभटगतिं गतो द्युलोकं, दीर्घायुःष्वयमपरोऽष्टमो महात्मा।
आकल्पं कविकुलकीर्तनीयकीर्तिश्चारित्र्याद्ध्रुवमजरामरः सुभाषः।११।

—**—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डा॰ राजेन्द्रप्रसादः

— भुवनचन्द्रो जोशी 'खः'
साहित्यशास्त्रिद्वितीयवर्षीयः

*

द्राक्तरो राजेन्द्रप्रसादो भारतभूमेरेकाऽद्वितीया विभूतिरासीत्। अस्य जन्म १८८४ तमे ईशवीये वर्षे विहारप्रान्तस्य "जीरादेई" नामके ग्रामेऽभवत्। सः तीव्रबुद्धिः विद्यार्थिजीवने एव महात्मनो गान्धिनः राजनीतिविचारैः अतीव प्रभावितोऽभवत्। सः हिन्दीभाषायाः प्रबलः समर्थकः आसीत्। अत एव भारते सर्वत्र हिन्दीभाषायाः प्रचारे महान्तं प्रयत्नमकरोत्। विहारप्रान्तेऽपि तेन हिन्दीभाषायाः अत्यन्तं प्रचारः कृतः। राजनीतिविषयेऽपि तस्य प्रतिभा श्रेष्ठाऽऽसीत्। सोऽतीव धैर्यवान्, क्षमावान्, विनम्रः वाक्पटुश्चासीत्। महात्मनां समस्ताः एव गुणाः देशरत्ने राजेन्द्रप्रसादमहाभागे प्राप्यन्ते स्म। तद्यथा—

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥

स्वबाल्यकालाद् एव सः सद्गुणैः परिपूर्णः आसीत्। समाजसेवानिरतः नम्रस्वभावपूर्णः गाम्भीर्ययुक्तः सः कृषकसदृशसरलहृदयः आसीत्। दीनजनहिताय दयालुः स्वसर्वस्वमपि दातुम् उद्यतः आसीत्। द्राक्तरोपाधिविभूषितो धीरो वीरः कर्मठः त्यागमूर्तिः राजेन्द्रप्रसादः भारतदेशस्य प्रथमः राष्ट्रपतिः अभूत्। अस्य महापुरुषस्य नामश्रवणमात्रेण मानवाः सुख प्राप्नुवन्ति। साधुसङ्गतिः विद्वद्भिरपि सर्वदा प्रशंसनीया इति कोऽपि विद्वान् समार्थयत्—

"चन्दनं शीतलं लोके चन्दनादपि चन्द्रमा।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः॥"

संसारे सर्वत्र इदमेव दृश्यते यत् यः धनिकानां नरपतीनाञ्च हितं करोति, लोकः तस्मिन् द्वेष्यतां गच्छति, यः दीनजनानां हितं करोति, सः धनिकजनैः त्यज्यते। परन्तु सः सर्वजनहितकारी आसीत्—यथा धनिकजनाः तस्यादरं कुर्वन्ति स्म तथा निर्धनजना अपि तेन सह प्रेम कुर्वन्ति स्म। सः सर्वेषां जनानां प्रातःस्मरणीयः। अस्य तेजोमण्डलेन सर्वं जगद्व्याप्तमासीत्। अस्य सौजन्यमूर्तेः सरलचित्तस्य सर्वेषां चित्तप्रसादकस्य महाभागस्य श्रीराजेन्द्रप्रसादस्य गुणान् गातुं कोऽपि न प्रभुः। सः महानुभावः अद्यापि देशवासिनां परमादरभाजनं भूत्वा लोकहृदयेषु विराजते।

—*—

"इयमुन्नतसत्त्वशालिनां महतां कापि कठोरचित्तता।
उपकृत्य भवन्ति दूरतः परतः प्रत्युपकारशङ्कया॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमती इन्दिरा गांधी

–श्रीधरः शर्मा
साहित्यशास्त्रद्वितीयवर्षीयः

*

"लोके द्विधाः जनाः भवन्ति, एके स्वयमेव कार्यं कुर्वन्ति अपरे च केवलं सकलानामपि कार्याणां श्रेयो गृह्णन्ति। एतयोः प्रथमप्रकारकं जनं भवितुं प्रयतिष्यसे"। एभिः शब्दैः महात्मना गान्धिना श्रीमत्या इन्दिरामहोदयायाः कर्मठजनभवनायाशा प्रकटीकृता आसीत्। अधुना स्वानवरतप्रयासेन महनीयगुणैश्च स्वकौशलं प्रकाशयन्त्या इन्दिरया तदाशा सफलीकृता। छात्रावस्थातः अधुना यावत् तस्याः जीवनं दृढ़ाध्यवसायस्य अनवरतप्रयत्नस्य अदम्योत्साहस्य च देदीप्यमानं उदाहरणमस्ति। सा एतादृशी दृढ़निश्चया धीरा नारी अस्ति यत् तया यत् निश्चितं तन्निश्चितमेव, तद् अन्यथा वर्तुं कोऽपि न प्रभवति। तस्या विषये सत्यमिदं प्रतिभाति—

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मी समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा, न्यायात् पथः प्रविचलन्ति पदं न धीराः ॥"

तस्या जन्म प्रयागनगरे १९१७ तमे ख्रिष्टाब्दे पं० जवाहरलालनेहरूमहोदयस्य पैतृके आनन्दभवने अभवत्। तया पूनाशान्तिनिकेतनस्विटजरलैण्डस्थानेषु शिक्षा गृहीता। अन्ततः इंग्लैण्डदेशस्य आक्सफोर्डविश्वविद्यालये शिक्षां गृहीत्वा सा १९४१ तमे ख्रिष्टाब्दे भारतं प्रत्यागता।

१९४२ तमे ख्रिष्टाब्दे तस्याः विवाहः फिरोजगान्धिना सह प्रयागे अभवत्। तस्मिन्नेव वर्षे कांग्रेसान्दोलने तौ दम्पती कारागारं गतवन्तौ। दुर्भाग्यात् १९६० तमे वर्षे तस्याः पतिः स्वर्गम् अगच्छत्।

१९७१ तमे वर्षे सा श्रीलालबहादुरशास्त्रिणः मृत्योः अनन्तरं भारतस्य प्रधानमंत्री अभवत्। सा बाल्यकालादेव सेवायाम् संलग्ना अस्ति। द्वादशवर्षावस्थायामेव सा कांग्रेस-सहायतार्थम् "वानरसेनानामकं" बालसंगठनं कृतवती। प्रधानमंत्रीपदम् अंगीकृत्य सा देशसेवायाम् सर्वतोभावेन संलग्ना दृश्यते। बैंकेति नाम्ना प्रसिद्धानां कोशानां राष्ट्रीयोकरणं, भूतपूर्व राज्ञां विशेषाधिकाराणां समाप्तिः, भूमिगृहसम्पत्यादीनां सीमा निर्धारणं चेत्यादीनि कार्याणि तस्याः महत्त्व प्राकटयन्।

१९७१ तमे ख्रिष्टाब्दे प्रवृत्ते भारतपाकयुद्धे तया स्वकौशलेन विजयः अधिगतः। तन्नेतृत्वे भारतस्य साहाय्येनैव धर्मनिरपेक्षस्य गणतन्त्ररूपस्य बंगलादेशस्य अभ्युदयः जातः।

एवं वयं पश्यामः यत् तस्याः जीवनं त्यागस्य जीवनम् अस्ति। सा सत्यमेव उच्च-कोटिजनानां मध्ये परिगण्यते —

"प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्ननिहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारभ्य चोत्तमजना न परित्यजन्ति ॥"

वयम् ईश्वरं प्रार्थयामः यत् सा दीर्घजीवनं प्राप्य देशसमाजयोः सेवायाम् अनवरतं संलग्ना भवतु, इति।

*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हन्त ! राष्ट्रपतिरहमदो दिवं गतः

– केदारदत्तो द्विवेदी
साहित्य-शास्त्र-प्रथमवर्षीयः

*

सप्तसप्तत्यधिकैकोनविंशतितमे ख्रिस्ताब्दे फरवरीमासस्य एकादशे दिवसे प्रातर्नववादन-कल्पे अस्माकं धर्मनिरपेक्षस्य लोकतन्त्रात्मकस्य राष्ट्रस्य पञ्चमो राष्ट्रपतिः श्रीफखरुद्दीन अली अहमदः पाञ्चभौतिकीं तनुं परित्यज्य शाश्वते ब्रह्मणि विलीनः । स पूर्वस्मिन्नेव दिवसे मलेशियादेशस्य राजकीययात्रातो नवदिल्लीं प्रत्यावर्तत । तत्रापि स हृद्रोगाक्रान्तोऽभवत्, अत एव तेन फिलीपाइनबर्मादिदेशयात्रा मध्य एव निरस्ता ।

स १९०५ वर्षे मईमासस्य त्रयोदशे दिने जन्म प्राप्य गोंडानगरे प्राथमिकीं शिक्षामधिगत्य १९२१ ईशवीयाब्दे पञ्चापविश्वविद्यालयतो दशमीं कक्षामुत्तीर्णवान् । ततः कतिपयवर्षाणि स्वदेश एव शिक्षां प्राप्य १९२७ वर्षे कैम्ब्रिजविश्वविद्यालयत इतिहासविषयेण स्नातको जातः । ततो विधिविषयकमध्ययनं विधाय पञ्चापोच्चन्यायालये वाक्कीलो जातः । ततः १९३१ वर्षे कांग्रेसदले प्रवेशं प्राप्य शनैः शनैः पदवृद्धिं प्राप्य च राष्ट्रस्य उच्चतमे राष्ट्रपतिपदे स १९७४ वर्षेऽगस्तमासस्य चतुर्विंशे दिनेऽभिषिक्तोऽभूत्, जीवनस्यान्तिमं क्षणं यावत्तत्पद एव कार्यरतोऽभूत् । लोकसभायाः कृते निर्वाचनादेशप्रसारणमेवान्तिमं कार्यमासीत् । स तावत् प्रकृत्या मितभाषी स्वाध्यायव्यसनी, निष्पक्षः, धर्मनिरपेक्षश्चासीत् ।

राष्ट्रपतिमहोदयस्य देहावसानस्य वृत्तं झटित्येव सम्पूर्णे देशे विश्वे च प्रसृतम् । तत्क्षणमेव सम्पूर्णराष्ट्रं शोकमग्नं जातम्, राष्ट्रियं ध्वजं अर्धावनतम्, समग्राः कार्यालयाः विद्यालयाश्च पिहिताः । सर्वकारेण च त्रयोदशदिवसीयः शोक उद्घोषितः । एतस्य अन्त्येष्टिक्रिया सम्पूर्णराजकीयसम्मानेन सम्पादिता, यस्यामनेकेषां राष्ट्राणां प्रतिनिधयोऽपि सम्मिलिताः अभूवन् ।

एतादृशानां जनानामादर्शानुकरणेनैव समाजस्य राष्ट्रस्य चोन्नतिर्भवति । अतः एतस्य मानवीयाः श्रेष्ठाः गुणाः अस्माभिर्ग्राह्याः, विशेषतो धर्मनिरपेक्षता च पालनीया, इत्येव अस्माकं वास्तविकः श्रद्धाञ्जलिः ।

—**—

"स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः" ॥

[किरातार्जुनीयम् २।३४]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वे सांस्कृतिककेन्द्रे

काशी

— ब्र० नारायण:
वेदान्तशास्त्रिप्रथमवर्षीय:

*

काशी विश्वेऽस्मिन् प्राचीनतमाऽन्यतमा च नगरी अस्त्येतदैतिहासिकप्रमाणैरपि सिद्धमभूत्। अस्या: अपरं नाम 'वाराणसी' इत्यपि श्रूयते। सनातनकालादेव नगरीयं भारतीयसांस्कृतिक-धार्मिककेन्द्रत्वेन मन्यते। यथा वैदिक-बौद्धजैनादिधर्मावलम्बिनामाश्रमा: विलसन्ति, तथैव तेषां धर्मपीठान्यपि। परमपूज्यभगवत्पादश्रीशङ्कराचार्यद्वारा सनातनधर्मोद्धारानन्तरमियं काशी सन्यासिनां प्रधानकेन्द्रं जातम्।

साम्प्रतममनुमानत: पञ्चाशदधिकसहस्राणि मन्दिराणि विराजन्ते, येषु केषाञ्चन मन्दिराणां परिपाटी प्राचीनतमा विद्यते। एतेषु मन्दिरेषु विश्वनाथमन्दिर सङ्कटमोचनमन्दिरं दुर्गामन्दिरञ्च निखिलभारते प्रसिद्धिं गतानि सन्ति। मूलविश्वनाथमन्दिरस्य परम्परेति-हासस्याज्ञातयुगात् प्रचलिता, किन्तु विद्यमानमन्दिरमधिकं प्राचीनं न प्रतीयते। अद्यत्वेऽत्र विश्वनाथमन्दिरत्रयमस्ति। तत्रैकं 'ज्ञानवापी' नामके स्थाने विलसति, यस्य निर्माणं महिष्या 'अहिल्याबाई' इत्याख्यया राज्ञ्या समपादि। द्वितीयञ्च विश्वविख्याते काशीहिन्दूविश्वविद्या-लयेऽस्ति यत् प्रमुखेण धनश्रेष्ठिना विरलान्वयेन श्रीघनश्यामदासमहोदयेन निरमायि। तृतीयञ्च मीरघट्टके विद्यते यद् अनन्तश्रीविभूषितश्रीकरपात्रस्वामिपादै: निर्मापितम्। सङ्कटमोचनमन्दिर-स्थापना तत्रभवता सूर्यवत्कीर्तिमता श्रीगोस्वामितुलसीदासमहाराजेन व्यधायि, यद्धि व्यवस्थैतिहासिकदृष्ट्याऽद्यावधि महत्त्वपूर्णं विद्यते। दुर्गामन्दिरं सप्तदशशताब्द्यां महाराष्ट्रियै: निर्मितम्। काशीस्थमपरं प्राचीनतममन्दिरं कर्दमेश्वरमिति विख्यातमस्ति, यस्य निर्मिति: एकादशशताब्द्यां श्रीकर्णचेठीनाम्ना महोदयेन समपादि।

अनुगङ्गम् इयं पुरी स्थितास्ति, यत्र भगवती गङ्गा उत्तरवाहिनी बभूव, येन कारणेन घट्टानां कोदण्डाकार: सञ्जात:। अस्या: घट्टेषु मन्दिरवैविध्येन शोभाविशेषो गण्यते। अत्र प्राचीनतमं राजघाटस्यादिकेशवमन्दिरं विख्यातम्। प्रसिद्धघट्टेषु दशाश्वमेध:, मणिकर्णिका हरिश्चन्द्र:, तुलसीघट्टश्च प्राथम्येन गण्यन्ते। दशाश्वमेधघट्टोपरि एव जयपुरराज्यनिर्मितं मानमन्दिरमस्ति, यस्य छदसि एका रुचिरा वेधशालाऽपि विद्यते। यत्र घट्टे दशाश्वमेधयज्ञा: सञ्जाता:, स: एव घट्ट: दशाश्वमेधघट्टनाम्ना ख्यातिं गत:।

भारतीयसांस्कृतिकराजधानीगौरवं बिभ्रती इयमेव पुरी अधुनापि प्रख्याताऽस्ति। भारते एतादृश: कश्चिदपि विद्वान् न भवेत्, यो हि काशीमुद्राम् अलङ्कृतो न स्यात्। भारतीयसंस्कृते: निर्माणे सरक्षणे च काश्या: अपूर्वो योग:। साम्प्रतमप्यत्र विश्वविद्यालयत्रय(काशीविद्यापीठं, हिन्दुविश्वविद्यालय:, सम्पूर्णानन्द-संस्कृत–विश्वविद्यालयश्च) अनेके विद्यालया:, महाविद्यालया: अनेका: संस्कृतपाठशालाश्च विलसन्ति। एतस्मिन् आधुनिकयुगेऽपि विदुषां संहतिरस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीपे रामनगरस्य दुर्गम्, नगरे 'कंपनी' बागनामकम् उद्यानमित्यादिकमपि उल्लेख्यमस्ति समीपस्थे सारनाथ एव गौतमबुद्धो धर्मचक्रं प्रवर्तयतामास, अशोकश्च स्तूपं कारयामास। स्वातन्त्र्योत्तरम् उत्तरप्रदेशसर्वकारः सारनाथमभिलक्ष्य विशेषव्यवस्थादिकं चकार। अत्र चीन-बौद्धमन्दिरम्, अतिथिशाला, मृगसंग्रहालयः, वाराणस्याः आकाशवाणीकेन्द्रञ्च विलसति।

इयं प्राचीना नगरी सम्प्रति आधुनिकवेषभूषादिदृष्ट्यापि उन्नता जाता। एवम् इयं नगरी सांस्कृतिकदृष्ट्या महत्त्वपूर्णा अस्त्येव, आधुनिकदृष्ट्यापि इयं न्यूनं महत्त्वं नादधाति। वाराणसीनगरसमीपस्थे 'मडुवाडीह'नामके स्थाने रेलकार्यशालायां 'डीजल'-इञ्जिनानां यन्त्राणि निर्मीयन्ते, काष्ठक्रीडकाणां पीत्तलमाण्डानाञ्च कृते पुराकालात् काशी प्रसिद्धैव।

हरिद्वारम्

— टंकराजः पाण्डेयः
व्याकरणशास्त्रिद्वितीयवर्षीयः

*

हिमालयस्योपत्यकामधिष्ठिना पतितपावन्याः भगवत्याः जाह्नव्याः पावनतटे सुशोभिता, भारवर्षस्य विभिन्नप्रान्तेभ्य आगन्तुकैर्यात्रिभिः सर्वदा सम्पूजितेयं नगरी 'हरिद्वार' नाम्ना प्रसिद्धाऽस्ति। हरेः बादरायणस्य समीपे गमनाय इदं द्वारमस्ति, अत इदं 'हरिद्वारं' कथ्यते। केचित् 'हरद्वारम्' इति वदन्ति। एतदपि युक्तमेव, हरस्य केदारनाथस्य द्वारं प्रवेशाय मार्गः। पञ्चानां पुरीणां समूहः हरिद्वारमिति कथ्यते—यथा-मायापुरी-ज्वालापुरम्-कनखलम्-भीमगोडा-सप्तसरोवरम्। अस्या नगर्याः गणना त्वस्माकं भारतवर्षस्य प्रसिद्धासु मोक्षदासु सप्तनगरीषु क्रियते। यथा —

"अयोध्या, मथुरा, माया,काशी,काञ्ची,ह्यवन्तिका। पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥"

सनातनधर्मावलम्बिनः सर्वे जनाः विश्वासं कुर्वन्ति यदत्रागत्य स्नानानन्तरं तेषां सकलमपि कल्मषं विनङ्क्ष्यति, अपि ते मुक्तेरधिकारिणो भवन्तीति। विषयेऽस्मिन्नेवैतत्प्रसिद्धमस्ति—

"हरिद्वारे कुशावर्ते बिल्वके नीलपर्वते। स्नात्वा कनखले तीर्थे पुनर्जन्म न विद्यते॥"

सर्वेषां जनानां विश्वासस्य कारणमस्ति यदत्रैवासीत् भगवत्या जगज्जनन्या भगवतः शंकरस्यार्धाङ्गिन्याः सत्याः पितुः दक्षस्य नगरी। कनखले एवास्ति दक्षेश्वरमहादेवस्य प्रसिद्धं विशालं च मन्दिरम्। अत्रैवासीत् भगवत्याः जगन्मातुः अपर्णायाः पवित्रं तपःस्थलम्, तस्मिन्नेव स्थलेऽस्ति बिल्वकेश्वरस्य प्रसिद्धं मन्दिरम्। अत्रैव सप्तसरोवरे आसीत् सप्तर्षीणां तपोभूमिः। अस्याः नगर्याः प्रत्येकं रेणुः भगवत्याः जाह्नव्याः पवित्रेण जलेन सिक्तोऽस्ति, अस्याः पवित्रताया वर्णनं किं क्रियेत? अस्मिन्नपि कलौ युगे सन्त्यत्र महामहिमशालिनां वीतरागाणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरक्तानाम्, रागद्वेषशून्यानां महात्मनाम्, योगसाधनरतानां योगिनां चाश्रमाः । अद्रेः शृङ्खलायां शोभितायाः जाह्नव्याः श्रेणिभूताया दक्षिणतः विस्तृताया अस्याः नगर्याः मनोरमं दृश्यं दृष्ट्वा, अहर्निशं जाह्नव्याः पूतसीकरैः सुरभिकृतेन पवनेन सह प्रातः सायं मन्दिरे-मन्दिरे, मठे-मठे आश्रमे-आश्रमे च धार्मिकजनकृतशंखघण्टानिनादं जयजयकारं च श्रुत्वा कस्य चित्तं प्रफुल्लं न भवति । अस्या नगर्याः चतुर्षु दिक्षु सन्ति चत्वारि मन्दिराणि—यथा पूर्वस्यां जगन्मातुः चण्डिकादेव्याः, पश्चिमायां मनसादेव्याः, उदीच्यां सप्तर्षीणां, दक्षिणस्यां च दिशि दक्षेश्वरमहादेवस्य ।

न केवलमस्या नगर्या धार्मिकमेव महत्त्वम्, किन्तु शैक्षिकक्षेत्रेऽपीयं नगरी बहुमहत्त्वपूर्णा अस्ति । अत्रैव आर्यसमाजस्य स्तम्भभूतैः स्वामिश्रीश्रद्धानन्दमहाभागैः भारतीयसंस्कृतेरनुरूप-शिक्षाप्रदानाय संस्थापितः गुरुकुलविश्वविद्यालयो विराजते, यत्र देशदेशान्तरादागत्य तत्रैव निवासं कृत्वा ब्रह्मचर्यपालनपूर्वकं छात्राः स्वाध्यायं कुर्वन्ति । अत्रैवार्यसामाजिकैः सञ्चालितो मेरठ-विश्वविद्यालयेन सम्बद्धः ज्वालापुरस्थस्नातकोत्तरमहाविद्यालयः सनातनधार्मिकैः सञ्चालितं ऋषिकुलविद्यापीठञ्चास्ति । अस्यामेव नगर्यां श्रवणनाथमठेन सञ्चालितौ महाविद्यालयौ स्तः । एवं बहवो विद्यालया महाविद्यालयाश्च सन्ति । नानाप्रान्तीया वैदेशिकाश्चागत्य भारतीय-संस्कृतिपोषकाः संस्कृतशिक्षानुरागिण आत्मोन्नतिमिच्छन्तः बहवश्छात्राः स्वाध्यायं कुर्वन्ति । अस्यामेव नगर्यामस्माकं महाविद्यालयोऽपि शोभते, यत्र नेपालीभाषां विना आधुनिकविषयैः सह मुख्यविषयाध्यापनं विधिवत् भवति । एष एव विद्यालयः पञ्चपुर्यां विधिवदध्यापनाय प्रथितोऽस्ति । सर्वकारेण लब्धमान्यताकाः स्वल्पा एव आयुर्वेदिकमहाविद्यालयाः सन्त्यस्माकं प्रदेशे, किन्तु हरिद्वारनगर्यामेकस्यामेव द्वावायुर्वेदिकमहाविद्यालयौ स्तः । किं बहुना, इयं नगरी शिक्षाक्षेत्रेऽपि प्रसिद्धेषु नगरेषु विशिष्टाऽस्ति ।

अस्या नगर्या आध्यात्मिकं महत्त्वमस्त्येव, देशस्य समृद्धचर्थमपि अस्यास्ति विशिष्टं स्थानम् । अत्रैवास्ति रूसदेशसाहाय्येन भारतीयसर्वकारेण स्थापिता महती विद्युदुद्योगशाला (B.H.E.L.), यत्र द्वादशसहस्रशः श्रमिका अहर्निशं कार्यं कुर्वन्ति, देशसमृद्धचर्थं च स्वदेशमात्म-निर्भरतां नेतुमनेकेषामावश्यकयन्त्राणां निर्माणं कुर्वन्ति । उद्योगशालायां स्थितानां यन्त्राणां ध्वनिः अहर्निशं **'कर्म कुरु श्रमं च कुरु'** इति सन्देशं ददाति । अस्या नगर्या निकटे एव प्रदेश-सर्वकारेण कर्गलनिर्माणशालाऽपि प्रस्तुताऽस्ति ।

अतोऽस्मिन्नपि समयेऽस्या नगर्या गणना भारतवर्षस्योद्योगप्रधानासु नगरीषु क्रियते । सर्वकारेण प्रस्तावितयोजनायाः कार्यान्वयने त्ववश्यमेवेयं नगरी विशिष्टतमा भविष्यति, नात्र कश्चित्संशयलेशः ।

—*—

"हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
सर्वत्र दुर्लभा गङ्गा त्रिस्थानेष्वसुदुर्लभा" ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य गौरवम्

— ब्र० परमेश्वरः
उत्तरमध्यमाप्रथमवर्षीयः

*

कस्यापि देशस्य मीमांसातः पूर्वं तस्य देशस्य सभ्यता, संस्कृतिः भाषा च अवलोकनीया। सभ्यता संस्कृतिश्च यद्यपि द्वौ शब्दौ स्तः, तथापि द्वयोः अन्योऽन्याश्रयत्वादेक एवाभिप्रायो ज्ञातव्योऽस्ति। यथा शरीरात्मनोरन्योऽन्याश्रयः, शरीरं विनाऽऽत्मनो न पृथक् स्थितिः, पुनरात्मानं विना शरीरं निरर्थकं शवमात्रं वर्तते। तथा च सभ्यतां विना संस्कृतेर्गौरवं निरर्थकमस्ति। तत्र का नाम संस्कृतिः ? इदं विचार्यम्।

संस्कृतिः सा कथ्यते यत्र तस्य देशस्याचारा विचाराः, शिक्षादीक्षे, जीवनचर्या, पारस्परिकव्यवहारो, भाषा, वेशभूषा, भोजनाच्छादनानि, रीतिपरिधानानि, सामाजिकं सङ्गठनञ्च इत्यादीन्यवलोक्यन्ते। अस्माकं संस्कृतेस्त्रीण्यङ्गानि सन्ति—"सत्यं शिवं सुन्दरम्"। इदमेवास्माकं गौरवम्।

सत्ययुगे महाराजाधिराजश्चक्रवर्ती हरिश्चन्द्रो बभूव। "सत्यं शिवं सुन्दरम्" हरिश्चन्द्र-महाराजस्य प्रत्यङ्गमोतप्रोतमासीत्। सत्यस्य परीक्षणाय इन्द्रो हरिश्चन्द्राय किं कष्टं न दत्तवान् ? किन्तु महाराजेन हरिश्चन्द्रेण कदापि सत्यं नोपेक्षितम्। राजा हरिश्चद्रः स्वप्नावस्थायामप्यसत्यं नाचरत्। कदाचित् राजा स्वप्न एव राज्यदानं कृतवान्। किन्तु जाग्रदवस्थायां तस्यासक्तिं त्यक्त्वा, राज्यं कस्मैचिद् ब्राह्मणाय दत्वा, काश्यां कस्यचिच्छूद्रस्य दास्यं स्वीकृतवान्। राजा सत्यप्रिय आसीत्, अतस्तेन प्रथमं सत्यमवलोकितम्। स एतन्न पश्यति स्म यत् अनुचितं वर्तते, किन्तु महाराजस्य मतौ सौन्दर्याय स्थानं दुर्लभमासीत्। प्रथमं सत्यस्य स्वीकृतिः, पुनः शिवस्य, पश्चात् सुन्दरस्य भवति। इदमेवास्माकं भारतदेशस्य गौरवम्।

इत्थमेव महाराजस्य रघोर्महत्ता वर्तते। एकस्मिन्समये वरतन्तोः शिष्यः कौत्सः दीक्षान्तसंस्कारानन्तरं गुरुदक्षिणायाः कृते महाराजं रघुं धनं याचितुमाजगाम। किन्तु महाराजः रघुः सर्वमेव धनं दीनेभ्यो यज्ञान्ते दत्तवानासीत्। तस्य राजभवने भोक्तुमपि मृत्तिकायाः पात्राण्यासन्। एतत् दृष्ट्वा कौत्सः किमपि नोक्त्वा तूष्णीं बभूव। परन्तु राजा रघुः कौत्सं दृष्ट्वाऽतिप्रसन्नो जातः। वदति स्म—"भो ! ब्रह्मचारिन् ! आनन्दमयः ते समाचारः ? भवतः गुरुः कुशली वर्तते ? सर्वे छात्राः सुखिनः सन्ति" ? इत्यादीन् पृच्छन्नाह्लादवृत्तान्तान् कौत्सस्य चरणकमलयोः शिरो नमयति स्म। पुनः यथायोग्यातिथिसत्कारं च कृतवान्। कौत्सेन प्रसन्नवदनेन गुरोराश्रमस्य वृत्तान्तः कथितः। कौत्समवलोक्य राजा पुनः पुनर्वदति स्मयत्—"भो ब्रह्मचारिन् ! काञ्चित् सेवां कथयतु" इति श्रुत्वा कौत्सो मन्दस्वरेण गुरुदक्षिणावृत्तान्तमकथयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पश्चात् रघुणा विचारितं यत् "**एतादृशो दानीयो ब्रह्मचारी किञ्चिदगृहीत्वा न गच्छेत् एतत्तु सर्वथानुचितमेव**"। अतः रघुः धनपतिकुबेरोपर्याक्रमणं कर्तुं तत्परो बभूव। परन्तु रघोर्भयात् कुबेरेण तस्यामेव रात्रौ रघोः राजभवने धनस्य वर्षा कृता। प्रातःकाले रघुः कौत्समाहूय कथयति स्म–"एतत सर्वं भवत्कृते आगतम्, अतः सर्वं गृहीत्वा गच्छतु"। किन्तु कौत्सः कथयति स्म यत्–"**गुरुदक्षिणार्थं केवलं चतुर्दशकोटिमुद्राणामावश्यकता वर्तते। अतोऽहं चतुर्दशकोटिमुद्राभ्य एकां काकिणीमपि नैव इच्छामि**"। इदमेवास्माकं देशस्य भारतवर्षस्य महत्त्वम्।

यदि भारतदेशस्य गौरवं ज्ञातव्यं वर्तते, तर्हि प्रथमं संस्कृतभाषा पठितव्या स्यात्। उक्तं च केनचित्–"**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**"। संस्कृताध्ययनानन्तरमेव भारतस्य संस्कृतेः सम्यग् ज्ञानं भविष्यति।

—**—

सहसा विदधीत न क्रियाम्

– ब्र० नामदेवः
पूर्वमध्यमाप्रथमवर्षीयः

*

ईश्वरनिर्मितप्राकृतिकस्थितिः कर्मप्रधाना वर्तते, एतद्गत्यनुसारेण किमपि कर्म सम्पादयितुं मनुष्य उत्सुको भवति। कार्याण्यप्यनेकप्रकारकाणि सन्ति। किञ्चित् कार्यं व्यक्तिगतं सामाजिकं वा, किञ्चित् धार्मिकम् अधार्मिकं वा वर्तते। मनुष्य इत्थं कार्ये प्रवृत्तो भूत्वाऽहर्निशं वायोर्भ्रमणमिव परिश्रमं करोति, स्वकृतकार्यस्य फलं स्वेच्छानुसारेण वाञ्छति च। किन्तु तत्कर्मणः फले स्वेच्छानुसारेण न प्राप्ते सति दुःखी भवति। पुनः तत्कार्यफलस्याभावेन दोषं मन्यते। तत्कार्ये न्यूनता परिश्रमे वेति अस्मिन् ध्यानं न दत्वा त्रुटिं पूरयितुं प्रवर्तते। अतः शास्त्रप्रयुक्तो लौकिकनियमोऽस्ति–"**सहसा विदधीत न क्रियाम्**" इति।

एतन्नियमानुसारेण यैर्महापुरुषैर्देशहिताय जगद्धिताय वा कष्टान्यसह्यन्त, तस्य फलं लब्धम्। एतादृशं कार्यं कर्तुं सामान्यजन आजीवनं समर्थो न भवति। परन्तु एतादृशानि उदाहरणानि अल्पानि सन्ति, यानि–यथा धरण्याकाशमण्डले विद्युल्लता एकस्मिन् क्षणे प्रकाशं करोति, तथैव–अल्पकाल एव स्वकार्यं प्रभावं च दर्शयित्वा निर्गच्छन्ति। येषां श्रीशंकराचार्य-विवेकानन्द-ज्ञानेश्वर-लोकमान्यतिलक-महात्मागान्धिसदृशं कार्यं कर्तुम् इच्छा वर्तते, तैः प्रथमं विचारः कर्तव्यः।

विचारोऽपि द्विधा अस्ति–स्वविचारः परविचारो वा। यदि स्वमनसि विचारो नोद्भवति, तर्हि अन्येभ्योऽनुमतिः ग्रहीतव्या वर्तते। किन्तु विचाररहितो गर्वोऽनुचितोऽस्ति—"**अविवेकः परमापदां पदम्**"। विचार्यैव श्रीकृष्णेन अर्जुनं प्रति कथितम्– "**तस्माच्छास्त्र**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि" ।। इमां नीतिं ध्यायन् अर्जुनोऽवदत्–"किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः । " इति । भगवानुवाच– "तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्" । "कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ।। इति ।

अनेनैव छत्रपतिः शिवाजीमहाराजः स्वकर्तव्ये राजनीतौ च उदासीनो बभूव । स्वगुरु स्वामिन रामदासम् अवदत् 'अहम् राजनीतिकर्म कर्तुं नेच्छामि, कियत्समयपर्यन्तमेषां शत्रूणां संहारं करवाणि ? अतः अहं राजनीतिं त्यक्त्वा भवतः शिष्यो भूत्वा अत्र उपविशानि"? परन्तु गुरुणा कथितं–'राजन्, भवत एतदेव कर्तव्यं उचितमस्ति । भवतः जन्म एतत्कार्यार्थमेव जातम् अस्ति । अन्यथा देशस्थितिः विकृता भविष्यति' । एवं गुरोः आशीर्वादं गृहीत्वा शिवाजीवः कर्तव्यकर्मणि तत्परो बभूव ।

एकदा शिवराजस्य मित्रं तान्हाजीमालसुरे स्वपुत्ररायबानामकस्य विवाहं कर्तुं संलग्न आसीत् । विवाहस्य निमन्त्रणं दातुं शिवराजस्य पार्श्वे जगाम, तस्मिन्नेव समये युद्धस्य वृत्तान्त शिवराजः तान्हाजीवम् अकथयत् । तान्हाजीवः तदैव युद्धाय तत्परो बभूव । पुनः शिवराजेन कथितम् यत् प्रथमं विवाहं करोतु, पश्चात् युद्धं भविष्यति । परन्तु वीरमहोदयस्य उक्तिः— "अधीलग्न कौण्डन्याचे मग लग्न रायबाचे" । तत्पश्चात् तेन सेनां गृहीत्वा तस्मिन् दुर्गे आक्रमणं कृतम् । तदा तान्हाजीवस्य पार्श्वे 'यशवन्ती' नाम्नी मुसली आसीत् । तस्याः आधारेण सः अनेकवारं बहुस्थानेषु गतवान् आसीत् । सा एव मुसली ऊर्ध्वे निक्षिप्ता । किन्तु तत्स्थानं अगृहीत्वा सा नीचैः आगता । वस्तुतः सफलतायां विश्वासो नासीत् । तेन परिवृत्य गमनं कर्तव्यमासीत् । परन्तु अविचारस्य कारणत्वात् दुर्गं प्रवेष्टुं नाशक्नोत् । अत एव केनापि कथितम्—

" सहसा विदधीत न क्रियाम्, अविवेकः परमापदां पदम् "
वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः ।।

—**—

"शिरश्शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं,
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधो गंगा सेयं पदमुपगता स्तोकमथवा,
विवेकभ्रष्टानां भवति विनिपातः शतमुखः" ।।

(नीतिशतकम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद् दृष्टं तन्नष्टम्

– जमुनादत्तो बहुगुणा
व्याकरणशास्त्रिद्वितीयवर्षीय:

*

सर्वस्मिन् जगति कोलाहलो दृश्यते। सर्वे एव स्वलक्ष्यप्राप्तये इतस्ततो धावन्ति, प्रयतन्ते च। सर्वे एव अत्र परस्परमपरिचिता: सन्ति। परिचयं विनैव सर्वे स्वार्थं साधयितुमिच्छन्ति। एकं वाक्यमसमाप्यैव इतस्ततो धावन्ति। श्रान्ताश्च स्वप्रयत्नं त्यजन्ति, पुनश्च तथैव चेष्टन्ते। सर्वे एव च वेशादिभ्योऽपि अपरिचिता: सन्ति। कश्चित् भोजनं अपरश्च क्रीडनकादिकं कश्चिच्च शृङ्गारादिकम् अधिगन्तुमितस्तत: धावति। एतादृशान् जनान् बहवो जना: अनुगच्छन्ति।

यत्र तत्र सर्वत्र च भ्रमन्त: एव दृश्यन्ते जना:। इमे पापेषु शल्यविद्धा भवन्ति, क्षणं दु:ख्यन्ति, पुनश्च इमे तथैव रज्यन्ति। एतेषां पादाहता: केचिज्जीवा: म्रियन्ते। तेषां कृते नैतेषां हृदये किमपि दु:खं भवति। क्वचिच्च बलिभिराक्रान्ता: निर्बला: अशक्ता: वा नश्यन्ति। कुत्रापि विशिष्टस्थानेषु इमेऽपि दु:खमनुभवन्ति, तदा इमे क्षणं क्रोशन्ति। पुन: एतस्य जगतो रंगभूमि: परिवर्तते विस्मापयते चेमान्। एवं क्षणे-क्षणे जगत् नवतामुपैति। इमे च नानाभावयुक्ता सन्त: अस्थिरा भूत्वा इतस्ततो धावन्ति। क्षणिकं मन: एतेभ्योऽपि द्रुतगामि।

यथा इमे भ्रमन्ति, तथा इदं सर्वं जगत् भ्रमिरूपेण दृष्टिपथमायाति। तत्र क्वचिदिदं वर्तुलं, क्वचिच्च समतलं, क्वचिच्च उभयभिन्नं दृश्यते। एवं न कोऽपि जानाति वस्तुतत्त्वमस्य भिन्नरङ्गस्य जगत:। एवमत्र सर्वे एव स्त्रीपुंसरूपेणाभिनयं कुर्वन्ति नाटकेऽस्मिन्। सर्वे एव तत्तद्रूपसमन्विता: वस्तुत: तदेव मत्वा कार्यं कुर्वन्ति न च इमे तथा। अन्तरे कश्चित् इमान् भ्रामयितुमागच्छति। इमे च तदवस्था: भूत्वा सर्वमपि विस्मरन्ति।

काल: एतेभ्योऽपि द्रुततरं प्रयाति। न ते तं तथा जानन्ति। क्वचिच्चेमे अशान्ता भवन्ति। कस्मिंश्चित् वृक्षे पीतानि मधुराणि च फलानि सन्ति, किन्तु मध्ये शल्यान्यपि सन्ति। तत्रैकत: कण्टकाकीर्ण: पन्था:, अन्यच्च सुगम: पन्था अस्ति। स्वल्पे एव सुगमं मार्गमनुधावन्ति। अधिकांशत: कण्टकाकीर्णमार्गमनुसरन्ति। उभयविधा एव मानवा मधुरं फलं वाञ्छन्ति। तेषु सुगममार्गानुयायिन: सारल्येन फलानि लभन्ते, अपरे च कण्टकाकीर्णा: विध्यन्ति दु:ख्यन्ति च। तेऽपरेभ्य: ईर्ष्यन्ति।

एवमुभयविधा एव मानवा निराशा: पूर्णकामा: वा परावर्तन्ते। मिथ: सर्वे संभूय इमं नाटकीयं भागं समाप्य विरमन्ति। पुन: केचन सभान्तरं गच्छन्ति तत्र सर्वमेव शान्तं मायारहितं निश्चलञ्च दरीदृश्यते। तत्र गत्वा ते पश्चात्तापं कृत्वा विगतमोहा अज्ञानजन्यं दु:खं परित्यज्य सुखमनुभवन्ति।

—**—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया संस्कृतिः

— सन्तरामदासः, वेदान्ताचार्यद्वितीयवर्षीयः

*

इदानीं संस्कृतिशब्दो व्यवहारार्थे प्रचलति, किन्तु संस्कृतेरर्थाः अनेके व्यापकाश्च सन्ति। संस्कृतिरस्माकमाभ्यन्तरगुणानां समूहोऽस्ति। सा एका प्रेरका शक्तिः अस्ति, सा अस्माकं सामाजिकव्यवहारान् स्थापयति। संस्कृतेर्माध्यमेन साहित्यं तस्य भाषा च विकसिता भवति। संस्कृतिरस्माकं सूक्ष्मचित्तवृत्तीः विकासयति। संस्कृतेराधारो धर्मोऽस्ति। धर्मस्य बीजं सदाचरणमस्ति। संस्कृतिः अस्माकं सभ्यतायाः गौरवम् उत्पादयति।

भारतीयसंस्कृतेराधारस्वरूपं वेदो विद्यते, अस्माकं संस्कृतिः विविधरूपिणी, बहुविधविषयाणां विकासकर्त्री चास्ति। इमां संस्कृतिमेवोपजीव्य प्रतिभानिर्माणकौशलेन, साहित्येन, संगीतेन, राजनीत्या, शासनव्यवस्थया, चित्रकलया च विकासो लब्धः। सम्पूर्णविश्वस्य मानवाः भारतीयसंस्कृतेः प्रशंसकाः सन्ति।

इतिहासस्यास्मिन् विषये साक्ष्यमस्ति यत् समये-समये विदेशीयानाम् आक्रमणानां फलस्वरूपमस्माकं देशेऽनेकाः संस्कृतयः स्वप्रभावं विस्तारयितुमैच्छन्। किन्तु ताः सर्वाः सूर्यसम्मुखदीपक इव प्रभावहीनतां प्रापुः। भारतीयसंस्कृतिरधुनापि जीवति, परन्तु मिश्रस्य, वेबिलोनस्य, यूनानस्य, रोमस्य च संस्कृतीनां किमपि अवशिष्टं चिह्नं न दृश्यते।

भारतीयसंस्कृतिः निम्नादपि निम्नप्राणिनोऽपि स्वस्नेहेन करुणया च परिपोषयति। इदं पूर्णरूपेणैव सत्यं वर्तते, यत् नहि परदुःखेन दुःखिताः अन्यसंस्कृतिसम्बद्धाः जनाः भवन्ति, यथा भारतीयसंस्कृतिसम्बद्धाः भवन्ति।

भारतीयसंस्कृतेः मुख्यतत्त्वं परोपकारभावोऽस्ति। सत्यमहिंसाऽस्तेयादिनैतिकगुणानां विकासोऽपि वस्तुतः संस्कृतेर्महत्कार्यमस्ति। महती खल्वस्माकं संस्कृतिर्यस्याः प्रभावेण बहूनि शतानि वर्षाणि यावदयं देशः पारतन्त्र्यमनुभवन्नपि सम्प्रति स्वकीय प्राचीनगौरवं दधाति।

यद्यपि भारतमिदं बहुविधप्राकृतिकविषमतयोपनिबद्धं वर्तते, तथापि अत्रत्यानां जनानां जीवनपद्धतौ एकरूपता दरीदृश्यते। समेषां जनानां भाषा जीविका भोजनादि च नितान्तं भिन्नम्, तथापि तत्तत्प्रान्तवासिनां मौलिकसंस्कारेषु ऐक्यं विद्यते। कश्मीरे, काश्यां, वङ्गे वा वसतामपि तेषां संस्कारपद्धतिः, सन्ध्यावन्दनादिनियमाः समाजसेवादिसद्गुणाः समानाः सन्ति। अस्याः एव प्रभावेण भारतराष्ट्रमखण्डं वर्तते। देशस्य विभिन्नेषु भागेषु निवसन्तो जनाः शिवोपासनार्थं, स्वमोक्षसाधनार्थं वाराणसीं, प्रयागं, गयां, द्वारिकां च गच्छन्ति, एवञ्च जनानां परस्परं सौहार्दभावना समुत्पद्यते। भारतीयसभ्यतायाः प्रभाव-प्रभाविताः अशोक-गान्धि-तिलक-विवेकानन्दादयोऽपरशः विश्वकल्याणकारिणो **"वसुधैव कुटुम्बकम्", सर्वे भवन्तु सुखिनः' 'अहिंसा परमो धर्मः'** इत्यादिमानवीयगुणानां विस्तारकाः बभूवुः। भारतीयसंस्कृतिरात्मपरीक्षणम् आत्मोन्नतिं च शिक्षयति, यथा शङ्कराचार्यमहाभागैरुक्तम्— **"के शत्रवः सन्ति ? निजेन्द्रियाणि, तान्येव मित्राणि जितानि यानि"।**

*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथा

दृष्टिदानम्

— शुकदेवदासः शास्त्री
व्याकरणाचार्यः, एम. ए.-दर्शनशास्त्रे

※

मोहमयीनगर्या एकस्य शीततापनियन्त्रितस्य विशालसौधस्य अन्यतमे कक्षे श्रेष्ठी विश्वम्भरप्रसादो रोगशय्याशयित, आसीत् । फेनधवलितां कुसुमकोमलां शय्यां परित आवृत्य तस्य परिजनाः सम्बन्धिनो मित्राणि भृत्याश्च आसन्–केचन आसन्दिकायां, केचन भूतले, केचन चोत्तिष्ठन्त एव । ओषधिगन्धप्रपूरितेऽस्मिन् कक्षे मृत्युगन्धमनुभवन्तोऽपि सर्वे न वोद्विग्नाः न वा दुःखिताः, अपितु विचारग्रस्ताः सम्भ्रान्ताः अभूवन् ।

लोकस्येयं रीतिर्यत् सति दुःखिते रुग्णे शोकग्रस्ते वा कस्मिंश्चित् सम्बन्धिजने आत्मीयतां प्रदर्शयन्तो जनाः समवेता भवन्ति, केचिद् रुदन्ति, केचिद् अश्रुपूरितनेत्राः म्लानवदनाश्च भवन्ति, केचित् च रुग्णं तत्पुत्रादिकं च सान्त्वयन्ति । किन्तु तत्र किञ्चित् विपरीतमिवाघटयत् । अयं लोकप्रवादो यत् मृत्युपाशबद्धो जनः सर्वमपि जगज्जातं विमुच्यमानं दृष्ट्वा महत् कष्टमनुभवति, निखिलमपि कृतं कृत्यं छायाचित्रमिव क्रमशः तस्य पुरो धावति, स यदा-कदा रुदन्तं परिजनवृन्दमवबोधयति च । अत एव सम्यगुक्तम्–**"मृत्युकष्टं महत् कष्टम्"** । किन्तु एतत्सर्वं दीर्घकालिकरोगग्रस्तस्य मृत्युच्छायामनुभवतोऽपि विश्वम्भरप्रसादस्य नाभूत् ।

अस्ति कतिपयदिवसेभ्यः पूर्वमियं वार्ता । स्वाभिन्नं मित्रं विश्वम्भरप्रसाद दीर्घरोगिणं श्रुत्वा नवदिल्लीतो भारतसर्वकारमन्त्री विभूतिनाथः समायातः । स बालसुहृदो दीर्घरोगं विलोक्य मृत्योरचिरागमनं चालोच्य अधीरमना जातः । तथापि अन्तर्भावं मुखाद् वारयता कृत्रिमहर्षं च प्रकटयता तेन विभूतिनाथेन तिष्ठत्सु सर्वजनेषु– विश्वम्भरप्रसादस्य पत्न्यां कीर्तिमत्यां, दुहित्रोः प्रज्ञामुदयोः, पुत्रे विक्रमपाले, अन्येषु च मित्रगणेषु भृत्यवर्गेषु मित्रं प्रति निगदितम्– "वयस्य ! भीतिं मा स्म गमः, अचिरादेव त्वं नीरोगो भूयाः । नवदिल्लीगमनानन्तरमेवाऽहं "लन्दन"परावर्तितं दक्षतरं भिषजं दीनबन्धुनामानं सम्प्रेषयामि, यस्यामोघा चिकित्सा सर्वथा त्वां नीरोगं विधास्यति" इति ।

किन्तु विश्वम्भरप्रसादेनोक्तम् – 'मित्र ! त्वमन्यथा गृह्णासि । **"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च"** । न मे खलु शिष्यते जिजीविषा । किन्न कृतं मया, किन्न भुक्तम्, येन पूर्णेऽपि वयसि पुनर्जीवितुमिच्छामि ? प्रत्यागच्छन्तं मृत्युदूतं स्पष्टमहं पश्यामि । वाञ्छामि मित्र ! त्वरितमेव विश्वेशस्य लक्ष्मीनाथस्य वैकुण्ठे दर्शनं कर्त्तुम् । नाऽहं शोचनीयः, न च युष्माभिः काचित् चिन्ता कार्या' इति

कथनमिदं समर्थयताऽपरेण मित्रेण धर्मवीरेण उक्तम्— 'सम्यगाह, मित्र ! सम्यगाह । जना अस्मिन् विनश्वरे संसारे आगत्य अभ्युदयं निःश्रेयसं चाभिलषन्ति । त्वया भाग्येन समृद्धे कुले जन्म लब्ध्वा पुरुषार्थेन उन्नतिं पुण्यं चार्जयित्वा किन्नावाप्तम्– उच्चस्तरीया शिक्षा, वशंवदा प्रिया पत्नी, आज्ञारताः सुताः सुतश्च, सेवारतो भृत्यवर्गश्च ? अपि चातुलं धनम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपमं भवनम् ? त्वया बाल्यादेव सज्जनानां महात्मनां सङ्गः सम्प्राप्तः, विद्यालयचिकित्सालयादिनिर्माणेन समाजस्य राष्ट्रस्य च सेवा कृता, आधुनिकतमैः यानैः अनेके देशाः भ्रान्ताः, सर्वाणि तीर्थाणि अटितानि, विधिवत् संध्यानुष्ठानादिकमपूर्वं यज्ञदानादिकञ्चाचरितम्, दीनाः पीडिताश्च सन्तोषिताः। हे मित्र! मन्येऽहं यदेवं पुण्यकारिणं त्वां साक्षादेव विष्णुदूता आगत्य नेष्यन्ति' इति।

विभूतिनाथेनापि– 'एवमेव! एवमेव!! पुण्यस्य फलमवश्यं मधुरं भवति' इत्युक्त्वा नवदिल्लीं प्रस्थातुमनुमतिर्निवेदिता। सर्वेषां परिजनानां कृतज्ञतावचनैः सह विश्वम्भरप्रसादश्च स्वं मित्रं प्रेमाश्रुपूरिताभ्यां नेत्राभ्यां व्यसर्जयत्।

एवञ्चास्यामपि दशायां विश्वम्भरप्रसादः स्वाभाविकः परमप्रसन्नश्चासीदेव, तत्प्रभावेण सर्वे समवेता अपि परिजना नाधीरा अभूवन्, इत्यकल्पितेव सा वार्ता।

तस्यैव विश्वम्भरप्रसादस्य स्थितिरद्य विपरीता जाता। तद्धैर्यं क्व विलीनम्, स उत्साहः क्व गतः, सा प्रसन्नता कथं विनष्टा? इति सर्वे विस्मिता अभवन्। तां विप्रतिपन्नां स्थितिं मृत्युप्रभावजन्यामाकलय्य तस्य मातुलेनाऽऽशङ्कितम्–'विश्वम्भर! मन्ये त्वं मृत्योः सान्निध्यादेवं विचलसि'। किन्तु तेनोक्तम्–'मृत्युसान्निध्यात्? मैवं मैवम्। आत्मनोऽजरामरत्वं जानतो मे कुतो भयम्? नहि, ... अधुनाऽहं जीवनस्य नैष्फल्यमालोच्य भृशं दुःखमनुभवामि'। अनेन कथनेनतु समेषां विस्मयो द्विगुणतां गतः।

पत्न्या पृष्टम्–"जीवनस्य नैष्फल्यम्? कथं भवान् अद्य प्रलपति प्राणनाथ! कस्य जीवनं त्वादृशं सफलं स्याद्? एतत्समेषां मतम्, भवतश्च एष एव निश्चयः" ? इति।

'तत्सर्वम् अज्ञानजल्पितं भ्रान्तिकल्पितमासीत्' इत्याक्रोशन् विश्वम्भरोऽवोचत्– 'अद्याहमनुभवामि, यन्मया कृतम्, तत्सर्वं प्रदर्शनाय आडम्बराय स्वार्थाय वा कृतम्। मानवहितमुपेक्षमाणस्य न वा लोकः सिद्धो भवेन्न वा परलोकः। मानवं प्रति सात्त्विकीं प्रीतिं विना न किमपि पुण्यं भवितुमर्हति' इति।

विलपन्ती एका सुताऽगादीत्– 'पितः! मैव वद, त्वादृशः कः पुण्यशाली स्यात्? त्वयि एवमधीरे सति कथं वय जीवाम' ? इति। किन्तु श्रेष्ठिनोक्तम्– 'यद्भवतु, तद्भवतु, नाहं प्रकटितं सत्यं गोप्तुं पारयामि ...... सत्यं वदामि, सत्यम् आः! मम दृष्टिमुदघाटयत् स स्वप्नः! सा घटना!!'

सर्वैः ससंभ्रमं पृष्टम्– 'कीदृक् स्वप्नः? का घटना? इति। 'श्रूयतां यदि कुतूहलम्? एकां प्राचीनां घटनामहं गतरात्रौ स्वप्नेऽपश्यम्' इति वदन् विश्वम्भरप्रसादस्तान् सर्वान् घटनां स्वप्नञ्चाश्रावयत्—

"शीतर्तोरेकस्यां रात्रौ नववादनवेलाऽऽसीत्। पण्येऽहं रूप्यकगणनायां संलग्नोऽभूवम्। तदैव एको जीर्णकायो विवृतवस्त्रः कम्पितकायः किशोरो मत्समक्षमुपस्थितः। तेनोक्तम्– 'श्रेष्ठिन्! किं रूप्यकपञ्चकदानेनानुग्रहीतुं शक्नोति माम्?' मयोक्तम्–'दूरमपसर! नहि निरर्थककायाय मया समयो दातुं शक्यते'। तथापि करुणां समुत्पादयन् स अवोचत्–'असहायोऽस्मि। दिवा भृतिमाचर्य्य जीविकां यापयामि, रात्रौ च चिकित्साशास्त्राध्ययनं विदधामि। ...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वो विद्यालयशुल्कदानदिवसः, न च मे पार्श्वे एकोऽपि पणः ... '। किन्तु मया स बलाद् बहिष्कृतः, द्वारे च पिहिते।

"स एव किशोरो मां ह्यः स्वप्नेऽवोचत्–'श्रेष्ठिन्! इतः प्रयाणशीलोऽसि, आत्मानं च महापुण्यवन्तं मन्यसे। किन्तु सर्वं त्वदहंकार एव। त्वया परमार्थव्याजेनापि सर्वं स्वार्थायाऽऽचरितम्। सम्बन्धमनु त्वम् उन्मत्त इवाधावः। किन्तु अस्य जगतः सर्वोच्चमपि सम्बन्धं सर्वथा तिरस्कृतवान्– मानवस्य सम्बन्धम्...मानवतायाः सम्बन्धम्! – **'न मानुषात् श्रेष्ठतरं हि किञ्चित्"**। न त्वया कस्याप्यभावग्रस्तस्याहेतुकं साहाय्यं कृतम्, तथाप्यात्मानं कृतकृत्यं सफलजीवनं मन्यसे? धिक् त्वाम्,... धिक् त्वाम् इति"।

पत्नीमभिलक्ष्य श्रेष्ठी न्यगदत्–'कीर्तिमति! तदाप्रभृत्येवाह सम्पूर्णमपि जीवितं निरर्थकं पश्यामि। अभिलषामि च स्वस्थो भूत्वा, अल्पमपि तथाविधसुयोगं लब्ध्वा किञ्चित् वास्तविकं पुण्यमर्जयितुम्, आहोस्वित् तं जनं सम्प्राप्य क्षमाञ्चादाय पाप्मानमेव प्रक्षालयितुम्! प्रिये! अस्ति कश्चिदुपायः ?... "।

एवं वदत्येव श्रेष्ठिनि भृत्येन सह प्राविशत् विभूतिनाथसंप्रेषितो दक्षतरो भिषग् दीनबन्धुः, सनमस्कृति प्रार्थयच्च–'मान्यवराः! क्षम्यतामेष जनो विलम्बागमनाय। किन्तु मार्गे दुर्घटनाग्रस्तस्य जनस्य सेवायां समयोऽतिवाहितः' इति।

विश्वम्भरप्रसादो दृष्ट्वैव विस्मयं गच्छन् अभिज्ञाने च समयं यापयन् अपृच्छत्–'कीदृशी दुर्घटना'? दीनबन्धुरगादीत्–'मान्याः। मार्गे यानसंघट्टनेन एको जनः आहतः। चिकित्सया स स्वस्थो भवेत्। किन्तु मन्ये तस्य दृष्टिर्जातेति। आज्ञापयन्तु–अधुना किं कर्त्तव्यं भवतामिति'?

दीनबन्धुं सम्यक् परिचित्य श्रेष्ठी प्रहृष्टमना उत्फुल्ललोचनश्चावोचत्–'भ्रातः! अवश्यमाज्ञापयामि, अवश्यम्। परं पूर्वं मद्वचनपूर्तये वचनं देयम्?' इति।

दीनबन्धुनोक्तम्- 'एतदर्थमेवाऽहमत्र प्रस्तुतः श्रीमन्तः! आज्ञापयन्तु' इति।

विश्वम्भरप्रसादेनोक्तम्–'भिषक्! शृणु, एकदेकेन जनेन रूप्यकादानद्वारा मदर्थं दृष्टिप्राप्तिसुयोगदानं कृतम्। स मया बलादवहेलितः, न च तस्मै रूप्यकपञ्चकं दत्तम्, न वा दृष्टिरादत्ता। किन्तु ह्यो रात्रौ आदानं विनैव तेन किशोरेण दत्ता दृष्टिर्मयाऽऽदत्ता। अधुनाऽहं! तत्प्रतीकरूपेण दानमादानञ्चोभयं कर्तुं त्वत्साहाय्यं प्रार्थयामि" इति।

दीनबन्धुरवोचत्– 'महोदयाः! नाहं प्रहेलिकामिमां बोद्धुं पारयामि'?

श्रेष्ठी साक्षेपमगादीत्–'वयस्य! नेयं प्रहेलिका, अपितु तथ्यम्। किं मां परिचिनोषि? अहं स एव मूढः, यः शुल्कदानाय तुभ्यं रूप्यकपञ्चकमपि नोऽदात्' इति वदन्नेव स शय्यायां बलादुत्थाय भिषजं प्रसभमाकृष्य च गाढं समालिङ्गत्। तमङ्के संस्थाप्य च सगद्गदम्– 'दीनबन्धो? तस्यापराधस्य महच्चं क्षमां देहि, इति मे आदानम्। दिवं गच्छतो मे नेत्रे तस्याहतस्य दृष्टिदानायादत्स्व इति मे दानम्। ... न मे प्रार्थनाऽस्वीकार्या' इत्युक्त्वा समस्तमपि परिजनवृन्दं सम्बोध्य अस्फुटस्वरं न्यगदत्–'एष गच्छामि ... अन्तिमं मे इदं तुभ्यं दानम्—

"न त्व ... ... हं ... ., कामये राज्यम्,
कामये दुःखतप्तानां, ... प्राणिनाम् ... . आर्तिनाशनम्" ॥

*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानां ज्ञाने धर्मः आहोस्वित् प्रयोगे?

– श्री परमानन्दो डुगराकोटी
व्याकरणाचार्यः, सहायकव्याकरण-विभागाध्यक्षः

शब्दार्थयोरभेददर्शनात् किं शब्दस्य स्वरूपम् इति जिज्ञासायाम्– जगति व्यवहर्तृं पु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यो वर्णरूपध्वनिसमूह एव शब्दो भवति, यद्वा यस्योच्चारणेन तस्य स्वरूपं विज्ञायते, सास्नालाङ्गूलककुदखुरविषाणिनां बोधो जायते, स शब्दः इति निश्चयः।

यद्यपि शबरस्वामिना **'अर्थज्ञानाय इमे शब्दाः, न धर्मार्थाः'** इत्युक्तं; तथापि साधुशब्दानां धर्म एवान्तरङ्गप्रयोजनम्। हरिणा वार्तिककृता च तथोक्तम्– **'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः'**। **"समानायामर्थावगतौ शब्दैश्चापशब्दैश्च, शास्त्रेण धर्मनियमः"** इति। श्रुतिरपि प्रतिपादयति– **"एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति"** इति। अनेन निश्चीयते साधुशब्द एव धर्मजनको नासाधुशब्द इति।

तथापि, अत्र सन्दिह्यते–किं सम्यग्ज्ञातः कामधुग् भवति, सुप्रयोगात्तु सम्यग्ज्ञातत्वानुमानमिति, अथवा साधुप्रयुक्तः कामधुग् भवति, सम्यग्ज्ञानात्तु सुप्रयुक्तत्वानुमानम् इति? अतो भाष्यकृताऽपि सन्देहः कृतः– **"शब्दस्य ज्ञाने धर्म आहोस्वित् प्रयोगे"** इति।

यदि ज्ञानेनैव धर्मोत्पादकता स्वीक्रियते, तदा यथा हि शब्दस्य ज्ञाने धर्मः तथा अधर्मोऽपि भवति। मधुविषोभयसंश्लिष्टान्नं लोके यथा जना न भक्षयन्ति, तथैव अधिकानर्थक्यस्यैव प्रयोजकत्वात् शब्दापशब्दज्ञानपूर्वकव्याकरणाध्ययनं हेयं स्यात्, यतो हि एकस्यैव गौरितिशब्दस्य बहवोऽपभ्रंशा गावीगोणीगोतागोपोतलिकेत्यादयः सन्ति।

यदि प्रयोगे धर्म इति स्वीक्रियते, तर्हि प्रकृतिप्रत्ययादिविभागज्ञानपूर्वकशब्दसाधुत्वज्ञानसाधके व्याकरणशास्त्रे कृतभूरिपरिश्रमा ये वैयाकरणाः, ये व्याकरणशास्त्रज्ञानशून्या च सन्ति, ते सर्वे जना अभ्युदयेन युज्येरन्? यद्यपि युज्येत सर्वो लोकः पुण्येन, समेषामभ्युदयमिच्छतैव निगदितमिदम्-- **'सर्वे कुशलिनः सन्तु, सर्वे सन्तु निरामयाः।**
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत्'॥ इति।

तथापि यदि अधीतव्याकरण इवानधीतव्याकरणोऽपि शब्दप्रयोगेण धर्मद्वारा अभ्युदयं प्राप्नुयात्, तर्हि व्याकरणाध्येतुः सार्थकता न उपपद्येत? व्याकरणाध्ययनेन स्वसार्थक्याय अभ्युदयसाधकेन भवितव्यम्। अन्वयव्यतिरेकाभ्यां सर्वत्र कार्यकारणभावो निश्चीयते– व्याकरणाध्ययनसत्वे अपूर्वजनकत्वम्, व्याकरणाध्ययनाभावेऽपूर्वजनकत्वाभावः। परन्तु अत्रानधीतव्याकरणस्य शब्दप्रयोगेण धर्मद्वारा अभ्युदय इत्यतः व्यतिरेकव्यभिचारस्योपपादकः 'शब्दप्रयोगे धर्म' इति पक्षो न स्वीकर्तव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि 'शब्दप्रयोगे धर्मं' इति पक्षेऽपि व्याकरणाध्ययनप्रयत्नवतां बहुतरपुण्यतायाः सत्वात् व्याकरणाध्ययनसाधकता उपपद्यते, तथापि लोके वैपरीत्यमपि दृश्यते यत् निश्चित-साधुशब्दज्ञानवन्तोऽपि शब्दप्रयोगे अकुशला भवन्ति, तथा च अनधीतव्याकरणा यथाकथञ्चिद-वगतसाधुशब्दाः सन्तः शब्दानां प्रयोगे निपुणा भवन्ति । इत्थं न हि केवलेन प्रयोगेण अभीष्टं सिद्ध्यति ।

'ज्ञाने धर्म' इत्यस्य पक्षस्य स्वीकर्त्ता स्वपक्षस्थदूषणानि तथा वारयितुं शक्नोति–यथा कूप-खानकः कूपस्य खननकाले मृदा पांसुभिः संश्लिष्टो भवति, जले निर्गते कूपखानको निर्मलगुणो भवति, भूयसाभ्युदयेन च स युज्यते । अथवा शब्दप्रमाणका वयं, शब्दश्च शब्दज्ञाने धर्म इत्याह नापशब्दज्ञानेऽधर्म इति । यच्चाशिष्टाप्रतिषिद्धं, न तद्दोषाय भवति, नाभ्युदयाय यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय । एवम् उत्कृष्टफलावाप्तौ स्वल्पम-धर्मफलमुत्पन्नमपि अनुत्पन्नकल्पं भवति इति ।

एवञ्च, यद्यपि शब्दज्ञानाज्जायमानो धर्मः अपशब्दज्ञानजन्यमधर्मं समूलघातं हन्ति, तथापि क्रियायाः प्राधान्यं लोके सर्वत्र दृश्यते । यो हि केवलं जानाति सन्ध्यावन्दनोपासनादीनि अभ्युदयकारणानि, स्वयं तु क्रियारूपेण नाचरति, न सोऽभ्युदयभाग् भवति । उक्तमपि–'**यस्तु क्रियावान् पुरुषः स विद्वान्**" । "**प्रक्षालनाद्धि पङ्कस्येति**" न्यायेन शब्दशास्त्रमिदं न तावत् प्रेक्षावत्प्रतिपित्सागोचरतां भजेत् । एवञ्च "**उभयतः स्पाशा रज्जुः**" इति स्थितौ ज्ञानपूर्वके प्रयोगेऽभ्युदयजनकता निश्चीयते, "**एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः**"– इत्यादिवाक्यात् । व्याकरणाध्ययनजनितप्रकृतिप्रत्ययविभागज्ञानपूर्वकशब्दप्रयोगेण धर्मद्वारा अभ्युदयो भवति इति तस्य फलितार्थः । ननु "**योऽग्निष्टोमेन यजते य उ चैनमेवं वेद**" इत्यादिश्रुतिषु ज्ञानानुष्ठानयोः साम्येन फलसम्बन्धो भवत्विति चेन्न, ज्ञानेन हि अनुष्ठाने उपकारदर्शनात् । तयोरङ्गाङ्गिभाव-स्यावश्यकता विश्रुत एव । पूर्वमीमांसायामपि द्वयोः साम्येन फलसम्बन्धाभावात् "**यदेकस्मादपूर्वं तदितरत्तदर्थमिति**" इत्यादिसूत्रेण एकस्य प्राधान्यमपरस्याङ्गत्वं कल्प्यम् । आत्मज्ञानस्येव शब्दज्ञानस्य स्वतन्त्रफलसाधनता न भवति–"**सर्वत्रैव हि विज्ञानं संस्कारित्वेन गम्यते । पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधार्यताम्**" ।। अत आत्मज्ञानातिरिक्तं ज्ञानं ज्ञेयशेषं भवति, धर्महेतुत्वा-भावात्तस्य । एवं प्रयोगाङ्गतया साफल्योक्तिः । भाष्यकारेणापि– "**लोकतोऽर्थप्रयुक्ते शब्द-प्रयोगे शास्त्रेण धर्मनियम**" इत्युक्तम् । अत्र प्रयोगग्रहणेन प्रयोगाद्धर्मो न ज्ञानमात्रात् । सर्वत्र ज्ञानमात्रेण कार्योत्पत्तौ बह्वायाससाध्यानुष्ठानस्य वैयर्थ्यं स्यात् । एवं च शब्दशानस्याङ्गत्वं शब्दप्रयोगस्य प्रधानत्वं प्रतीयते इति दिक् ।

—❀—

"अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ।।
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ।। "

[वाक्यपदीयम् १।१३१,१३२]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मायाविचारः

— ब्र० विट्ठलः शास्त्री
वेदान्ताचार्यः, एम.ए. (दर्शनशास्त्रे) सहायक वेदान्त-विभागाध्यक्षः

*

विभिन्नदर्शनेषु प्रयुज्यमानयोः मायाऽविद्याशब्दयोर्मध्ये मायाशब्दः प्राचीनतरो वेदेषूपपित्सु चेन्द्रजालादीनामिव लोकोत्तरासु चमत्कृतिजनिकासु शक्तिषु प्रयुज्यते। अविद्या-शब्दः प्रथममुपनिषत्स्वात्मविद्येत्यर्थे प्रयुक्तस्य विद्याशब्दस्य विरुद्धेऽर्थे प्रयुज्यमानो दृश्यते। बौद्ध-दर्शनेऽविद्याशब्दोऽविद्यासंस्कारविज्ञानादिद्वादशनिदाने भवचक्रापरपर्याये दृष्टः पारमार्थिक-वस्त्वज्ञानार्थे उपयुक्तो दृश्यते। योगसूत्रेषु भगवता पतञ्जलिनाऽविद्याशब्दो विपरीतख्याता-वनित्येषु नित्यबुद्धिरूपायामशुद्धेषु वा शुद्धबुद्धिरूपाया दुःखेषु वा सुखबुद्धिरूपायामनात्मसु वात्मरूपायां प्रयुक्तः। विपरीतख्यातिश्चैषा न प्रामाणिकी ज्ञानविरुद्धापि ज्ञानविशेषरूपेत्युक्तम्।

इत्थमसावविद्याशब्दः श्रीशंकराचार्यकालात्प्राग् वेदान्तशास्त्रविनियुक्तासु पारिभाषिकीषु संज्ञासु तत्त्वज्ञानाभाव इत्यऽर्थेभावसंज्ञाऽऽसीत्, मायाशब्दश्च जीवकृतानामनेकविधकल्पनानां बाह्यसृष्टेश्च कारणभूतत्वेन वर्णितो लोकोत्तरां चमत्कृतिजनिकामात्मनः शक्तिमभ्यधत्त। एव-प्रकारिकायाः आत्मनः शक्तेस्तत्त्वज्ञानाभावं प्रति कारणत्वेनोक्तिस्तत्र तत्र दृश्यते निबन्धकाराणाम्।

अस्याश्चात्मशक्तेरवस्थाद्वयम्। एकमावरणशक्तिमत् अपरं च विक्षेपशक्तिमत्। तदुक्तम्— **"शक्तिद्वयं हि मायाया विक्षेपावृत्तिरूपकम्। विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्॥" "अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः। आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्"॥** अत्रोत्तरावस्थाविशिष्टस्य पूर्वावस्थाविशिष्टं कारणम्; तदविद्याशब्दवाच्यम्। कार्यभूतं तु मायाशब्दवाच्यम्। अनेनाभिप्रायेण मायाऽविद्ययोर्मध्ये कार्यकारणभावरूपः सबन्धो वर्तते इत्येके वदन्ति। कार्यकारणयोरैक्याद् द्वावपि शब्दौ पर्यायत्वेन प्रायः सर्वैः गृहीतौ।

श्रीशंकराचार्यैः मायाशब्दस्य प्रयोगः प्राचीनवेदान्तिभिः प्रोक्त एवार्थे प्रायशः कृतः। मायाशब्दादर्वाचीनमविद्याशब्दं बहुभिः पूर्ववेदान्तिभिरज्ञानार्थे पारिभाषिकसंज्ञात्वेन स्वीकृतं श्रीमच्छंकराचार्याः परित्यक्तुं न शक्ताः, मायाशब्दार्थे एव प्रायः पर्यन्वयुञ्जत। यद्यपि वेदान्तग्रन्थेष्वीश्वराज्ञानप्रतिपादने प्रायशो मायाशब्दस्य प्रयोगो दृश्यते, जीवाज्ञानप्रतिपादने चाविद्याशब्दस्य प्रयोगो दृश्यते। तथापि न तथाविधः सार्वत्रिको नियमः इत्येतच्छ्रीमद्भिर्मा-धवाचार्यैः सर्वदर्शनसंग्रहे सम्यक्तया प्रतिपादितम्— **"अनिर्वचनीयत्वतत्त्वाभासप्रतिबन्धक-त्वादिलक्षणजातस्य मायाऽविद्ययोः समानत्वात्"... अतएव तत्र तत्र श्रुतिस्मृतिभाष्यादिषु मायाऽविद्ययोरभेदेन व्यवहारः संगच्छते। क्वचिद्विक्षेपप्राधान्येनावरणप्राधान्येन च मायाऽविद्य-योर्भेदेन व्यवहारो न विरुध्यते। तदुक्तम्— "मायाविक्षिपदज्ञानमीशेच्छावशवर्ति वा।"**
अविद्या छादयत्तत्त्वं स्वातन्त्र्यानुविधायि वा॥" इत्यादिग्रन्थेन।

तत्त्वार्थविवरणकारास्त्वेकस्या एव प्रकृतेः सत्त्वरजोरूपयोर्गुणयोः सम्बन्धान्मायाविद्ये नाम्नी भवत इति वदन्ति। केचन टीकाकारा विक्षेपशक्तिप्रधानां प्रकृतिं मायेति तथा चावरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्तियुतामविद्येति वदन्ति । सर्वज्ञात्ममुनिविद्यारण्यसुरेश्वराचार्यप्रभृतयस्तु मायाऽविद्ययोर्भेदान्वेषणं जलताडनप्रायमिति मन्वाना मायाऽविद्ये पर्यायशब्दत्वेन गृहीतवन्तः । मायाऽविद्ययोर्मध्ये भेद प्रतिपादयन्तो वेदान्तिन ईश्वरस्य मायामुपाधित्वेन कल्पयन्ति जीवस्याविद्याम् । मायाविद्ये पर्यायत्वेन स्वीकुर्वाणा मायामीश्वरस्योपाधिं जीवस्य चान्तःकरणमुपाधिं कल्पयन्ति ।

भवतु, मायाऽविद्याशब्दयोः भिन्नार्थः स्यादभिन्नार्थो वा, ब्रह्मणः शक्तिरूपेण मायाऽविद्याऽज्ञानं वा स्वीक्रियते । यतो हि मायास्वीकृतिं विना जगत्प्रपञ्चस्य सङ्गतिर्नैव भवति । अद्वैतवेदान्ते 'सर्वं खल्विदं ब्रह्म' 'आत्मैवेदं सर्वम्' 'ब्रह्मैवेदं सर्वम्' 'एकमेवाद्वितीयम्' 'नेह नानास्ति किञ्चन' 'अतोऽन्यदार्तम्' इत्यादिभिः अद्वैतप्रतिपादिकाभिः श्रुतिभिः केवलपरमात्मसत्तातिरिक्तमन्यसत्ताकं निषिध्यते । अतो दृश्यमाननानात्वस्य जगदुत्पत्तेश्च सङ्गतेः कृते अद्वैतवेदान्ते कल्पितमाया स्वीकृता ।

सा च माया भूतप्रकृतिः चिन्मात्रसम्बन्धिनी ब्रह्मज्ञाननिवर्त्या अनिर्वाच्याऽपि अनादिः । सा च ब्रह्मचैतन्यात् न वस्तुतः भिन्ना, ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वप्रतिपादकश्रुतिविरोधात् तस्याः ततो भेदासम्भवात् । तथा च सा नाप्यभिन्ना चैतन्यजडयोरैक्यासम्भवात् । नाऽपि भिन्नाभिन्ना तमःप्रकाशवद् विरोधेनासम्भवात् ।

तस्या मायाया अविद्याया अज्ञानस्य वा स्वरूपमद्वैतवेदान्ते भावरूपं ज्ञाननिवर्त्यमनिर्वचनीयं स्वीकृतम् । तदुक्तम्— **"अनादिभावरूपं यद्विज्ञानेन विलीयते । तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते"** ।। अनादित्वे सति भावरूपविज्ञाननिरस्यमज्ञानमिति लक्षणं विवक्षितम् । केचन अज्ञानस्य ज्ञानाभावरूपंस्वीकुर्वन्ति, तन्न समीचीनम्, अभावस्याकिञ्चित्करत्वात् । भावरूपत्वे तु **"त्वदुक्तमर्थं न जानामीति"** व्यवहारस्यान्यथानुपपत्तिरेव प्रमाणम् ।

एवं सा न सती, अद्वैतश्रुतिविरोधात्। नाप्यसती, भूतप्रकृतित्वानुपपत्तेः । नापि सदसती, सत्वासत्त्वयोरेकस्थाने विरोधात् । एवं सा माया न सावयवा, तस्याः सादित्वप्रसङ्गेन तत्प्रतिबिम्बभूतेश्वरस्यापि सादित्वप्रसङ्गात् । मायायाः सादित्वे तत्प्रकृतित्वेन मायान्तरापेक्षायामनवस्थाप्रसङ्गात् । नापि निरवयवा, प्रकृतित्वाभावप्रसङ्गात् सावयवपदार्थानामेव जगति प्रकृतित्वदर्शनात् । नाप्युभयरूपा, सावयवत्वनिरवयत्वयोरेकत्र विरोधात् । तस्मात् सर्वरीत्या निर्वक्तुमशक्यतया सा माया अनिर्वाच्यैव स्यात् ।

सा चाघटितटनापटीयसी । तामाश्रित्य परमेश्वरः जगत्सर्जनादिकं कर्तुं समर्थोऽस्ति । उक्तं च भगवत्पादैः श्रीमच्छङ्कराचार्यैः—**'अघटितघटनापटीयसी माये'** ति । अन्यथा **'आप्तकामस्य का वाञ्छा'** इति न्यायात् निष्क्रियः परमात्मा जगत्सर्जनादौ कथं वा केन कारणेन वा प्रवर्तेत ? एतदभिसंधायैव भागवतस्य एकादशस्कन्धे देवा भगवन्तमनुस्तुवन्तः **'त्वं मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यमि'** ति अगदन् ।

मायास्वीकारे प्रमाणं तु **'एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' 'अहमज्ञः' 'मामहं जानामी'** ति अनुभव एव । **'अहमज्ञ'** इति प्रत्यक्षप्रतीतौ यो विषयः स विज्ञानघनात्मस्वरूपावरकतया भासते । तथा चाहं मनुष्य इत्यादिभ्रमोपादानं तत्सजातीयं भावरूपाज्ञानमेवाहमज्ञ इति प्रत्यक्षप्रतीतिविषयत्वेनास्थेयं भवति । **'देवात्मशक्तिं स्वगुणैर्निगूढाम्'** इत्यत्र स्वशब्देन ब्रह्मशक्तिः परामृश्यते । **'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'इन्द्रो मायाभिः पुरुरूप**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईयते'। 'अनृतेन हि प्रत्यूढाः' 'नीहारेण प्रावृता' 'भूयश्चान्ते विश्वमायानिवृत्तिः' इत्यादिश्रुतिभ्यश्च मायाऽविद्या अनिर्वाच्यमनृतं तत्त्वज्ञाननिवर्त्यं चाज्ञानमेव स्वपराध्यासे कारणम्। भावरूपेति मायाया अनादित्वेऽपि तस्या निवृत्तिर्ब्रह्मज्ञानेन जायते इति सिद्धान्तः, अन्यथाऽनिर्मोक्षप्रसङ्गेन मोक्षप्रतिपादकश्रुतिस्मृतिवचनानां तदर्थमुमुक्षुप्रवृत्त्यादीनां च नैष्फल्यं स्यात्। नहि निष्फला प्रेक्षावतां प्रवृत्तिर्भवति। अनादित्वेऽपि निवृत्तिसम्भवे निदर्शनं तु अनादितमसो निवृत्तिर्विद्यतेतराम्।

तस्मात् अनिर्वचनीयं मिथ्याभूतं तत्त्वज्ञाननिवर्त्यमेवाज्ञान श्रुतिशास्त्रादिप्रतिपादितम्। एतावता मायावादः श्रुतिस्मृतिपुराणादिशास्त्रैरेव सिद्धो न केनापि व्यक्तिविशेषेण शास्त्रविरुद्धः कल्पित इत्यपि स्पष्टं सिध्यति। एतेन ये कुतर्कव्यसनिनः परेषां मिथ्याऽऽक्षेपमात्रेण स्वमतप्रचारनिपुणाः पाखण्डा अद्वैतवादिन प्रति 'इमे मायावादिनः' इत्युक्त्वा कटाक्षयन्ति, ते च खल्वर्धचन्द्रप्रयोगेण निरस्ता वेदितव्याः। उक्तं च भगवता गीतायां 'मम माया दुरत्यये' ति मायाशब्दार्थो भागवते भगवतैव स्वयमुपदिष्टः—

"ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चाऽऽत्मनि।
तद्विद्यादात्मनो मायां यथा भासो यथा तमः"॥ इति।

—❁❁—

गीतम्

पुष्पं प्रति

— शुकदेवदासः शास्त्री, व्याकरणाचार्यः, एम. ए. दर्शनशास्त्रे

❁

इदं सुप्रसूनं भुवि शोभमानम्,
दृष्ट्वा प्रमोदे खलु बहुमानम्।

उद्याननभसो लघुतारिकेयम्, शोभा शुभेयं तरुपल्लवानाम्।
सर्गस्य पुञ्जीभूतश्च पुण्यम्, जगतोऽस्य मोदस्य परमं निदानम्॥१॥

इदं लोचनानां कल्याणमूलम्, सर्वत्र गन्धप्रसरानुकूलम्।
आकर्षणं हि मधुरस्वराणाम्, कमनीयसंस्पर्शसुरसप्रदानम्॥२॥

जगतीह तावद्दुःखं सुखञ्च, तत्त्वद्वयं हि सर्वानुस्यूतम्।
तत्र प्रतीकं सुमनः सुखस्य, सर्वेप्सितस्य परिदृश्यमानम्॥३॥

त्रिगुणात्मिकेयं प्रकृतिः स्वरूपम्, प्रवृत्तिप्रकाशनियमानुरूपम्।
सर्वत्र धत्ते ह्यन्योन्यमिथुनम्, तत्राऽपि सुमनः सत्त्वप्रधानम्॥४॥

उपदेष्टि सर्वान्—शूलेषु विकसत, लब्ध्वा विभूतिं लोकाय वितरत।
खेदं वहत मा, नितरां विहसत, सफलं तदेव जीवन-निधानम्॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसविमर्शः

—खीमानन्दः सती
साहित्याचार्यः, एम०ए०—सहायकसाहित्य-विभागाध्यक्षः

❀

वेदेषु "दधानः कलशे रसः" शतपथादिब्राह्मणग्रन्थेषु "पशवो मूला ओषधीर्मृलिनी-र्जग्ध्वापः पीत्वा तत एव रसः सम्भवति" तैत्तिरीयाद्युपनिषत्सु च "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति" इति रसाशब्दस्य प्रयोगः विविधार्थेषु प्राप्यते । वाल्मीकिरामायणे च रसाना नामोल्लेखो दृश्यते । यथा—

रसैः शृंगारकारुण्यहास्यवीरभयानकैः । रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ।।

राजशेखरेण "रसनिरूपणकारः नन्दिकेश्वर" इति प्रतिपादितम्, किन्तु तस्य रससिद्धान्तोऽनुपलब्धः । अतः सर्वप्रथमं नाट्यशास्त्रकर्त्रा भरतमुनिनैव काव्यरसस्वरूपप्रतिपादनसौभाग्यं लब्धम् । स्वयमेव भरतेनोक्तम् "ब्रह्मणा पञ्चमनाट्यवेदं निर्माय अथर्ववेदात् शृंगारादिरसाः संगृहीताः । जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च । यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।

भरतमूलसूत्रमिदम्—"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" अर्थात् विभावानुभावसञ्चारिभावाना परस्परं सम्बन्धाद् रसाभिव्यक्तिरिति । आचार्यभरतमुनिना प्रतिपादितैषा परिभाषैव वस्तुतः काव्यशास्त्रिणामुपजीव्या वर्तते । उत्पत्तिवादी भट्टलोल्लटो रसं विभावादेः कार्यम्, शंकुको विभावादिभी रसानुमितिम् (अनुमाप्यानुमापकसम्बन्धेन), भुक्तिवादी भट्टनायकः रसेन विभावादेः भोज्यभोजकसम्बन्धेन सह भावकत्वभोजकत्वे द्वौ व्यापारावपि च मन्यते । मनोविज्ञानभावाद् वेदान्त्यभिनवगुप्तो व्यङ्ग्यव्यञ्जकभाव इति मन्यते । तस्य कथनमिदं यत् सर्वे स्थायिभावाः वासनारूपेण सहृदयहृदयाण्यधितिष्ठन्ति । विभावादिभिस्ते सुप्तस्थायिभावादिभिरभिव्यक्ता भूत्वा तन्मयीभावेन वेद्यान्तरसम्पर्कशून्या ब्रह्मास्वादसदृशपरमानन्दरूपेणानुभूताः भवन्ति । भारतीयरसशास्त्रिणो विचारेष्वयमानन्दः, यः रससंज्ञया व्यवह्रियते, लौकिको भवन्नप्यलौकिको दिव्यो ब्रह्मास्वादसहोदरश्चेति मन्यते । विश्वनाथेनोक्तम्-

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।।

धनञ्जयो धनिकश्च रसो व्यंग्यो नेति मत्वा विभावादौ रसे च भाव्यभावकसम्बन्ध स्वीकरोति । विभावादिभावकास्तु रसादिभाव्याः सन्ति ।

काव्यशास्त्रे रसस्य स्थानंसर्वोपरि वर्तते । काव्यस्यात्मा प्राणश्च रसो नाट्यकाव्ययोः चेतनायाः मध्यस्थः, तयोश्च चरमपरिणत्याधारभूतोऽप्यस्ति ।

लौकिककाव्यानन्दालौकिकब्रह्मानन्दयो रसानुभूत्याधारः कः ? अस्मिन्विषये विश्वनाथस्य रसलक्षणमिदं यत् सहृदयहृदये वासनारूपेणावस्थितो रत्यादिस्थायिभावो यदा विभावानुभावसञ्चारिभावैरभिव्यक्तो भवति, तदा स रसः कथ्यते । यथा—

विभावेनानुभावेन व्यक्तः संचारिणा तथा । रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यमम्मटस्येयं रसपरिभाषा यत् लोके रत्यादिस्थायिभावस्य (आलम्बनोद्दीपनयोः) यानि कारणकार्यसहकारीणि भवन्ति यदि दृश्यकाव्ये (नाटके) श्रव्यकाव्ये वा प्रयुज्यन्ते तर्हि तानि विभावादयः उच्यन्ते, तैर्विभावादिकारणकार्यसहकारिमिर्व्यञ्जनावृत्त्या प्रतिपादितो रतिरूपस्थायी भावो रसो वर्तते । यथा—**कारणान्यथ कार्याणि सहकारीणि यानि च । रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययो : ।। विभावा"** ।इति ।

रसाभिव्यक्तिपरिपोषका विभावादयो नाट्यशास्त्रानुसारेण—**"ज्ञानविषयीभूता ये भावानां ज्ञानं कारयन्तस्तानास्वादयोग्यतां नयन्तीति विभावाः इति ।।"**

रसानुभूतेः दुष्यन्तशकुन्तलादिरूपालम्बनकारणान्युपवनचन्द्रज्योत्स्नादिरूपोद्दीपनकारणानि विभावाः कथ्यन्ते । रसाभिव्यक्तौ रसस्यान्तरङ्गकारण स्थायिभाव आलम्बनोद्दीपनविभावौ च बहिरङ्गहेतू स्तः ।

मनोऽभ्यन्तरस्थिरप्रसुप्तसंस्कारानुकूलालम्बनोद्दीपनरूपोद्बोधकं साधनं प्राप्याभिव्यक्तो रसः सन्दर्शकपाठकानां हृदयेष्वपूर्वानन्दस्य सञ्चारं करोति । स्थायिभावस्याभिव्यक्तिः रस्यमान-कारणात् रसशब्देन बोध्या भवति । स रसः शृंगारादिभेदेन नवप्रकारको वर्तते—

शृंगार-हास्य-करुण-रौद्र-वीरभयानकाः। बीभत्सा-द्भुत-शान्ताश्च काव्ये नव रसाःस्मृताः।।

अनुभावा वस्तुतो रसानुभूतेः बाह्याभिव्यञ्जनायाः साधनान्याभ्यन्तरभावानाञ्च सूचकाः सन्ति । उक्तञ्च भरतेन—**"अनुभावो विकारस्तु भावसंसूचनात्मकः"** ।।

दर्पणकारानुसारेणानुभावस्य लक्षणमिदम्—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् । लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ।।

व्यभिचारिभावा विभिन्नानुभावान्विताऽऽङ्गिकवाचिकसात्त्विकाभिनयैः स्थायिभावान् रसपर्यन्तं नयन्तीति । भरतानुसारेण ये रसेषु नानारूपेण विचरन्ति रसांश्च परिपुष्टान् कृत्वाऽऽ-स्वादयोग्यान्कुर्वन्ति ते व्यभिचारिणः । सागरे तरङ्गाणामुदयावसानयोरिव स्थायिभावे सञ्चारिभावाः भवन्ति । त्रयस्त्रिंशत्ते निर्वेदादिसंख्यया ।

योऽन्यैरनुकूलभावैर्न तिरोहितो न च प्रतिकूलभावैराच्छन्नः, स स्थायिभाव आद्यन्तं याव-देकरस इति । स्थायिभावे रसानुकरणस्य मूलशक्तिः निहिता वर्तते । समुद्रवत् समस्तभावा-नात्मसान्नयति । उक्तञ्च विश्वनाथेन—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः । आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः।।

स्वजीवने मानवः कदा केनापि सह प्रीतिं करोति, कस्यापि जनस्य दुःखेन दुःखी भवति, कदा कस्मै क्रुध्यति, कस्मै असूयति, कदा कस्मात् बिभेति, कस्मिन्नपि कार्ये प्रदर्शयत्युत्साहम्, कदा कमपि जनं हसति, कस्यापि जनस्य वार्तया विस्मयं करोति, कदा च सः शान्तिमनुभवति । मानवस्यैते अनुभावाः नाशमुपगच्छन्ति, किन्तु तस्य हृदये वासनारूपेण सदैव निवसन्तो भावाः काव्यशास्त्रेषु (नाट्यशास्त्रेषु) स्थायिभावा मन्यन्ते । अतो नवशृंगारादिरसानां नव स्थायिभावाः सन्ति । यथा—

रतिः शोकश्च निर्वेदक्रोधोत्साहाश्च विस्मयः । हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभावादयः अनुचराः खलु, स्थायी भावस्तु तेषां विभावादीनामधिष्ठाता । नाट्यशास्त्रे उक्तं यत् यथानेकानुचरैरर्जितयशःश्रेयसोरुपभोक्ताऽन्ततो राजा भवति, यथा छात्राश्च स्वप्रतिभाभिर्गुरुज्ञानं प्रकाशयन्ति, तथा विभावादिभिः परिपुष्टा रसत्वाधिकारिणः स्थायिभावा भवन्ति ।

'यथा नराणां नृपतिः शिष्याणां च यथा गुरुः । एवं हि सर्वभावानां भावःस्थायी महानिह ॥

अनेन रसविषये आलोचनाजाते विभावादिसम्बन्धो रस इति प्रतीयते ।

अतः विचार्यते यत् विभावादिभिः सह रसस्य कः सम्बन्धः ?

लोके जातं वस्तुद्वयम्—कार्यं ज्ञाप्यं च । घटादयः कार्यभूताः भवन्ति । कारणनाशेऽपि तिष्ठन्ति । विभावादिज्ञानजीवनस्य रसस्य विभावादिनाशे तस्य नाश उपचर्यते । विभावादिभावे रसस्य भावः । मम्मटेनोक्तम्—"विभावादिजीवितावधिः रस इति" । अतः रसो न कार्य : ।

नापि ज्ञाप्यज्ञापकभावसम्बन्धो रसः । ज्ञाप्यो हि प्रदीपप्रकाशेन यथा घटादिःस्वनुभवात्पूर्वमपि विद्यमान एव तिष्ठति । अपितु अयं रसः अनुभूतिकालावच्छेदेन सह तेन प्रतियन् अनुभूतिविरहे नाम न तस्य गन्धोऽपि कथञ्चिदपि केनचित् प्रत्येतुं शक्यः ।

यद्यपि लोके द्विविधानि समुपलभ्यन्ते कारणानि, ज्ञापकानि कारकाणि च । रसविषये कारणज्ञापकासिद्धौ रसस्य कार्यत्वज्ञाप्यत्वस्याप्यसिद्धेः । स चैतादृशस्वरूपोऽस्तीति नामेत्याशा खल्वालङ्कारिकाणामाशामोदकायमाना तिष्ठतीत्यपि न वाच्यम् । अनेन हि खलु रसस्य अलौकिकत्वं सिद्धयदस्माकं भूषणं न तु दूषणम् इति तावत्प्रतीयताम् । न खलु सहृदयहृदयैरहरहरनुभूयमाने विलक्षणेऽस्मिन् महानन्दैकरसे रसे केवलालौकिकत्वमात्रदर्शनेन कयाचिद् पुरोभागितया तदत्यन्ताभावत्वं स्वीकर्तुं कस्यचिदपि योग्यम् अन्यथातिप्रसक्तेः, इति ।

"प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः,
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं,
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥"

"वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे,
न च तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च तयोर्भूयान् भेदः फलं प्रति तद्यथा,
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फोटवादविमर्शः

– स्वामी हनुमान् शास्त्री
एम.ए., शिक्षाशास्त्री, व्याकरणन्यायायुर्वेदाचार्य, साहित्यरत्नः
व्याकरणविभागाध्यक्षः

*

शाब्दबोधे वृत्तिमतः पदस्य ज्ञानमेव कारणं भवति । अतः वृत्तिः क्व वर्तते तदाधारश्च क इति जिज्ञासायां प्रत्येकं वर्णा वृत्याश्रया न सम्भवितुमर्हन्ति– वर्णानामाशुक्षणिकत्वेन अन्तभूताद्यवर्ण एव वृत्तिरुचिता भवति, अन्येषां द्वितीयतृतीयादिवर्णोच्चारणानामपि नैष्फल्यं भवेत् । वर्णसमवायोऽपि न वृत्त्याधारो भविष्यति, सर्वोऽपि वर्णः प्रत्युच्चारणं नश्यतीति अनित्य एव, उत्तरोत्तरं वर्णस्थितिकाले पूर्वपूर्ववर्णानां स्थैर्यमप्यसम्भवि ।

एतत्सम्बन्धे नैयायिकाः प्रकारत्रयेण स्वविचारं प्रकटयन्ति । वर्णा यद्यप्यनित्यास्तथापि उत्तरोत्तरो यो वर्णस्तस्मिन् पूर्वपूर्ववर्णवत्ता, अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णजन्यो योऽनुभवस्तदुत्पन्नो यः संस्कारस्तद्बलाद् बोध्यते इत्येव वर्णसमुदायरूपस्य पदस्य प्रत्यक्षत्वेन शाब्दबोधज्ञानं जायते इत्येकः प्रकारः ।

यथा **'वीचिः समुत्पन्ना तरङ्गान्तरं जनयति'** इति वीचितरङ्गन्यायेन एकस्माच्छब्दाच्छब्दान्तरस्योत्पत्तिर्भवतीति पूर्वपूर्ववर्णेभ्य उत्तरोत्तरवर्णा उत्पद्यन्ते इति द्वितीयः प्रकारः ।

पूर्वपूववर्णानां या अनुभूतयः सन्ति एतदुत्पन्नेन संस्कारेण सहान्तिमवर्णानुभवेन शाब्दज्ञान भविष्यत्येव, अतो वर्णसमुदाय एव कथं न वृत्त्याधारः स्यादिति तृतीयः प्रकारः ।

क्रमेण नैयायिकप्रकारान् खण्डयन्ति वैयाकरणाः । तथाहि—प्रथमे उपायेऽप्य पर इति वक्तुं न शक्यते, नष्टवर्तमानयोरव्यवहितोत्तरत्वसम्बन्धोऽप्यवाच्य एवेति प्रथमप्रकारोऽसंगतः । द्वितीयेऽपि शब्दजशब्दन्यायेन पदस्य प्रत्यक्षत्वेऽपि पदस्यावर्तमानत्वेन तत्र शक्तिग्रहोऽपि कर्तुमशक्यः । यदचविद्यमानस्यापि वस्तुन आधारत्वं स्वीक्रियेत, तदा विनष्टो घटो जलवानित्यापद्येत इत्ययमपि पक्षोऽविचारितरमणीय एव । तृतीयेऽपि येन क्रमेणानुभवो भवति तेनैव क्रमेण तत्संस्कारस्य स्थितिर्भवति इति प्रमाणाभावेन 'नदी' कथनेन 'दीन' इत्यस्य, 'सर' इति कथनेन 'रस' इत्यस्य च बोधापत्तिरित्ययमप्ययुक्त एव । तथा च वृत्त्याधारः क इति प्रश्ने 'स्फोट' एवोत्तरमायाति । तथाहि—स्फोटस्वरूपं तत्सृष्टिप्रकारश्च प्रदर्श्यते ।

सत्त्वान्तःप्रविष्टा परमाकाशावस्था चिच्छक्तिः शब्दवाच्या भवति, सैव च तमःप्राचुर्यात् निरोधिका शब्दवाच्या । सैव सत्त्वप्राचुर्यात् अर्धेन्दुशब्दवाच्या । सैव तदुभयसंयोगात् बिन्दुशब्दवाच्या भवति । इयमेव सर्वेषां शब्दानां जननी व्यक्तावस्था ज्ञेया । तदुक्तम्—

इच्छाशक्तिबलोत्कृष्टो ज्ञानशक्तिप्रदीपकः । पुंरूपिणी च सा शक्तिः क्रियाख्यां सृजति प्रभुः ॥

पुंरूपिणी बिन्दुशब्दवाच्या इयमेव विवक्षायुक्ता ज्ञानशक्तिसमन्विता क्रियाशक्त्या सर्वशब्दात्मकं जगदाविर्भवति इत्यर्थः । अयमेव बिन्दुस्तत्तत्स्थानगतः **'परा, पश्यन्ती, मध्यमा, वैखरी''** इत्याख्यो भवति तत्र परा पश्यन्ती च ज्ञानात्मिके । सविकल्पक निर्विकल्पकभेदेन ज्ञानस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वैविध्याद्ज्ञानात्मिकाया वाचो द्वैविध्यं ज्ञेयम्। इच्छात्मिका मध्यमा, क्रियात्मिका वैखरी। एतेन सर्वा अपि वाचः कुण्डलिनीस्वरूपा इति ज्ञायते।

एवं क्रमेण वर्णेभ्योऽभिन्ना निरोधिकाऽर्धेन्दुबिन्दुरूपा कला, ततो रुद्रब्रह्मरमाधिपा देवा अपि तत्तद्भाजोऽभिमानिनो जाताः। वर्णानामग्निसोमात्मकत्वं सोमसूर्यात्मकत्वं चापि निरोधिकाशब्देन व्यवस्थाप्यते। निरोधिकाया वह्निरूपत्वावच्छिन्नरूपत्वम्, अर्धेन्दोः सोमरूपत्वाच्छक्तिरूपत्वम्, बिन्दोरुभयात्मकत्वेन अर्करूपत्वाद् विष्णुरूपत्वम्। तेन च सोमसूर्याग्निरूपिणो भवन्ति सर्वे वर्णाः। एतेन परिदृश्यमानजगदपेक्षया जगद् विलक्षणमेवेति निश्चीयते।

किं च तर्हि इदं व्याकृतमासीत्। **'तन्नामरूपाभ्यामेव व्याक्रियत असौ नामायमिदंरूप इति'** श्रुत्यापि रूपजगतो नामरूपं जगदतिरिक्तमिति सिध्यति। अत्रेदं तत्त्वम् —उक्तश्रुतिवाक्ये **'असौ नामायमिदंरूपः'** इति नामरूपयोर्विशेषः प्रतीयते। एकत्र इदंरूप इति बहुव्रीहिः, अन्यत्तु केवलं नामैव दृश्यते। उभयोरेकविधत्वे अयमिदं नाम इत्येतत्प्रयोगस्य युक्तत्वात्। तथा चैतदनुमीयते **'पूर्णमदः पूर्णमिदम्'** इत्यादिरीत्या सर्वत्र श्रुतिवाक्येषु परोक्षे वस्तुनि अदश्शब्दस्य प्रत्यक्षे चेदंशब्दस्य प्रयोग उपलभ्यते। अतो नाम परोक्षं रूपं तु प्रत्यक्षमिति ज्ञायते।

किं च **'इदंरूप'** इति बहुव्रीहिदर्शनेन इदं रूपं यस्येति विग्रहादस्त्येतत् तद्रूपादतिरिक्तस्तदभिमानी कश्चिदिति प्रतीयते। नामव्याकृतौ **'असौ नाम'** इति दर्शनादसौ नामस्वरूपः सोऽपि परोक्ष एवेति निश्चीयते। एतेन सृष्टेः पुराऽस्पष्टनामरूपत्वेन अव्याकृतशब्दवाच्याद् मायोपाधिकाद् ब्रह्मणः **'नामरूपे व्याकरवाणि'** इतीच्छया नामरूपस्पष्टीकरणलक्षणसृष्टिर्जातेति निश्चीयते। अर्थाद् ब्रह्मैव नामजगत उपादानभूतं नामरूपात्मकरूपजगत उपादानभूतं रूपात्मकं च स्वरूपं गृह्णाति इति सिद्धम्। तदुक्तं **'द्वे एव ब्रह्मणो रूपे नाम रूपं चे'** ति श्रुत्या। अत एवेदानीमपि स्थूलकार्येषु नामरूपयोः स्पष्टतोपलभ्यते। एवं चोपादानस्य ब्रह्मणः स्वीकृतस्वरूपद्वयत्वात्, तत्कार्यभूतस्य जीवात्मनोऽपि रूपद्वयं बोध्यम्। एकं प्रत्यक्षं भौतिकमपरं च परोक्षं नामात्मकम्। तत्र भौतिकेन स्वरूपेण भूतादिकार्यं करोति, अरूपेण नामात्मकस्वरूपेण चारूपशब्दसाध्यं कार्यं कुरुत इति। तथाहि—चिन्मयस्यात्मनः स्वरूपत्रयमुक्तम् **'अयमात्मा वाङ्मयः मनोमयः प्राणमयश्च'** इति श्रुत्यादिना। एतेन प्राणमयं स्थूलं मनोमयं सूक्ष्मतरमिति क्रमोऽप्यत्र ज्ञातव्यः। तथा च प्राणमयः स्थूलं शरीरं रक्षति, मनोमयः सूक्ष्मं, वाङ्मयस्तु कारणशरीरं धारयतीति। इदमेव स्वरूपं सर्वदा निश्चयात्मिकया बुद्धया संयुक्तं तिष्ठति। अर्थात्तेनैव स्वरूपेण किंचिन्निश्चित्य प्रकाशयति, परप्रकाशितं च निश्चिनोति। किं च प्राणमयं रूपमचिरविनाशि, मनोमयमाप्रलयस्थायि, वाङ्मयन्तु आमहाप्रलयस्थायि जोघुष्यते श्रुतिशास्त्रतत्त्वज्ञैः। न केवलमात्मन एव स्वरूपत्रयं किन्तु परमात्मनोऽपि स्वरूपत्रयम्। तथा हि परमात्मनः प्राणमयं स्वरूपमामहाप्रलयं तिष्ठति, मनोमयमास्वरूपप्रलयं, ब्रह्मणो वाङ्मयं तु नित्यमविनाशि एव तिष्ठतीति रहस्यम्।

एतेनेदं विज्ञेयंभवति यत् परमात्मनोंऽशभूतस्वात्मनः मनोमय रूपमेव जीवपदेनाभिधीयते। यत्र वाङ्मयस्वरूपं तदेव स्फोटपदेन व्यवह्रियते शब्दतत्त्वविद्भिर्वैयाकरणैः। एतदेव जीवात्मनः स्फोटाभिधं वाङ्मयस्वरूपं लौकिकशब्दात्मना विपरिणमति। एवं परमात्मनोऽपि यद् वाङ्मयस्वरूपं तदेव वैदिकशब्दात्मना परिणतं वेद इत्युच्यते। अतएव तस्य परिवर्तने पुरुषाणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाधिकारः। एतदेव च वाङ्मयस्वरूपं शब्दब्रह्म इत्युच्यते तत्त्वज्ञैः। एतदेव च स्वरूपं तत्तत्स्थानभेदात् परापश्यन्तीमध्यमावैखरीशब्दैर्व्यवह्रियते। वस्तुतस्तु स्फोटात्मा त्वेकविध एवेति तत्त्वम्। तथाहि— उक्तरीत्या शब्दब्रह्मात्मकः सच्चिदानन्दरूपोऽपि सर्वशब्दमयजगदुपादानभूतः प्राणिनां मूलाधारेऽभिव्यज्यते। तदुक्तम्—

स तु सर्वत्र सस्यूतो, जाते भूताङ्कुरे पुनः।
आविर्भवति देहेषु, प्राणिनामर्थविस्तृते॥

पाञ्चभौतिके शरीरजाते सति सर्वत्रानुस्यूतोऽपि रसः प्राणिनां मूलाधारप्रदेशे संस्कृतपवनरूपेणाविर्भवति अभिव्यक्तिमाप्नोतीत्यर्थः। मूलाधारे पवनोत्पत्तिरुक्ता—यथा देहेऽपि मूलाधारेऽस्मिन् समुद्यति समीरण इति। एवं च विवक्षो पुरुषस्य इच्छया जाते प्रयत्नेन मूलाधारस्थः पवनः संस्कृतः, तेन पवनेन सर्वत्रावस्थितं शब्दब्रह्म तत्राभिव्यज्यते। तदभिव्यक्तं सर्वशब्दकारणं पूर्वोक्तबिन्दुरूपं स्वप्रतिष्टया निष्पन्दं सत् तच्छब्दब्रह्म परा वागित्युच्यते। तदेव शब्दब्रह्म नाभिपर्यन्तं गच्छता वायुनाऽभिव्यक्तं सामान्यस्पन्दरूपं प्रकाशात्मकं ब्रह्म मनोगोचरीभूत पश्यन्ती वागित्युच्यते। तदेव ब्रह्म तेनैव वायुना उरःपर्यन्तमागच्छताऽभिव्यज्यमानं विशेषस्पन्दशून्यं पूर्वोक्तनादहिरण्यगर्भस्वरूपं निश्चयात्मिकया बुद्धया गृह्यमाणं मध्यमा वागित्युच्यते। तदेवास्यपर्यन्तमागच्छता तेनैव वायुना कण्ठादिस्थानेष्वभिव्यज्यमानं ककारान्तवर्णमालारूप पूर्वोक्तबीजात्मकं विराट्स्वरूप वैखरी वागित्युच्यते। यथाऽऽचार्या आहुः —

परा वाङ्मूलचक्रस्था, पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठदेशगा॥

यथा परब्रह्मणो रूपस्य चातुर्विध्यं, निष्कलमीश्वराभिधं सकलं हिरण्यगर्भाभिधं विराट्स्वरूपं च भवति तथैव शब्दब्रह्मणोऽपि निर्विकल्पकज्ञानरूपं पराख्यं, स्फोटस्वरूपाख्यं मध्यमारूपमेव कार्यरूपं वैखर्याख्यं च भवतीति सम्यग् ध्वनितम्।

इदमत्र ध्येयं यत् स्फोटस्यापरपर्यायस्य शब्दब्रह्मणश्चतुःस्वरूपत्वेऽपि परावाग्रूपं ब्रह्म योगिनामेव समाधौ निर्विकल्पकज्ञानविषयं, पश्यन्तीवाग्रूपं ब्रह्म च योगिनामेव समाधौ सविकल्पकज्ञानविषयं भवति, इत्येतस्मात् कारणात् मध्यमानादाभिव्यङ्ग्यस्यैव बुद्धिनिर्ग्राह्यताऽस्तीति तस्यैव सर्वप्राणिनामर्थबोधकतया स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या स्फोटनाम्ना प्रोच्यते वैयाकरणैरिति।

यथा आत्मा आत्मना आत्मानं जानातीत्यत्र एक एवात्मोपाधिभेदेन कारणत्वं भजते, उपाधिभेदाद्विभिन्नोऽपि चैकेनैव शब्देन व्यवह्रियते, तथैव एकस्यैव स्फोटस्य तत्तदुपाधिभेदाद् भेदो भवति। वस्तुतस्तु एकविध एव स्फोटः शब्दब्रह्मस्वरूपो नित्यश्चेति। **"वैखर्या हि कृतो नादः परश्रवणगोचरः। मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते"** ॥ इति कथनं तु वागात्मकस्य स्फोटस्य स्फोटत्वप्रतिपादनाय न तु परापश्यन्तीरूपस्य शब्दब्रह्मणः स्फोटत्वनिराकरणायेति, सर्वेषां नादानामेकस्यैव ब्रह्मणः प्रकाशकत्वात्। एवं च वैखर्यात्मकः शब्दः स्थूलः, मध्यमारूपः सूक्ष्मः, पश्यन्तीरूपः सूक्ष्मतर इति शब्दस्वरूपस्य ब्रह्मणस्त्रिविधं शरीरमधममध्यमोत्तमाधिकारिणां विषयभूतं भवतीति ज्ञेयम्।

यथाऽऽत्मनोऽविद्याविशिष्टं कारणशरीरं सूक्ष्मतरं, लिङ्गसंज्ञकं सूक्ष्मं, पाञ्चभौतिकं शरीरं तु स्थूलमिति त्रिविधं स्वरूपं क्रमेण सूक्ष्मतरसूक्ष्मस्थूलबुद्धिकाः योगिपण्डितमूर्खाश्चेत्येतत्त्रयोऽधिकारिणो भवन्ति। एवं स्फोटरूपस्य शब्दस्यापीति विस्तरभिया नोपपाद्यते इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाङ्करवेदान्ते कर्मणामुपयोगः

–स्वामी हरप्रकाशः
वेदान्ताचार्यः, वेदान्तविभागाध्यक्षः

*

सर्वेषां जीवानां परमपुरुषार्थो मोक्ष एव। मोक्षप्राप्तिरद्वितीयात्मतत्त्वज्ञानादेव भवति। "ऋते ज्ञानान्न मुक्तिः" इति श्रुत्या ज्ञानस्यैव मोक्षसाधनत्वं समर्थितम्। यदि ज्ञानमेव मोक्षसाधनमस्ति, तर्हि तज्ज्ञानं केनचित्साधनेनोत्पद्यते? साधनान्तरं निरपेक्ष्य स्वयमेवोत्पद्यते वा? अस्मिन् विषये सर्वेषामाचार्याणामियं सम्मतिः यदन्तःकरणशुद्धावेव ज्ञानमुदेति। अन्तःकरणे त्रयो दोषा भवन्ति–मलं विक्षेप आवरणञ्च। मलं नाम जन्मजन्मान्तराणामशुभकर्माणि वेदशास्त्रनिषिद्धानि। विक्षेपो नाम बुद्धेश्चाञ्चल्यम्, यथा चले जले सूर्यप्रतिबिम्बं स्पष्टं न भासते, तथैवास्थिरबुद्धौ चैतन्यप्रतिबिम्बं स्पष्टं न प्रतीयते। चैतन्यप्रतिबिम्बयुक्ताद्वितीयात्माकारबुद्धेर्नामज्ञानमस्ति। आवरणस्य च नामाज्ञानम्।

मलविक्षेपावरणसंज्ञकदोषत्रयनिवृत्तिः क्रमशो नित्यनैमित्तिकप्रायश्चित्तकर्मभिरुपासनया ज्ञानेन च भवति। अत एवोक्तानि कर्माणि त्रीणि ज्ञानोदयपर्यन्तमवश्यकर्तव्यत्वेन ग्राह्याणि सन्ति। यद्यपि कर्म मोक्षस्य साक्षात्साधनं नास्ति, तथापि परम्परया तु अस्त्येव। "**ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः**" इत्यादिस्मृतिषु पापक्षयरूपसंस्कारद्वारेण ज्ञानोत्पत्तौ कर्मणामुपयोगः स्पष्ट एव। कर्मणां संस्कारद्वारेण ज्ञानसिद्धेरङ्गत्वं भगवता श्रीकृष्णेनाप्युक्तं गीतायाम्–'**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः**" इति। अत्र स्वपदेन नित्यकर्मणामेव ग्रहणम्। सिद्धिपदेन अन्तःकरणशुद्धिरभिहिता। अन्यत्राप्युक्तं भगवता–

"**सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे**"।

"**बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥**"

शुद्धान्तःकरणः सन् धृत्या स्वं नियम्य ध्यानयोगे तत्परो भूत्वा वैराग्यं प्राप्नुयात्। "**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्**" अर्थात् यथार्थरूपेण सच्चिदानन्दस्वरूपं मां वासुदेवं ज्ञात्वा मया सहैक्यं प्राप्नोति। इत्थं भगवता दर्शितेन मार्गेण नित्यकर्मानुष्ठानेन ध्यानयोगरूपसहकारिसाधनलाभेन च सत्त्वशुद्धिसम्पत्त्या तत्त्वज्ञानमुदेति। अत एव तत्त्वज्ञानफलरूपमोक्षप्राप्तौ कर्मणामुपयोगः स्पष्टः।

"**प्रत्यक् प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव॥**"

यथा वृष्टिकालसमाप्त्यनन्तरं घना विलीयन्ते, तथाऽन्तःकरणशुद्धिद्वारा परमात्मविषयिणीं तत्परतामुत्पाद्य यज्ञादिकर्माणि कृतार्थानि अस्तमायान्ति।

ये आचार्यशङ्करमाक्षिपन्ति यत्स नास्तिक इव कर्मणां विरोधी, तेषामाक्षेपस्तु निर्मूलः। यतः स चित्तशुद्धये कर्मणामवश्यकर्त्तव्यत्वमङ्गीकरोति, शङ्करस्येदमेव तात्पर्यं यदन्तःकरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धिः निष्कामकर्मभ्य एव भवति । येषां पुरुषाणां वर्तमानदेहे निष्कामकर्माभावः, अथ च शुद्धमन्तःकरणं तैर्जन्मान्तरे निष्कामकर्म सम्यक् सम्पादितमिति मन्तव्यम् ।

कर्मणां बीजं देहाभिमानोऽस्ति, तस्याभावेन स्वभावत एव तस्मिन् समये कर्मणां त्यागो भवति । देहाभिमानरहितपुरुषः कर्माणि न त्यजति, अपितु कर्माण्येव तं त्यजन्ति । इयमेव नैष्कर्म्यावस्था उच्यते । अस्या अवस्थायाः प्राप्तये निष्कामकर्मणामवश्यकर्तव्यताविधानं पूर्वाचार्यैः कृतम् । यथा कण्टकेन कण्टकमुद्ध्रियते तथैव निष्कामकर्मभिरेव देहाभिमानोऽपनीयते । परन्तु केवल निष्कामकर्मभिरेव नहि मानवजीवनस्य कृतार्थता, अपित्वात्मज्ञानेनैव कृतार्थता ।

उक्तञ्च भगवता श्रीकृष्णेन गीतायाम्—"सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते" ।

इदमेव तात्पर्यं भगवतो यत्समस्तकर्तव्यकर्मणां फलमात्मज्ञानोत्पत्तिरेव । यदा निष्कामकर्मभिर्मनुष्याणां सत्त्वशुद्धिर्भवति तदा स्वयमेव मनुष्याणां प्रवृत्तिरात्मज्ञानायाग्रेसरा भवति ।

काव्यप्रयोजनानि

—राजाराम उनियालः

साहित्यव्याकरणाचार्यः, एम० ए०—साहित्यविभागाध्यक्षः

भारतीयसाहित्यस्य विश्वसाहित्ये महत्त्वपूर्णं स्थानं वर्तते । भारतीयसाहित्यं ज्ञानविज्ञानयोर्निधिरस्ति । अत्र वेदानां स्मृतीनामितिहासानां पुराणानामिव काव्यानामपि महन्महत्त्वं विद्यते । बहूनि सन्त्यत्र काव्यानि । वेदादिशास्त्रेषु सत्स्वपि विरचितानां तदाश्रितानां काव्यानामस्ति किमपि प्रयोजनमित्यपेक्षायां तद्विषये विचार्यते किञ्चित् ।

काव्यप्रयोजनविषये काव्यप्रकाशसाहित्यदर्पणरसगङ्गाधरादिग्रन्थेषु विचारितमस्ति । काव्यप्रकाशे काव्यस्य षट् प्रयोजनान्युक्तानि सन्ति । यशःप्राप्तिरर्थप्राप्तिर्व्यवहारज्ञानमनर्थनिवारणं सद्यःपरनिर्वृतिः,(रसास्वादः) कान्तासम्मिततयोपदेशयोगश्चेति । उक्तञ्च—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

भारतीयपरम्परायामनुभूयते यदत्र कोऽपि जनः किमपि कार्यं नहि केवलं स्वहितायैव करोत्यपितु स्वहितेन सह परहितस्यापि पूर्णध्यानं रक्षति । अस्याः परम्पराया निर्वाहः कवेः कर्मणि काव्येऽपि स्पष्टतयाऽवलोक्यते । यत उक्तेषु षट्सु प्रयोजनेषु यशःप्राप्तिरर्थप्राप्तिरनर्थनिवारणञ्चेति त्रीण्येव प्रयोजनानि कवेः सन्ति । यशसः प्रथमोपादानेनेदमपि ज्ञापितं भवति यदेकस्य भारतीयस्य कृते यथा यशसो महत्त्वमस्ति न तथान्यतुच्छपदार्थानामिति । व्यवहारज्ञानं सद्यःपरनिर्वृतिः कान्तासम्मिततयोपदेशयोगश्चेति त्रीणि प्रयोजनानि पाठकानां (सहृदयानां) सन्ति । इदमेव परहितम् । कवौ त्वेतानि पूर्वसिद्धानि, तस्य तादृशवर्णनशक्तियुक्तत्वात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यरचनया कविना यशो लभ्यते। प्रत्यक्षप्रमाणसिद्धमिदम्। यतो भासकालिदासादिकवीनां यशो नहि केवलं भारतवर्षे, अपितु विभिन्नदेशेष्वप्यस्ति व्याप्तम्। काव्यतः कवेरर्थलाभोऽपि प्रत्यक्षसिद्धः। यतः काव्यरचनया बहुभिः कविभिर्धनं लब्धं लभ्यते च। काव्यरचनातः कविभिरनर्थनिवारणमपि कृतम्। श्रूयते यन्मयूरादिकविभिः सूर्यशतकादिग्रन्थरचनया स्वकुष्ठादिरोगनिवारणं कृतम्। अत एतत्प्रयोजनत्रयं कवेरेव।

पाठकानां कृते यत्प्रयोजनत्रयं तद्विषये विचार्यतेऽधुना। यदि काव्यनिर्माणं कविः केवलमात्महितायैव कुर्यात्तर्हि तस्य किमपि विशिष्टं महत्त्वं लोके न स्यात्। भारतीयस्यात्मनो भाव ऊच्चैर्भवति, अतः काव्यस्योपयोगिता यथा पाठकानां कृते विद्यते न तथा कवेरात्मकृते। पाठकसम्बन्धेनैतत् प्रयोजनत्रयं समाजस्याप्यस्ति। काव्यद्वारेण पाठकानां प्रयोजनसिद्धिः, पाठकद्वारेण च समाजस्यापीति परम्परासम्बन्धः।

पाठकानां कृते काव्यस्यैकं प्रयोजनं व्यवहारज्ञानमस्ति। कोऽपि जनोऽन्येषु विषयेषु क्रियानपि योग्यः किं न स्यात् परन्तु "**कुत्र कीदृक् स्थातव्यम्**" "**कुत्र कीदृगुपवेष्टव्यम्**", "**केन सह कीदृग् वक्तव्यम्**", "**केन सह कीदृग् वर्तितव्यम्**"इत्यादिव्यवहारं यदि स न जानाति, तर्हि स्वस्य समाजस्य चोत्थानं कदापि कर्तुं न शक्नोति। यतः समाजे व्यवहारज्ञानं विना एकमपि पदं गन्तुं कठिनमस्ति। काव्येषु च कवयः स्वप्रतिभया तादृशानि चरितानि वर्णनानि वोपस्थापयन्ति यत्पाठको यान्व्यवहारानने कैः प्रयत्नैरपि ज्ञातुं न शक्नोति, तान्काव्यद्वारेण सुखेन जानाति, तैश्चात्मजीवनमुन्नतं कुर्वन्नितरजनानप्यानन्दयति शिक्षयति च। जीवनं लघु, व्यवहारा बहवः, विशालो लोकः। नहि कोऽपि लोकतः सर्वान् व्यवहारानधिगन्तुं प्रभवति। तस्मादस्ति कविप्रतिभाजनितस्य काव्यस्य महत्त्वं यत्स्वल्पेनैव समयेन विविधान् व्यवहारान् सुखेन शिक्षयति। व्यवहारज्ञश्च पाठकः स्वयमानन्दमनुभवन् समाजमप्यानन्दयति। अतः समाजसुखमपि फलम्।

पाठकानां कृते काव्यस्य द्वितीयं प्रयोजनमस्ति सद्यःपरनिर्वृतिः। रसास्वादसमुद्भूतानन्दावाप्तिरित्यर्थः। जनः स्वजीवनस्य संघर्षैः खिन्नोऽशान्तश्च प्रायो भवति। तस्य खिन्नतामशान्ततामपनेतुं काव्यं नाटकं वा यथा सफलं भवेन्न तथान्यद्वस्तु। न हीदमेव फलं काव्यस्य, अपितु रसास्वादसमुद्भूतानन्दावाप्तिरपि। तत्प्रमाणं तु पाठक एव। रसास्वादस्थितिरलौकिकी भवति। तत्र जनो लौकिकरागद्वेषादिभावान् विस्मृत्यानुपममास्वादं लभते। तेन च तस्य हृदय उदारता समुदेति। तदा स काव्यवर्णितपात्रेणात्मसम्बन्धं स्थापयति। तत्सुखे सुखं, तद्दुःखे च दुःखमनुभवति। क्रमेण च तस्मिन् हृदयौदार्यं, वचनस्येतरजनाह्लादकं माधुर्यम्, आचरणस्योत्तमत्वञ्चेत्यादयः सद्गुणाः समुत्पद्यन्ते। एभिरेव गुणैर्जनो महान् लोकप्रियश्च भवति। लोकप्रियजीवनमेव दुर्लभमत्र लोके। यदि तदस्ति तर्हि सर्वं सम्पन्नम्। लोकप्रियतया समाजोऽपि ततः किञ्चित् शिक्षते। क्रमशः समाजस्यापि जीवनं सानन्दं भवति। रसिक एव रसं दातुं शक्नोति। काव्यस्य सम्बन्धो हृदयेन सह विद्यते। तदेकस्य हृदयत उत्पद्यतेऽन्यस्य च हृदयं प्रविशति। हृदयं शरीरस्य प्रधानमङ्गं वर्तते, न मस्तिष्कम्। दृश्यते लोके यन्मस्तिष्कस्यासफलतया जनः केवलमुन्मत्तो भवति हृदयस्यासफलतया तु शरीरमेव नश्यति, अतो हृदयं प्रधानम्। तस्यैव भावः शब्दो वा काव्यम्, तदेव प्रभावयति। अतो हृदयस्य वशीकरणमन्त्रः काव्यं तत्रोदारतादिगुणोत्पादनेन जनजीवनं लोकप्रियं कर्तुं शक्नोति। तदेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहृदयताया उदारतायाः सज्जनताया वा निर्माणशाला समाजस्य सुखकारणञ्च । एवं काव्यतः पाठकस्य रसास्वादस्ततः उदारतोदयस्तेन लोकप्रियता तया च समाजसुखम् इति प्रयोजनं परम्परासम्बन्धेन ।

पाठकानां कृते काव्यस्य तृतीयं प्रयोजनमस्ति कान्तासम्मिततयोपदेशयोगः । काव्यं केवलं ललितकलैव नास्ति, अपितु समाजमुत्थापयितुमुपयोग्यप्यस्ति । तत् सरसतयोक्तिवैचित्र्येण च कान्तेव वशीकृत्य सहृदयहृदयं "रामादिवद् वर्तितव्यम्, न रावणादिवद्" इत्यादिसदाचारं शिक्षयति । यद्यपि सदाचारं वेदादिशास्त्राण्यप्युपदिशन्ति, पुराणेतिहासादयोऽप्युपदिशन्ति, परन्तु तेषां परुषतया क्लिष्टतया नीरसतया च नहि सुखेन प्रवेशो भवति तत्र सर्वसाधारणस्य । आधुनिको हि जनः सरलतां सरसताञ्चेच्छति । अतो नहि वेदादिशास्त्राणामुपदेशकरणेऽद्य सामर्थ्यम् । गुरोरप्युपदेशो न प्रभवत्यधुना, तत्रापि कदाचिद् दोषादिदर्शनेन श्रद्धाभङ्गप्रसङ्गात् । काव्यस्य त्वेतेभ्यो वैलक्षण्यम् । नहि तत्र नीरसता, नहि क्लिष्टता, नहि श्रद्धाभङ्गप्रसङ्गः । जनहृदयं वशीकर्तुमस्ति तस्य पूर्णं सामर्थ्यम् । यथा कान्ता दयितं गुरुमित्राद्यधीनमपि वैलक्षण्येन कटाक्ष-भुजक्षेपादिना सरसतामापाद्य स्वाभिमुखीकृत्य स्वस्मिन् प्रवर्तयति, तथैव काव्यमपि सुकुमारमतीन् सुखिस्वभावान् नीतिशास्त्रपराङ्मुखान् राजकुमारादीन् ललितपदावल्युपदर्शितशृङ्गारादिरसेन सदुपदेशरूपस्वार्थे प्रवर्तयति । काव्यस्योपदेशप्रकारोऽपि विलक्षण एव । उक्तञ्च–

> व्यङ्ग्यप्रधानाभिनवैव भङ्गी मुख्यार्थबाधः परमप्रकर्षः ।
> वक्रोक्तयो यत्र विभूषणानि सा काचिदन्या सरणिः कवीनाम् ॥

अधुनेदं विचारणीयमस्ति यत्काव्यं किमुपदिशति, कश्च लाभस्तेन ? उच्यते–भारतीया संस्कृतिर्विश्वसंस्कृतिषु श्रेष्ठा मन्यते । यतस्तत्र विश्वबन्धुत्वभावना निहितास्ति, त्यागस्य, तपसः, सत्यस्य, सदाचारस्य, सहनशीलतायाश्च प्राधान्यमस्ति । स्वार्थपरित्यागस्य परोपकारस्य च महत्त्वं विद्यते । सर्वत्रात्मभावदर्शनस्य चरित्रनिर्माणस्य चोपदेशोऽस्ति । एतत्सर्वं धर्म इति कथ्यते । । वस्तुत एतानि जीवनस्य सुखशान्त्योः साधनानि सन्ति । एभिः सम्पूर्णे जगति शान्तिं स्थापयितुं शक्नोति जनः । एतानि वेदादिशास्त्रेषु लिखितानि सन्ति, तेषां दुर्बोधतया नहि सर्वस्य सम्मुख आपतन्ति । कविभिस्तु चरित्रवर्णनव्याजेन काव्येषु सरसतयोक्तिवैचित्र्येण च लोकहिताय लिखितानि तानि लोकहृदयं प्रविशन्ति । तैश्च पाठकजन आत्मजीवनमुन्नतं कुर्वन् समाजमप्युन्नतं कर्तुं शक्नोति । अतोऽस्ति काव्यस्य महन्महत्त्वं यत् तेन जनजीवनं सानन्दं भवति । अतः समाजसुखमपि प्रयोजनं परम्परया ।

साहित्यदर्पणे धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्य प्राप्तिः काव्यस्य प्रयोजनमुक्तम् । इदमपि पाठकानां कृते तत्सम्बन्धेन च समाजस्यापि । काव्यवर्णितचरितेषु पुरुषार्थचतुष्टय-प्राप्त्युपाया वस्तुतः सन्ति । तेषामवलम्बनेन सर्वैरपि सुखेन पुरुषार्थचतुष्टयसमुद्भूतसुखं प्राप्तुं शक्यते, काव्यस्य हृदयवशीकरणयोग्यत्वेनोपदेशकत्वात् । रसगङ्गाधरे यशःपरमाह्लादगुरुदेवता-प्रसादादिकाव्यप्रयोजनान्युक्तानि । तानि तु काव्यप्रकाशोक्तदिशा कवेरेव ।

अद्य स्वसंस्कृतेस्त्यागेन जनमानसेषु छलस्वार्थपरतादयो दोषा वृद्धिं गताः सन्ति । तज्जनितोपद्रवांश्चोन्मूलयितुं सुखं शान्तिं च स्थापयितुं भारतीयसंस्कृतेराश्रयभूतानि काव्या-न्येव समर्थानि सन्ति । तेषां वर्तमानशिक्षायां समावेशः परमावश्यकः । तदैव काव्यानां प्रयोजनसिद्धिर्भविष्यति, इति ।

*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मणः स्वप्रकाशत्वम्

— मनसारामः शर्मा
व्याकरण-वेदान्त-साहित्याचार्यः, एम. ए., साहित्यरत्नः, काव्यतीर्थः —प्रधानाचार्यः

*

इह खलु सत्यानृताहोरात्ररागद्वेषशीतोष्णसुखदुःखभावाभावधर्माधर्माद्यनेकविधपरस्परप्रतिद्वन्द्विपदार्थघटिते सदसद्भ्यामनिर्वचनीये जगति, 'सुखं मे स्यात् दुःखं मे माभूदि'ति विद्यतेतरामात्मन्याशीः। तत्र च जाग्रत्स्वपि तेषु तेषु लौकिकवैदिकेषूपायेषु नात्यन्तिकी दुःखहानिः सुखप्राप्तिश्चापायबहुलेषु दृश्यतेतरामिति। ततश्च वेदान्तराजशास्त्रविषय एव सर्वथा जिज्ञास्यतां प्रैति। उक्तं च—

> "दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
> दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥"

सन्ति तावद्यद्यप्युपायास्तेषामाधिभौतिकाध्यात्मिकाधिदैविकदुःखानां, किन्तु न खलु विश्वसनीयाव्यभिचारिता वरिवर्तितरां तेषां, यतो हि समनुष्ठितेऽपि मणिमन्त्रौषधादिप्रयोगे कदाचिदेव विनिवर्तन्ते ते शारीरिकमानसिकव्याधिचिन्तादयश्चेति। ब्रह्मज्ञानं त्वेकं समूलघातं हन्तुमर्हति समस्तमपि दुःखप्रकरमिति श्रुतिरप्याह—**"श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः"** अथ **"वरस्तु मे वरणीयः स एव"** इत्यादिना। ब्रह्मणश्च प्रमाणाविषयत्वं समामनन्ति खलु वेदाः— **'विज्ञातारमरे केन विजानीयात्'** इति। यस्य भासा खल्विदं सर्वं भाति स केन भास्येत। अतस्तस्य स्वप्रकाशत्वं सिद्ध्यत्येवेति।

ननु ब्रह्मणः स्वप्रकाशत्वे सदाविदिततया विदितत्वाभावेन शास्त्रागोचरत्वमिति तस्यौपनिषदत्वाऽनुपपत्तिरिति चेन्नाविद्यावृतत्वेनाविदितमिव भवति यतोऽतः शास्त्रगोचरत्वसंभवात्। न च स्वरूपज्ञानस्याविद्यानिवर्तकत्वेन तत्राविद्यावस्थानानुपपत्तिरिति वाच्यम्, वृत्तिज्ञानस्यैवाविद्यानिवर्तकतयाऽदोषात्। स्वरूपज्ञानमविद्यासाधकमपि श्रवणादिसापेक्षापरोक्षवृत्तिसमारूढं सत् अविद्याया निवर्तकम्। तृणादिभासिकापि सूर्यादिदीप्तिर्यथाऽयस्कान्तसमारूढा तृणदाहिकाऽपि जायते, स न्यायोऽत्र कल्पनीय इति। ब्रह्म हि ज्ञानाभिन्नं, ज्ञानस्य च स्वप्रकाशत्वम्। अन्यथा ज्ञानस्य ज्ञानान्तरवेद्यत्वेऽनवस्था, शेषासिद्धेर्मूलासिद्धिरित्यपरोक्षालम्भस्य नार्थदृष्टिः प्रसिद्ध्येत्। ननु ज्ञानस्य ज्ञानान्तरग्राह्यत्वेऽनवस्था न दोषो ज्ञानसिद्ध्यन्यथाऽनुपपत्तिमानसिद्धत्वात्, घटस्य कादाचित्कत्वाऽन्यथाऽनुपपत्तिमानसिद्धा तत्सामग्रीपरम्परेति चेन्न, वैषम्यात् घटस्य कादाचित्कत्वाऽनुपपत्या सामग्रीपरम्पराया अनादित्वमन्यथा कुत्रचित्सामग्रीविच्छेदे घटस्यानादित्वं स्यादित्यर्थः।

इदमाकूतम्— कारणसामग्रीविरहिणां द्वयी गतिः, आकाशादिवन्नित्यसत्वमेवेत्येका खपुष्पादिवन्नित्यासत्वमेवेति द्वितीया। घटस्यापि सामग्रीरहितत्वे वर्णितान्यतरा स्यात्। ननु ज्ञानप्रवाहस्य कुत्रचिद्विच्छेदे तदारभ्यार्थपर्यन्तमसिद्ध्या व्यवहाराऽनुपपत्तिः स्यादिति सैव ज्ञानपरम्पराया अनादित्वं कल्पयतीति ममाप्यनवस्था प्रामाणिकीति चेन्न, ज्ञानं स्ववेद्यं, परवेद्यमुता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेद्यम् ? नाद्यः स्वस्य प्रवेशात्स्वप्रकाशापत्तिः, अप्रवेशादनवस्था, अवेदने शेषासिद्ध्या सर्वासिद्धिरिति दुर्व्यसनं दुरुत्तरमेव। तथा चोक्तं खण्डनकृद्भिः—

'नात्यापत्या प्रमामात्रात्ते तेऽर्थाः स्वीक्रियोचिताः।
तद्धियस्तद्दूरीकारे स्वाश्रयं कश्चिर्चाकित्सतु" ॥

अयमर्थः— प्रमामात्राद् घटादिसिद्ध्यङ्गीकारेऽन्यविषयकप्रमयान्यस्यापि सिद्धिः स्यात्, तस्माद् अत्यापत्या अतिप्रसङ्गेन ते ते घटादयोऽर्थाः न स्वीक्रियोचिताः, न स्वीकर्तव्याः। अथ च घटज्ञानात् तद्दूरीकारे घटसिद्ध्यङ्गीकारे तु घटादपि घटसिद्धिः स्यात् ज्ञानकुक्षिनिविष्टत्वात्, घटादेस्तया च स्वाश्रय आत्माश्रय इत्यर्थः।

किञ्चेदमप्यालोचनीयमापतति— ज्ञानस्य ज्ञानान्तरवेद्यत्वे तस्य ज्ञानान्तरेण कः सम्बन्धः, न संयोगोऽद्रव्यत्वात्, न समवायो द्वयोरेकगुणत्वात्, न तादात्म्यम् एकान्तभिन्नयोरभिन्नयोर्वा तदयोगात्, न विषयिविषयभावः विषयस्य दुर्निश्चयत्वात्। ननु ज्ञानस्य ज्ञानान्तरज्ञेयत्वेऽनवस्था, स्वज्ञेयत्वे कर्मकर्तृविरोधः इति मास्तु ज्ञानं वरं शून्यवाद एवेति चेन्न, स्वतःसर्वसिद्धस्यापह्नोतुमशक्यत्वात्, अन्यथा जगदान्ध्यप्रसंगस्योक्तप्रायत्वाच्च।

यद्यपि ब्रह्मस्वभावाभिन्नस्य ज्ञानस्याभेदे विषयविषयिभावविरोधः समुन्मिषति, यतो हि यत्र सम्बन्धिनोः स्वरूपभेदप्रमा तत्रैव सम्बन्धप्रमा, प्रकृते च सम्बन्धिभेदप्रमानिवृत्या सम्बन्धप्रमा निवर्तते। भिन्नसम्बन्धिप्रमा सम्बन्धप्रमाकारणमतः कारणनिवृत्या कार्यं स्वयमेव निवर्तते। किन्तु स्वप्रकाशद्विषापि विषयविषयिभावसम्बन्धः सम्बन्धिभिन्नो नाभ्युपगन्तुं शक्यः। अन्यथा स्वीकृतस्यापि सम्बन्धस्य सम्बन्धान्तरमभ्युपेयमेवं तस्य तस्येति, अनवस्थानमेव पर्यवस्थितम्। यथा च परमते स्वरूपसम्बन्धस्य सम्बन्धिद्वयात्मकत्वं स्वीक्रियते, तथैव स्वमते तस्य एकसम्बन्धिरूपत्वमनवस्थाभिया स्वीकरणीयमेव। ननु सम्बन्धान्तरापेक्षया स्वरूपसम्बन्धे वैषम्यं परैरभ्युपेतम्, त्वया तु तदपेक्षयापि वैषम्यमुच्यतेऽत एकस्यावास्तविकत्वं स्वीकार्यम् वस्तुनि विकल्पायोगात्, सत्यमेवाविद्याविद्यमानस्य घटतज्ज्ञानयोः सम्बन्धस्यैव बाध्यमानत्वात्, स्वप्रकाशस्य परमार्थिकत्वादतोऽन्योरननुगमेऽपि न दोषः।

अयं भावः— लोकसिद्धविषयविषयिभावस्य भेदघटितत्वम्। स्वप्रकाशविषयविषयिभावस्य चाभेदघटितत्वम्, तत्र च भेदघटितस्य बाध्यमानत्वेनैकरूपतामात्रपरिशेषात्, अननुगमस्यैवापास्तत्वात्। तदेवं ज्ञानं स्वविषये घटादौ व्यवहारं प्रवर्तयदेव स्वस्मिन्नपि व्यवहारं प्रवर्तयति, व्यवहारस्य ज्ञानैकसाध्यत्वात्। स्वभिन्नज्ञानसाध्यत्वे प्रमाणाभावात् बहुव्रीहिसमासवत्। तथाहि बहुव्रीहिसमासो द्विधा तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च। तत्र तद्गुणसंविज्ञाने **'लम्बकर्णमानय कुटादौ'** च अन्यपदार्थ एव बहुव्रीहिः। **'अनेकमन्यपदार्थे'** इति भगवता पाणिनिना व्युत्पादनात् तत्रान्यपदार्थ एव बहुव्रीहिविषयः। तथापि तु समासाविषयोऽपि कुटधातुस्तत्पदादवगम्यते यथा तथेत्यर्थः। ननु स्वाविषयमपि स्वात्मानमादाय स्वविशिष्टव्यवहारसमर्थने मुक्तौ स्वप्रकाशता न स्यात् विशिष्टव्यवहाराभावादिति चेन्न, यदुक्तं तत्प्रभाकरगुरूणां नयेन। आत्मस्वरूपतां ज्ञानस्यानवगच्छद्भिर्गुरुभिर्ज्ञानस्य सविषयकत्वव्याप्यत्वमभिमतं सुषुप्तौ च ज्ञानं तन्मते नास्त्येव निर्विषयकज्ञानानभ्युपगमात् इति सविषयकस्य ज्ञानस्य स्वप्रकाशत्वम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्युपेपते– ब्रह्मस्वप्रकाशतावादिना तु निर्विषयकस्य ज्ञानस्य तन्मते विषयाभावादिति । एतावन्मात्रेण तु दृष्टान्तदार्ष्टान्तिकत्वं यद्विषये व्यवहारप्रवर्तनस्योभयवादिस्वीकृतत्वमिति ।

यदपि तदेव ज्ञानं प्रकाश्यं प्रकाशकमभ्युपगमोऽपि तदेव बोध्यः परोऽपि तदेवेत्यादिकं संकलयतो महत्साहसिकत्वमिति चेन्न, ज्ञानातिरिक्तत्वाभावेऽपि व्यावहारिकं भेदमविद्याकल्पितमादायाविद्यादशायाम् सर्वव्यवहारसंभवादिति । ननु स्वप्रकाशेन यथा स्वरूपसिद्धिस्तथा तद्विषयतया प्रपञ्चस्यापीति न प्रपञ्चमिथ्यात्वम्, **"त्वया निर्माय दत्तोऽस्मिन्, स्वप्रकाशैकमन्दिरे । न्यासीकृतः प्रपञ्चोऽयं नापह्नोतुं तवार्हति"** इति चेन्न, स्वतः सिद्धप्रकाशे हि सकलप्रपञ्चस्याध्यस्तत्वात् । न हि शुक्त्यवच्छिन्नचैतन्याध्यस्तं रजतं सत्यं तद्वदिदमपि अविद्याकृतसम्बन्धेनावभाष्यमपि न सत्यं भवितुमर्हति, इति दिक् ।

—❀❀—

शून्यपदार्थमीमांसा

– रामवृक्षः पाण्डेयः
व्याकरण-वेदान्त-साहित्य-पाल्याचार्यः
एम.ए.,पी-एच.डी. (लब्धस्वर्णपदकः)
प्रधानाचार्यः– हरिद्वारस्थजयभारतसाधुसंस्कृतमहाविद्यालयस्य

❀

माध्यमिककारिका विद्याविस्फोरितान्तःकरणानामाचार्यनागार्जुनानामनुपमा कृतिः । एतद्ग्रन्थोपरि महान् तार्किकः परमप्रतिभावान् लौकिको विद्वान् व्याख्यामेकां विरचयामास । तदनन्तरञ्चन्द्रकीर्तिनामधेयेन विलक्षणतर्ककुशलेनान्येन धीमता प्रसन्नपदाभिधेया वृत्तिरेका व्यरचि । परं भावविवेककाराचार्यचन्द्रकीर्त्योरपि प्रेक्षावतो भिदा च कियतीति विचारसमीक्षणे, आचार्यभावविवेकैः सांव्यवहारिकं प्रमाणं स्वीकृत्य नैजमतस्थापनपुरःसरं मतान्तरन्निराकारि । आचार्यचन्द्रकीर्तिस्तु भूयो न्यायाभिमताननुकूलतर्कान्यनामधेयं प्रसङ्गानुमानमाधारीकृत्य प्रतिपक्षिमतखण्डनेनैव स्वकर्तव्यं पालयामास । एतस्मादेव हेतोः स्वपक्षस्थापनाहीनत्वेन एतदीयं व्याख्या परमतखण्डननामधेयं युक्तिसमुपन्यासरीतिवैदुष्येण मनीषिगणमनोहारित्वेऽपि वैतण्डिकं मतमिति समेषां तान्त्रिकाणामभिप्रयोगोऽस्तीति ।

तत्र प्रथमं तावदिदं विचारार्हम् यद्भगवता तथागतेन बोधिसत्वेन समुपदिष्टस्य 'शून शून्यमिति' वचनस्य श्रवणमात्रेण श्रोतॄणां मनस्सु कीदृशोऽर्थः अलङ्करोति पदमिति । शून्यमित्यस्य नहि खलु नास्ति किञ्चित् तत्त्वमित्यर्थोऽपितु किञ्चित्स्वरूपनिर्धारणानर्हं शून्यमिति व्यवह्रियते । समवलोक्यते च गणितशास्त्रेऽपि कस्याश्चित् संख्याया निरूपणाभावसूचनार्थमेव विन्दुरित्यन्यनामधेयं शून्यं व्यपदिशन्ति गणितज्ञा इति । साधारणरूपनिर्धारणायोग्यत्वेन चाकाशं शून्यमिति व्यपदिश्यते । सौगतदार्शनिकैः मन्यते च क्रियाकारकादिसमवेतानां समेषां व्यवहाराणां यस्मान्निरूपयितुन्न शक्यते अत एव सर्वं शून्यमिति समुपदिष्टं भगवता बोधिसत्वेनेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि—स्वप्नजाग्रदवस्थयोश्च 'न मया दृष्टमिदं रजतादी'ति (सर्वदर्शनसंग्रहे बौद्धदर्शने पृ० २८) यो व्यवहार: समेषां लौकिकानां परीक्षकाणाञ्च, तेनैव हेतुना सर्वशून्यता समापतिता भवेदिति । तथा च विचार्यते स्वप्ने दृष्टं रजतन्न सत्, अर्थक्रियाकारित्वाभावात् । अर्थक्रियाकारित्वमेव च सत्त्वमिति तु संगिरन्ते बौद्धा: । एवं जाग्रत्यपि शुक्तिशकले रजतभ्रमेण प्रवृत्तस्य रजतत्वेनेष्टदेशमुपागतस्य पुरुषस्य तादृशरजतस्याप्राप्त्या 'मया नेदं रजतं दृष्ट' मिति निषेधानुसन्धानं प्रवर्तते स्वप्ने जागरणे चेति । तत्र च 'नेद रजत' मित्यत्र नञर्थो निषेधक्रियायामन्वेति । कारकादिसमन्वितैव च क्रिया स्यात्, अन्यथा क्रियाया: कारकाद्यनन्वितत्वे तस्या: स्वरूपमेव न निष्पद्येत । तथा च कारकाद्यन्वितक्रियाया: निषेधेन कर्तृकर्मादिरूपस्य विशेषकारकस्य क्रियायाश्च सुतरामेव निषेध: समापतति ।

'नेदं रजत' मित्यत्र क्रियासंपादकत्वेन कर्तु: तद्विशिष्टाया दर्शनक्रियाया: दर्शनकर्मत्वेनेदन्तायास्तथा तत्र समारोपितस्य रजतस्य, तत्र रजतत्वादे: समवायसंबन्धस्य चोपस्थिति: स्यात् । तत्र नञर्थप्रतिषेधेन समेषान्निषेधोऽनिषेधो वेत्येकतर: पक्ष एव व्यवस्थापयितुं शक्य: । तत्र रजतत्वादेस्तत्सम्बन्धस्य समवायस्य च निषेध: सर्वैरेव स्वीकार्य:, अन्यथा तादृशज्ञानस्य यथार्थत्वापत्ते:, तत्त्वे तथा निषेधायोगाच्च । अस्मादेव हेतो: समुपस्थापितानां पदार्थानां कस्यचिदंशविशेषस्य निषेधे स्वीकर्तव्ये सुतरामेव समेषां निषेध: स्वीकर्तुं शक्य: । अन्यथाऽर्धजरतीयन्यायकल्पनं स्यात्, तच्चानिष्टमिति । तथा च दृष्टत्वेनेष्टयो: धर्मिधर्मयोस्तत्सम्बन्धस्य च समानरूपत्वेन निषेध एव स्यात् । तथा च सति धर्मिभूताया: इदन्त्वावच्छिन्नत्वेन शुक्ते: धर्मस्य इदन्तया रजतत्वस्य च निषेधस्वीकारे सर्वेषामसत्वमेव समायातीति युक्तमेव समभिहितं भगवता बोधिसत्वेन सर्वं शून्यं शून्यमिति । कथितं च सर्वदर्शनसंग्रहे माधवाचार्येणेति—'यदि दृष्टं स्यात् तदा तद्विशिष्टस्य दर्शनस्येदन्ताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादे: सत्त्वं स्यात् । न चैतदभितं कस्यचिद्वादिन: । न चार्धजरतीयमुचितन्नहि कुक्कुट्या एको भाग: पाकायाऽन्यो भाग: प्रसवाय कल्पयितुं समुचित: । तस्मादध्यस्ताधिष्ठानतत्सम्बद्धदर्शनद्रष्टॄणां मध्ये एकस्यानेकस्य वाऽसत्त्वे निषेधविषयतया सर्वस्यासत्वं बलादापतेदिति" । (पृ० २८-२९ बौद्धदर्शने सर्वदर्शनसंग्रहे)

पुनरिदं विचारार्हम् यत् "नेदं मया दृष्टं रजतम्" इत्यादौ नञ्दर्शनात् प्रसज्यप्रतिषेधकतैव न पर्युदासकता । तथा चात्र केवलं निषेधात्मकत्वमेव प्रतीयते, न पुन: विधिमुखेन स्वपक्षस्थापनमपि तत्र समुपयुज्यते । अत एव माध्यमिककारिकाव्याख्याप्रसङ्गे तत्रभवतो महाप्रतिभावतश्चन्द्रकीर्ते: किञ्चिद्वस्तुस्वरूपप्रतिपादतत्पराणां सकलशास्त्रपर्यवेक्षणसूक्ष्ममतीनामन्येषां दार्शनिकानां मतखण्डनमेव कर्तव्यत्वेन प्रतिभाति, न भूयो विधिमुखेन स्वपक्षस्थापनमिति भावविवेककारमतेन शून्यपदार्थो विचारित: ।

अथाचार्यचन्द्रकीर्तिमतमनुसृत्य शून्यतत्वविचार: प्रकटयते—

समस्तं जगदिदं कार्यकारणभावात्मकमिति कार्यकारणभावमुखेनैव पदार्थविश्लेषणप्रक्रिया तत्तच्छास्त्रे संप्राप्यते । अनुभूतिविषयतामापन्नं समस्तमिदं वस्तुजातं न सर्वत्र सर्वस्मिन् काले संप्राप्तं स्यादिति समेषामेव नातितिरोहितम् । अत एव जगदिदं सांवृतिकं कार्यत्वेनानुभूयमानं सुतरामेव कादाचित्कमित्यङ्गीकार्यम् । हेत्वनपेक्षकादाचित्कत्वं कार्यस्वरूप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरोधित्वेनाऽहेतुकं कार्यमिति वदत एव व्याख्यानं स्यात् । तथा सर्वस्मिन् काले सर्वेषां सम्भवाभावस्य संप्राप्ततया स्वभाव एव सर्वस्य कार्यसमूहस्य नियामक इत्यपि न साङ्गत्यमापद्यते । तस्माद्धेतोः कादाचित्कत्वेनेष्टस्य कार्यस्य तत्त्वविश्लेषणपरैर्दार्शनिकैर्बहुविधमार्गमवलम्ब्य नैजो राद्धान्तः समुद्घोषितः । तत्र कार्यं सदैव सदिति सांख्याः कथयन्ति, नैयायिकास्तु प्रागुत्पत्तेः कार्यमसदप्युत्पत्त्यनन्तरं सदेवेति । कस्मिन्नपि काले कार्यं न कमपि स्वभावमावहति इति माध्यमिकाः, तथा चानुभूयमानवस्तुसमूहानां ये संभाव्यमाना धर्माः तद्यथा सत्त्वमसत्त्वं, सदसत्त्वं, न सत्त्वं, नासत्त्वञ्चेति तेषां तेषां धर्माणां वस्तुस्वभावयोग्यत्वेन निःस्वभावमेव वस्तुतत्त्वमिति फलत आपततीति माध्यमिकानां राद्धान्तः । तथा चामुमेवार्थं प्रतिपिपादयिषितुं सांख्यादिमतखण्डनपूर्वक स्वकीयमतव्यवस्थापनार्थं कार्यकारणभावस्य पर्यायान्तरं प्रतीत्यसमुत्पाद परीक्षमाणा भगवन्तो नागार्जुनाः ग्रन्थप्रारम्भे प्रकृतं प्रस्तूयमाना आहुः–**"न स्वतो नापि परतः"** इति (मा० १–१)

"न स्वतो नापि परतः" इति कारिकाया व्याख्यानकाले सर्वतन्त्रस्वतन्त्राणामाचार्यचन्द्रकीर्तिमहाशयानामतिसूक्ष्ममीमांसासरणिः सुविशदं समुपलभ्यते, तत्तु गौरवं परिजिहीर्षया नात्र समालोच्यते, परं केवलमेतदेव तावद्वक्तव्यं यत् सांख्यन्यायादिशास्त्रप्रवर्तितां कार्यकारणभावशैलीं यथायथं समीक्ष्य तत्तन्मतनिरासपूर्वकमाचार्यचन्द्रकीर्तिभिः सकलवस्तूनां निःस्वभावत्वमेव व्यवास्थापि । तत्र सांख्यमतनिराकरणे या उपपत्तयः प्रादर्शिषत तासामयं समस्तार्थः यद्युत्पत्तेः प्राक् कार्यं सत् स्यात्तदा समसत्ताकाऽन्यथाभावरूपपरिणामं स्वीकुर्वतां सांख्यानां कारणावस्थायां स्थितस्यैव वस्तुनो भङ्ग्यन्तरेणाभिव्यक्तिः कार्यमिति निर्धारणात् फलतः सहेतुकमेव कार्यमित्यायातम् । अत एव कथमपि सांख्यीयमतमुपयुक्ततान्नापद्यते, कार्यकारणयोरत्यन्ताभेदे इदं कार्यमिदं कारणमिति भेदावगाहिनिर्धारणाभावात् । किञ्चोत्पादात् प्राक् कार्यस्य सत्त्वाङ्गीकारे तत्सम्पादनाय कर्तृव्यापारोऽपि व्यर्थ एव स्यात् । नहि परिनिष्पन्नमपि अलं सम्पादयितुं पुनर्दाहादिव्यापारः क्रियते केनचित् प्रेक्षावता । तथा च चेष्टाशतेनापि न सांख्यीया कार्यकारणभावपद्धतिः सुसङ्गता ।

अथ परतः कार्यमुत्पद्यते इति स्वीक्रियते, तथापि कार्यकारणभावानुपपत्तिरेव स्यात्, प्रागुत्पत्तेरसदेव कार्यं स्वस्मादत्यन्तभिन्नात्कारणात् कर्तृव्यापारादिवशेन आत्मानं प्राप्नोतीति असत्कार्यवादिनां नैयायिकानां सिद्धान्तः । तत्रेदं विचार्य्यते यदि स्वप्रतियोगिकभेदवतः स्वात्यन्ताभाववतो वा कारणात् कार्यमुत्पद्यते, तदा प्रतिनियतकार्यकारणव्यवस्था नैव भवेत् । दृश्यते च तिलेभ्य एव तैलमुत्पद्यते न सिकताभ्यः, असत्कार्यवादिमते तु कार्यकारणनैयत्यसाधिका अपि युक्तयः प्रमाणयितुं न शक्यास्तथाहि– उत्पादात् प्राक् तैलं यदि तिलेष्वत्यन्तमसदेव स्यात्तर्हि तिलेभ्य एव तैलमुत्पद्यते इत्यत्र किं विनिगमनम्? तैलात्यन्ताभाववतीभ्यः सिकताभ्यः कथं तैलं नोत्पद्यते,. तिलसिकतयोस्तैलासत्त्वं तुल्यमेव । एवञ्च नहि चेष्टाशतेनापि असतः सत्त्वमापादयितुं शक्यते केनापि । न हि गगनकमलिनीसत्त्वं कदाचिदपि प्रतिपिपादयिषितुं स्वयं विधात्रापि शक्यते । तस्मात् परतः कार्यमुत्पद्यत इत्यपि न युक्तिसहः सिद्धान्तः । तस्मान्माध्यमिकानां मते कार्यकारणभावानुपपत्तिबलात् पदार्थानां सत्त्वमसत्त्वं वा न प्रमाणितं भवितुमर्हति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं कथञ्चित्सत्त्वं कथञ्चिदसत्त्वमित्यनेकान्तवादिसरण्यनुसरणमपि नोचितम् सदसतोरेकत्र विरोधात् सत्त्वमसत्त्वञ्चेति वस्तूनां कल्पयितुमसमीचीनमेव । अत एव सदसत्पक्षो निराकृतः । सुतरामेव च न सत्त्वं नासत्त्वमिति पक्षोऽपि निराकृतः स्यात् । न सत्त्वमित्युक्ताऽवसत्त्वमेवावगम्यते । एवञ्च न सत्त्वं नासत्त्वमिति उन्मत्तप्रलापवदुपेक्षितव्यमिति ।

तथा च माध्यमिकानाम्मते निखिलमिदं जगत् मायामरीचिकोदकादिगन्धर्वनगरवत् भ्रान्तिकल्पितव्यवहारनिष्पादकमपि परमार्थतः सत्त्वविरहितं यथा सम्मतन्तथा अविद्यापरिकल्पितं तादृशतादृशमेव निखिलं वस्तुजातं पारमार्थिकसत्ताशून्यमिति अद्वैतवेदान्तिनामपि सिद्धान्तमालोक्य केचन विद्वांसः पुनः माध्यमिकाद्वैतवेदान्तिनोः मतसाम्यं समुद्घोषयन्तः "मायावादमसच्छास्त्रं प्रच्छन्नबौद्धमेव तत्" इति स्वविजयदुन्दुभिशब्दतुल्यं प्रचारयन्ति । एतत्पुनरुपरिपरिशीलितमाध्यमिकाद्वैतवेदान्तमतानां सुतरामेव निरतिशयसूक्ष्मविषयभेदमनालोचयतामनवधानपरमिव प्रतिभाति । यतो निरधिष्ठानतः भ्रमकल्पितानां नामरूपादिविविधधर्माक्रान्तान परिदृश्यमानत्वेन व्यवहारोपयोगिनां समेषां वस्तूनां गन्धर्वनगरादिवत् अलीकत्वमेव माध्यमिकानामभिमतम् । अद्वैतवेदान्तिनान्तु सदसद्भ्यामनिर्वाच्ययाऽनाद्यविद्यया परिकल्पितानां वस्तुजातानां पारमार्थिकत्वाभावेऽपि नालीकत्वमिष्टम् । ब्रह्मसत्तातिरिक्तसत्ताशून्यतया समस्तप्रपञ्चानां फलतः ब्रह्मस्वरूपत्वेन केवलं सदधिष्ठानकभ्रमविषयत्वमेव नामरूपादिविकारभेदभिन्नानां जगताम् । तथा चाद्वैतवेदान्तमते निरस्तसकलभेदोपाधिकतयाऽखण्डचैतन्यैकरसं सर्वतः परिव्याप्तमवाङ्मनसगोचरं कूटस्थं सद् ब्रह्मैव परमार्थतः सत्यं वस्तु । ब्रह्मसत्तातिरिक्तसत्ताशून्यतयाऽवस्थितानामनिर्वाच्याऽविद्या द्वितयसचिवब्रह्मोपादानकानां व्यवह्रियमाणानां प्रपञ्चानां सन्मूलकत्वेन नात्यन्तमसत्त्वम्, अनुभूयमानत्वादर्थक्रियाकारित्वाच्च । नहि गगनकमलिनीप्रभृतीनामलीकानां व्यवहारविषयत्वं योग्यत्वप्रतीतिविषयता चावलोकिता लोके । तस्मान्नात्यन्तमसत्त्वं प्रपञ्चस्येति ।

प्रपञ्चस्य ब्रह्मप्रमयैव बाध्यत्वेन तदतिरिक्तप्रमयाऽबाध्यत्वेऽपि वेदान्तवाक्यजन्यनिष्प्रकारकब्रह्मनिश्चयबाध्यत्वात् तेषां प्रपञ्चानां बाध्यत्वादेव न परमार्थतः सत्त्वम्, सत्त्वस्य कदाचिदपि बाधायोगात् । तथा चोत्तरकालबाध्यत्वेन शुक्तिरूप्यादिवत् एकान्ततः सत्त्वेनापि न निर्वचनीयम् । अनुभूयमानत्वाच्चापि नात्यन्तमसदित्यपि वक्तुं शक्यम् । अत एव प्रपञ्चस्य सदसद्भ्यामनिर्वाच्यत्वमेवोररीकृतन्तैरद्वैतवेदान्तिभिः ।

तथा चाद्वैतवेदान्तमते सत्त्वं त्रिविधं प्रातिभासिकं, व्यावहारिकं, पारमार्थिकञ्चेति । तत्र ब्रह्मसत्तातिरिक्तयत्किञ्चित्प्रमाबाध्यत्वं तत् प्रातिभासिकं सत्त्वम् यथा शुक्तिरूप्यादीनाम् । व्यावहारिकं सत्त्वन्तु ब्रह्मप्रमातिरिक्तप्रमया अबाध्यत्वम् । समस्तमेव व्यावहारिकं जगत् तावदेव सत्त्वेन प्रतीतं "यावन्नेह नानाऽस्ति किञ्चन" सर्वं खलु–" "अहं ब्रह्मास्मि" इत्यादिवेदान्तवाक्यजन्यनिर्विकल्पकब्रह्मनिश्चयो न भवेत् । जाते च तस्मिन् नामरूपाद्यात्मकं सर्वं बाधितं भवेत् । तदानीन्तु ब्रह्मस्वरूपातिरिक्तं किञ्चिन्नावशिष्यते, अत एव व्यावहारिकं सत्त्वं जगतः । त्रिकालाबाध्यत्वरूपं सत्त्वन्तु केवलं ब्रह्मण एव । ब्रह्म वस्तुतया न कारणं न वा कार्यम् । कार्यकारणभावादिकल्पनन्तु अविद्याविजृम्भितमेव । एवञ्च वेदान्तमतानुशीलनेन स्पष्टमेवेदं ज्ञायते यत् यत्किंचित्प्रतिभाति, अनुभूयते, गृह्यते वा, तत्सर्वं स्वरूपतः सच्चिदानन्दमयमेव । केवलन्तु अनाद्यविद्याप्रभावेण नामरूपादिविकारास्पदं यत्, तत् विविधं समवगम्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माध्यमिकमते तु निरधिष्ठानश्च भ्रमः कल्पितः। अद्वैतवेदान्तमते तु साधिष्ठानकः अधिष्ठानभूतं वस्तु च यतः परमार्थसत् तत एव अधिष्ठानसाक्षात्कारनिवर्त्यत्वम्भ्रमस्योररीकृतन्तैरिति। तत्र च भ्रमविषयीभूतानां रजतादीनां सत्त्वमसत्त्वं वेति निर्णेतुमशक्यतयाऽनिर्वाच्यत्वमेव तस्य प्रतिपादितम्। तथा चाद्वैतवेदान्तिमते तु सच्चिदानन्दस्वरूपात् ब्रह्मण एव सर्वं जगत् समुत्पन्नम्, अविद्या तु तत्र सहकारिणी। माध्यमिकमते तु वस्तुतः कार्यकारणभाव एव नोपपद्यते इति प्रागेव प्रतिपादितमस्माभिः। तथा चाद्वैतवेदान्तिमते आत्मा नाम कश्चिद् नित्यः पदार्थः। माध्यमिकमते तु तादृशं किमपि नास्ति। अतो भूयान् खलु भेदः पदे-पदे माध्यमिकाद्वैतवेदान्तयोः तत्त्वानुशीलनपराणां शास्त्ररसिकानां चित्ते पदं विदधातीति विस्तरभिया नाधिकं समुल्लिख्यत इति।

स्वागतं नवशासनस्य

–रामरत्नः शास्त्री, साहित्याचार्यः, एम० ए०, सहायकविभागाध्यक्षः–आधुनिकविषयाणाम्

*

विश्वस्य राजनीतिके मञ्चे भारतीयस्य लोकतन्त्रस्य यः नवः अभ्युदयो जातः, स बहुभिर्दृष्टिकोणैरतीव महत्त्वपूर्णः। अहिंसया सौहार्देन च सत्तायाः हस्तान्तरणं न केवलं जनमतसमादरसूचकमपितु राजनीतेः स्वार्थचक्रेषु उद्भ्रान्तमानवतायाः कृते आशाकिरणरूपमप्यस्ति। भारतीयराजनीतौ नवपरिवर्तनेन सह जनचेतनाया योऽभ्युदयो लक्षितस्तं वयं हृदयेन अभिनन्दामः, आशास्महे यत् जनतया नवशासकेभ्यो यो विश्वासः प्रदत्तः, स उत्तरदायित्वस्य पवित्रं रूपं ग्रहीष्यति, शासकीयप्रक्रियासु च जनाकाङ्क्षापूर्तये राष्ट्रदेवताचरणेषु समर्पितो भावः जागर्तिमुपैष्यति। सर्वे मन्त्रिणः सदस्याश्च प्रामाणिकतया, सरलतया, उत्सर्गभावनया च सह स्वदायित्वं पूर्णतया वोढुं क्षमा भविष्यन्ति। वयं जगन्नियन्तारं प्रभुं प्रार्थयामः यन्नवं शासनं पवित्रं शक्तिसम्पन्नं च भवेत्, भारतमहत्त्वं च लोकोत्तरं कर्तुमग्रसरं स्यात्।

अद्य राष्ट्रे अनेकाः समस्याः सन्ति, यासां समाधानं परमापेक्षितमस्ति। निर्धनताया अभिशापः राष्ट्रियं जनमानसं ग्रसति। ईदृश्यः यथार्थयोजना उपयुज्येरन् याभिर्निर्धनजनता सुखसमृद्ध्युन्मुखी भवेत्। समये समये यूनामक्रोशो विद्रोहं जनयति यतस्ते स्वभविष्यं तमोमयं पश्यन्ति। निरुद्यमताया निरुत्साहस्य अकर्मण्यतायाश्चावर्ते पतिता युवशक्तिरुद्धार्या भवेत्, येन या रचनात्मकं कार्यं कर्तुं प्रभवेत्। आशास्महेऽनुशासनस्य धूर्वोढार इमां युवशक्तिं सुमार्गं नयेयुः।

नवशासनं पदलोलुपतां, कीर्तिं, स्वार्थपरतां च परित्यज्य राष्ट्रं प्रति सर्वस्वसमर्पणभावनां जागरयिष्यति; येन सामान्यजीवनमानसं भास्वरं भवेत्। महात्मा गांधी कामयते स्म यद् राजनीतिः छलच्छिद्रहिंसाविध्वंसादिभ्यः पृथग्भूता सत्यानुप्राणिता च भवेत्। ईश्वरः तथा शोभनमवसरं दत्तवान् यथा महात्मनो गान्धिमहोदयस्य सा दिव्या कल्पना साकारा भूत्वा विश्वस्य समक्षम् आगच्छेत्। एतद् गुरुतरं कार्यं वर्तमाना राजप्रतिनिधयः सम्पादयेयुः इति सर्वेषां भारतीयानां हार्दिकी भावना।

*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दी-विभाग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकारी
अध्यापक
एवं
परिचारक
सत्र
१९७६-७७

प्रथम पंक्ति (भूमि पर) परिचारकगण—नन्दनसिंह, चन्द्रमणि शर्मा, भूपालसिंह, पानदेव ।

द्वितीय पंक्ति— स्वामी श्री अनन्तप्रकाश जी, स्वामी श्री शंकरदास जी, श्री हनुमान् शास्त्री, श्री साईंदास वर्मा, श्री मनसाराम शर्मा, स्वामी श्री हरप्रकाश जी, श्री राजाराम उनियाल, श्री शुकदेवदास शास्त्री ।

तृतीय पंक्ति— श्री कौस्तुभानन्द पन्त, श्री देवेन्द्र कुमार, श्री परमानन्द डुगराकोटी, श्री खीमानन्द सती, श्री ब्र० विट्ठल, श्री रामरत्न शास्त्री, श्री विष्णुदत्त गोस्वामी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनशास्त्र का स्वरूप :

डा० अभेदानन्द
अध्यक्ष–दर्शनविभाग,
गुरुकुल कांगड़ी विश्वविद्यालय

*

मानव एक विवेकशील प्राणी है (Man is a rational animal)। वह प्रत्येक कार्य को विचारपूर्वक करता है। मनुष्य और पशु में यही अन्तर है कि पशु की प्रवृत्ति अविवेकपूर्वक होती है, किन्तु मनुष्य की विवेकपूर्वक। यही कारण है कि यदि कोई मनुष्य अविवेकपूर्वक कार्य करता है, तो उसे केवल नाममात्र का मनुष्य कहा जाता है, वास्तव में नहीं। मनुष्य की इसी स्वाभाविक विचारशक्ति का नाम ही दर्शन है। **'दृश्यतेऽनेन तद्दर्शनम्'** इस व्युत्पत्ति के अनुसार जिसके द्वारा वस्तु का स्वरूप देखा जाय, उसे दर्शन कहा जाता है। यह ससार क्या है? इसका कोई रचयिता है या नहीं? आत्मा का स्वरूप क्या है? वह दृश्यमान स्थूल शरीर आदि से भिन्न है या अभिन्न? इत्यादि प्रश्नों का समाधान करना दर्शनशास्त्र का काम है। शास्त्र शब्द 'शासु अनुशिष्टौ' अथवा 'शंसु स्तुतौ' इस धातु से करण अर्थ में ष्ट्रन् प्रत्यय करने से बनता है। शासन अर्थ में शास्त्र शब्द का प्रयोग धर्मशास्त्र, नीतिशास्त्र आदि के लिए किया जाता है, परन्तु शंसन अर्थ में शास्त्र शब्द का प्रयोग उस शास्त्र के लिए किया जाता है, जो वस्तु-तत्त्व का वर्णन करता हो। धर्मशास्त्र कर्तव्य-अकर्तव्य का वर्णन करने के कारण पुरुषतन्त्र है, परन्तु दर्शनशास्त्र वस्तुस्वरूप का प्रतिपादन करने के कारण वस्तुतंत्र है। इस प्रकार यहाँ वस्तु-तत्त्व के प्रतिपादक शास्त्र को दर्शन कहा जाता है। इसके विपरीत पाश्चात्य दर्शन का वाचक जो 'फिलासफी' शब्द है, उसका अर्थ है–ज्ञान-प्रेम। क्योंकि यह शब्द 'फिलास' (Philos), जिसका अर्थ है प्रेम या अनुराग, तथा 'सोफिया' (Sophia) जिसका अर्थ है ज्ञान, के संयोग से बनता है।

इस प्रकार दर्शन तथा फिलासफी शब्दों की व्युत्पत्ति से ही हमें भारतीय तथा योरोपीय दृष्टिकोणों की भिन्नता स्पष्टतया प्रतीत होती है। यहाँ दर्शन केवल ज्ञान का प्रेम या विद्यानुराग ही नहीं है, अपितु तत्त्व-साक्षात्कार रूप है। यहाँ ज्ञान-मीमांसा दर्शन का साधन है, साध्य नहीं। साध्य है–तत्त्वमीमांसा, जिसके लिए प्रमाणों की मीमांसा की आवश्यकता होती है और जिसके जानने पर ही जीवन का लक्ष्य पूर्ण हो सकता है अर्थात् दुःख की आत्यन्तिक निवृत्ति हो सकती है। आत्मा या ब्रह्म ही परमतत्त्व है, जिसके साक्षात्कार के लिए सभी दर्शन उपाय करते हैं। इस प्रकार यहाँ दर्शन का प्रारम्भ आध्यात्मिक दृष्टि से होता है।

सत् की व्याख्या करने में भारतीय दार्शनिकों ने विषय की अपेक्षा विषयी आत्मा की ओर अधिक ध्यान दिया है। आत्मा को अनात्मा से पृथक् करके जानना ही दार्शनिकों का मुख्य कार्य है। इसी कारण 'आत्मा को जानो' (आत्मानं विद्धि) यही भारतीय दर्शन का मूल मंत्र रहा है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इस प्रकार दर्शन के ऊपर संक्षेप में सूक्ष्म दृष्टिपात कर चुकने पर यह कहा जा सकता है कि प्राचीन भारतीय ऋषि-मुनियों ने अपनी दिव्य-दृष्टि से जिस तत्त्व का साक्षात्कार किया, उसी को दर्शन शब्द से कहा गया। यहाँ पर यह प्रश्न हो सकता है कि यदि दर्शन का अर्थ साक्षात्कार है, तो विभिन्न दर्शनों में जो मतभेद है, उसका कारण क्या है ? इस प्रश्न के उत्तर में यही कहा जा सकता है कि अनन्तधर्मात्मक वस्तु को विभिन्न ऋषि-मुनियों ने अपनी-अपनी दृष्टि से देखने का प्रयत्न किया और तदनुसार ही उसका प्रतिपादन भी किया। अतः यदि हम दर्शन शब्द के अर्थ को भावात्मक साक्षात्कार के रूप में ही ग्रहण करें, तो उपर्युक्त प्रश्न का अनायास समाधान हो सकता है। क्योंकि विभिन्न ऋषियों ने अपने-अपने दृष्टिकोणों के अनुसार वस्तु के स्वरूप को जान कर उसी का बार-बार चिन्तन और मनन किया तथा इसके फलस्वरूप उन्हें अपनी भावना के अनुसार वस्तु का दर्शन हुआ। यही भारतीय दर्शन का आन्तरिक रहस्य है।

इसके विपरीत पाश्चात्य दर्शन का उद्देश्य केवल मानसिक कौतूहल की निवृत्ति है। जैसा कि ऊपर बतलाया जा चुका है कि 'फिलासफी' का अर्थ विद्यानुराग है। आधुनिक पाश्चात्य दर्शन के जन्मदाता देकार्त का कथन है कि दर्शन का प्रारम्भ संशय से होता है–(Philosophy begins in Wonder)। वस्तु के यथार्थ स्वरूप को जानने के लिए सर्वप्रथम वे सभी वस्तुओं और विचारों के अस्तित्व पर ही संदेह प्रकट करते हैं। सदेह से ही वह मानसिक उत्कण्ठा भी निवृत्ति करते हैं। वे इस बात को नहीं बतलाते हैं कि जीवन मे दर्शन का क्या मूल्य है, जीवन और दर्शन का क्या सम्बन्ध है ?

इसके विपरीत भारतीय दर्शन का जीवन से घनिष्ठ सम्बन्ध है। समस्त भारतीय दर्शन का लक्ष्य सांसारिक दुःखों की आत्यन्तिक निवृत्ति अर्थात् मुक्ति है। इस संसार में प्रत्येक प्राणी आध्यात्मिक, आधिभौतिक और आधिदैविक, इन तीन दुःखों से पीड़ित है। अतः उक्त दुःखों की निवृत्ति का उपाय बतलाना ही दर्शनशास्त्र का मुख्य लक्ष्य है। दुःख, दुःख का कारण, मोक्ष तथा मोक्ष का हेतु खोज कर उसका प्रतिपादन करना दर्शनशास्त्र का कार्य है। जिस प्रकार चिकित्साशास्त्र में रोग, रोगहेतु, आरोग्य और भैषज- इन चार तत्त्वों का प्रतिपादन होता है, उसी प्रकार दर्शनशास्त्र में भी उक्त चार बातों का पता लगाना आवश्यक होता है।

उपर्युक्त विवेचन से यह भी स्पष्ट हुआ कि भारतीयदर्शन का सम्बन्ध भौतिक समस्याओं के समाधान से उतना नहीं, जितना कि आध्यात्मिक समस्याओं के समाधान से है। किन्तु आजकल प्रत्येक क्षेत्र में दर्शन का नाम लिया जाता है, अतः प्रश्न उत्पन्न होता है कि दर्शन की आधुनिक परिभाषा क्या है ? जिससे कि दर्शन कहने से उनका यथार्थभाव और अर्थ हमारे सामने प्रकट हो सके। ससार के सभी ज्ञात तथा अज्ञात विषय दर्शन की परिधि के अन्तर्गत हैं। अतः इसकी सर्वमान्य परिभाषा तो कठिन है, इसके अतिरिक्त संसार के विभिन्न दार्शनिकों ने विभिन्न मतों का प्रतिपादन किया है। कोई भौतिकवादी है, तो कोई अध्यात्मवादी। इस तरह विषय-वस्तु की भिन्नता के कारण इसकी परिभाषा भी भिन्न-भिन्न हो सकती है। कोई इसे विज्ञान बतलाता है, तो कोई इसे प्रमाणशास्त्र ! इससे स्पष्ट है कि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

